**DIPLOMA IN SANSKRIT**
**Paper - I (Part - A)**

# KRISHNACHARITHAM

**Directorate of Distance Education**
Rashtriya Sanskrit Vidyapeetha
Tirupati - 517 501(A.P.)

# UNIT-I
# श्रीकृष्णचरितम्

**संरचना**

१.१.परिचयः
१.२.लक्ष्याणि
१.३.साहित्यम् – गद्यकाव्यानि
१.४.कृष्णचरितम् – परिचयः
१.५.कृष्णचरितम् – कवेः परिचयः
१.६.पाठ्यांशसङ्ग्रहः (कथावस्तु)
    १.६.१.भगवतः श्रीकृष्णस्य अवतरणम्
    १.६.२. कंसस्य दुष्कृत्यानि
    १.६.३.राम–कृष्णयोः बाल्यम्
    १.६.४.बृन्दावने राम–कृष्णयोः विहरणम्
    १.६.५.गोपाङ्गनाभिः सह श्रीकृष्णः
    १.६.६.कंसस्य वधः
१.७.उपसंहारः
१.८.अभ्यासः

## १.१.परिचयः

संस्कृतवाङ्मयं वैदिकम् लौकिकं च इति प्रधानतः द्विविधं भवति। तत्र च लौकिकं पुराण–इतिहास– काव्यादिभेदेन बहु विस्तृतम् अस्ति । तत्रापि काव्यवाङ्मयं भिन्न–भिन्नप्रक्रियाभिः सुशोभितं संवर्धितं च अस्ति। काव्यवाङ्मयं प्रथमतः छन्दसम् आधारीकृत्य पद्य–गद्य–चम्पूरूपेण त्रिप्रकारकं भवति। यस्य पादनियमाः भवन्ति तत् रचनम् पद्यं भवति। रघुवंशादिकम् पद्यकाव्यस्य उदाहरणं भवति। अपाद–पदसङ्घातः , नाम पादनियमं विना यत् रचनं विद्यते तत् गद्यं भवति। दशकुमारचरितम्, इत्यादि गद्यकाव्यस्य उदाहररणं भवति। पद्य– गद्ययोः मिश्रमं रचनं चम्पूः भवति। रामायणचम्पूः, भारतचम्पूः, भागवतचम्पूः चम्पूकाव्यस्य उदाहरणानि भवन्ति। पञ्चतन्त्र–हितोपदेशादिषु रचनं यद्यपि गद्यपद्यात्मकम् एव, तथापि तत्र पद्यं सङ्कलनात्मकम् । अतः तेषां चम्पूः इति प्रशस्तिः नास्ति। प्रकृते अयं पाठ्यांशः कृष्णचरितम्–प्रथमखण्डात् स्वीकृतः । अयं पाठ्यांशः  कृष्ण चरितस्य संक्षिप्तं परिचयं ददाति । कृष्णचरितम् आधुनिकं गद्यकाव्यम् । संस्कृतसाहित्यप्रपञ्चे कृष्णचरितस्य स्थानं

विशदीकरोति । कृष्णचरितस्य गद्यं सरलम् सरसं सुन्दरं च भवति।

## १.२.लक्ष्याणि

वयं भारतीयाः। वयम् अस्मत्– सनातनसंस्कृतिं प्रति अवगाहनापराः भवेम । भारतीयानां सनातनं जीवनविधानं महत्वपूर्णम्। वयम् अनादिपरम्परागतजीवनविधानं च अवश्यं जानीयाम। सनातनजीवनविधानस्य कर्तारः वा द्रष्टारः ऋषयः भवन्ति। ते च जीवितं आचरणात्मकं भावयन्ति । ऋषयः भारतीयसनातनतां वर्णयन्ति। ते च भारतस्य महोन्नतं महिमान्वितं सनातनं ज्ञानं विज्ञानं च आविष्कुर्वन्ति। युग–युगानां चरितं च ग्रन्थस्थं कुर्वन्ति। तच्च आर्षविज्ञानम्,आर्षं तत् चरितं मानवं नागरिकं सांस्कृतिकं शास्त्रीयं च करोति। मानवम् आस्तिकं करोति। विनयशीलिनं करोति। आर्षविज्ञानखनिषु इतिहास ग्रन्थाः पुराणानि च प्रमुखानि। पुराणानि जगतः सृष्टि–स्थिति –लयान् बोधयन्ति। राज्ञां वंशानुचरितं कथयन्ति। इमानि च पुराणानि मित्रसम्मितानि, अर्थप्रधानानि च भवन्ति। इमानि साधून् असाधून् च विषयान्, पाठकानां पुरतः स्थापयन्ति। सत्–असतोः प्रवृत्तिं प्रति स्वेच्छां कल्पयन्ति। प्रतिपादितम्,सूचितं वा सन्देशं स्वीकृत्य तदनुगुणम् अनुकूलतया प्रवर्तेत इति हि पुराणाम् आशयः अस्ति।अस्य पुराणवाङ्मयस्य समर्पकः वेदव्यासः। तेन समर्पितेषु श्रीमद् भागवतम् अन्यतमम्। तत्र च भगवतः श्रीमहाविष्णोः अवतारविशेषाः वर्णिताः, भागवतानां च चरितं वर्णितम् अस्ति । प्रकृते श्रीकृष्ण–अवतारस्य विशेषाः अत्र पाठ्यांशे वर्ण्यन्ते। एतत् पाठ्यांशस्य अध्ययनेन ––

- आधुनिकसंस्कृतगद्यं प्रति परिचितः भवति।
- आधुनिकसंस्कृतगद्यस्य माध्यमेन पौराणिककथायाः श्रवणे समर्थः भवति।
- आधुनिकसंस्कृतगद्ये पौराणिककथायाः पठने च कुशलः भवति।
- आधुनिकसंस्कृतगद्यस्य माध्यमेन सरलसंस्कृतस्य भाषणे,सरलवाक्यरचनायाः निर्माणे,प्रवीणः भवति।
- दुष्टकार्याचरणेन भुवः भारम् अधिकम् भवति इति जानाति।
- कंसस्य क्रूरतां प्रति उद्वेजकः भवति।
- भगवतः आपन्नप्रसन्नत्वं प्रति,शिष्टरक्षणं प्रति च परवशः भवति
- दुष्टशिक्षणाय भगवतः निबद्धताम् अवगच्छति।

## १.३.साहित्यम् – गद्यकाव्यानि

साहित्यशब्दस्य सहितयोः भावः इति हि व्युत्पत्तिः। सुन्दरता,सरलता,सरसतादयः धर्माः शब्देषु अर्थेषु च पूर्यन्ते ,आरोप्यन्ते,CHARGE क्रियन्ते । तदा शब्दाः अर्थाः च नीरसम् अपि वस्तु सरसं कुर्वन्ति।भारभूतम् अपि विषयं सरलं व्यक्तीकुर्वन्ति। हृदयपूर्वकं चमत्कृतिम् आस्वादयितुं

पाठकान् आलोचनापरान् कुर्वन्ति च। एवम् आनन्ददायकाः सौन्दर्याधायकाः सारल्येन समन्विताः, सरसतापादकाः च शब्दाः अर्थाः एव साहित्यशब्देनव्यवहारं भजन्ति। तस्य विशिष्टं रूपम् एव काव्यं भवति। काव्यं सानन्दं जीवनाय सन्देशं ददाति। काव्यं पाठकं व्यवहारदक्षं करोति। पाठकं सामाजिकं करोति। पाठकं सुशिक्षितं करोति। नागरिकं करोति। काव्यस्य प्रधानं प्रयोजनम् अपि एतदेव भवति । एतच्च काव्यं विधानभेदम् अनुसृत्य श्रव्यं दृश्यम् इति द्विविधम्। श्रव्यकाव्यं श्रवणद्वारा सहृदयस्य आनन्दं जनयति । दृश्यकाव्यं दर्शनद्वारा प्रेक्षकाणां चित्तानि आवर्जयति । रचनापद्धतिम् अनुसृत्य अपि काव्यं पुनः - पद्यं, गद्यं, चम्पूः इति त्रिविधं भवति । तत्र पद्यं छन्दोबद्धं तन्त्रीलयसमन्वितं श्रवणसुभगं भवति। चिरं पाठकस्य मनसि मननाय स्थातुं प्रभवति । गद्यमिति पदं 'गद - व्यक्तायां वाचि' इति धातोः निष्पन्नम्। यत् प्रत्यययोजनेन गद्यम् इति रूपं भवति। व्यक्तं वचः इति तस्य अर्थः। छन्दोवशात् पद्ये परिमितयः वर्तन्ते। सुलभतया भावः आविष्कर्तुं नैव शक्यते । गद्ये तु कविः स्वमनोनिहितं भावं आविष्कर्तुं स्वेच्छा भवति। पादपूरणार्थं व्यर्थपदानि पद्ये तत्र तत्र भवन्ति। नैषा स्थितिः गद्ये। उभयात्मकं गद्यपद्यरूपं रचनं चम्पूः इत्युच्यते। सत्स्वपि प्रभेदेषु कालिदासादयः महाकवयः पद्यमेव आदृतवन्तः।

गद्यरचनायां श्रवणसुभगता न सुलभसाध्या। तथाकर्तुं कविना महान् प्रयत्नः करणीयः । कृते अपि प्रयत्ने पाठकाः गद्यापेक्षया पद्यकाव्ये एव सहजतया आदरं दर्शयन्ति। अतः पाठकजनाकर्षकं गद्यरचनं साहसम् एव। अत एव 'गद्यं कवीनां निकषं वदन्ति' इति आभाणकं जातम्। बाणभट्ट-सुबन्धु-दण्डिप्रमुखाः गद्यरचनायां स्वसामर्थ्यं निरूपितवन्तः। अशेषां चिरस्मरणीयां च ख्यातिम् आर्जितवन्तः। तदनन्तरकाले तन्मार्गे कानिचन गद्यकाव्यानि समागतानि।

## १.४.कृष्णचरितम् -परिचयः

श्रीकृष्णचरितम् अन्यतमं प्रमुखं च काव्यं भवति। एतत् च आधुनिकम्। तथापि प्राचीनशैल्या एव कथावर्णनं प्रचलति। श्रीमद्-भागवते - हरिवंशे च प्रसिद्धः कृष्णावतारकथाभागः कृष्णचरितस्य प्रतिपाद्यं वस्तु भवति। श्रीमद्-भागवते दशमस्कन्धे भगवान् व्यासःश्रीकृष्णस्य जननम्, बाल्यम्,तस्य विहरणम्, तस्य विनेदनम्, तस्य दुष्टशिक्षणम्, शिष्टरक्षणं ,तेन कृतं धर्मरक्षणं,पृथिव्याः पीडापनोदनं च वर्णितवान्। व्यासवर्णितेन एतेन श्रीकृष्णस्य कथाभागेन आकृष्टः, कृष्णचरितम् इति नाम्ना आधुनिक संस्कृतसरलगद्येन इमं ग्रन्थं रचयति।

## १.५.कृष्णचरितम् -कवेः परिचयः

कृष्णचरितस्य कर्ता श्री.पेरि.वेङ्कटेश्वरशास्त्रिणः। अयं महाशयः आन्ध्रदेशीयः। विशाखपट्टणमण्डल- अन्तर्गतपुरिटिपेण्टग्रामः अस्य जननप्रदेशः अस्ति। युक्ते च वयसि

अध्ययनाय अयं काशीं गच्छति। काशीनाथशास्त्रिणां समीपे व्याकरणशास्त्रं पठति। विजयनगरभूपतीनां प्रेरणाया विजयनगरम् आगच्छति। तत्रैव संस्कृतकलाशालायाम् अध्यापकपदवीम् अलङ्करोति । अयम् आन्ध्रदेशे प्रमुखः व्याकरणपण्डितः। व्याकरण- शास्त्रे परिभाषेन्दुशेखरः इति प्रख्यातग्रन्थः कश्चित् अस्ति। तस्य च कर्ता नागेशभट्टः,अस्य ग्रन्थस्य अयं नागेशगूढार्थदीपिकानाम्नीं व्याख्यां रचयति। पाणिनीयधातुकोशस्य, पाणिनीयानां शब्दानां प्रयोगपरतया कृष्णच- रितम् रचितवान् इति ऊहितुं शक्यते। प्राचीने साहित्ये भट्टिकाव्यस्य यादृशं विशिष्टं स्थानम् अस्ति, तादृशं विशिष्टं स्थानम् आधुनिके कृष्णचरितस्य अपि अस्ति। अयं महाशयः

ए. डि.१९ शतकीयः।

## कृष्णचरितस्य शैली :-

अत्र च दीर्घसमासाः न सन्ति। अलङ्कारसंक्लिष्टता च नास्ति। अत्र च सरला रचनारीतिः आश्रिता। निसर्गमधुरा वैदर्भीरीतिभूषिता च अस्ति। कथाकथने वक्रता वा कुटिलता वा (Suspense) नास्ति। तत्र तत्र भागवतश्लोकान् अपि उद्धृताः सन्ति।

## १.६.पाठ्यांशसङ्ग्रहः (कथावस्तु)

कृष्णचरितस्य विषयविभागः खण्डः इति नाम्ना प्रचलितः अस्ति। कृष्णचरिते- प्रथमखण्डः प्रकृत- पाठ्यभागः भवति। भागवतदशमस्कन्धीया कृष्णस्य गाथा अत्र स्वीकृता। श्रीकृष्णस्य अवतारम् आरभ्य कंसस्य वधपर्यन्तं कथाभागः अत्र पाठ्यभागे (Course) अस्ति । अत्र च अष्टादशोत्तरशततमाः (११८) वाक्यसमुदायाः (para graphs) वर्तन्ते । पाठ्यभागान्तर्गतस्य कृष्णचरितस्य कथाविषयः, अत्र तु विद्यार्थिनां पठनसौकर्याय षट्सु भागेषु उपनिबद्धः। षण्णां भागानां विषयः संङ्ग्रहेण अत्र सूच्यते। अयं च संङ्ग्रहः साकल्येन पाठ्यभागस्य विषयाणाम् अवगमनाय उपकरोति।

## १.६.१.भगवतः श्रीकृष्णस्य अवतरणम् :-

भूदेवी ब्रह्मादिभिः साकं विष्णोः सकाशम् गच्छति । तत्र भूः, राक्षसानां दौष्ट्यं स्वीयाम् असहनशीलतां च, विष्णवे निवेदयति। भुवः भारापनोदनाय विष्णुः सङ्कल्पितः भवति। अत्रान्तरे कंसः विवाहानन्तरं देवकीवसुदेवौ स्वदेशं प्रापयति। कंसश्च सारथिः भूत्वा नयति। मार्गमध्ये अशरीरिणी वाक् कंसं तर्जयति। कंसः च आगामिप्रमादवारणाय देवकीं हन्तुं खड्गम् उद्धरति। सन्ततेः समर्पणाय प्रतिज्ञां कृत्वा, वसुदेवः देवकीं त्यक्तुं कंसं प्रार्थयति। कंसः देवकीवसुदेवयोः कारागारवासं विदधाति। देवक्याः सप्तमः गर्भः रोहण्यां वर्धते। देवकी अष्टमं गर्भं धरति। श्रीकृष्णः अवतरति । वसुदेवः आनन्दम् आप्नोति । भगवतः आदेशेन

वसुदेवः शिशुं नन्दगृहं प्रापयति। नन्दगृहात् स्त्रीशिशुम् आनयति। कंसाय समर्पयति। स्त्रीशिशुः अपि योगमाया भूत्वा कंसं तर्जयति। एवम् अत्र श्रीकृष्णावतारस्य नेपथ्यम्,श्रीकृष्णस्य जननं च अभिवर्णितम् ।

### १.६.२.शिशोः मारणाय कंसस्य दुष्कृत्यानि :-

कंसः योगमायायाः वचनं शृणोति। अतीव आन्दोलितः भवति। भीतः भवति। यथाकथंचित् जातं तं हन्तुम् निश्चिनोति। तदर्थम् एव कंसः साधूनाम्,शिशूनां च हिंसने दैत्यान् नियोजयति। तत्र नन्दश्च सानन्दं पुत्रोत्सवं निर्वहति। नन्दः करस्य(ट्क्ष्)समर्पणव्याजेन वसुदेवं मिलति। वसुदेवः च गोकुले उत्पातानां सम्भवं सूचयति। शिशुश्च बालारिष्टान् अधिगच्छति। पूतनां पीडयति। शकटासुरं भञ्जयति। तृणावर्तं हन्ति। एते च विशेषाः,कंसस्य क्रूरताम्, भगवतः शिशोः श्रीकृष्णस्य दिव्यत्वम्,महिमातिशयं च पाठकानां, ख्यापयन्ति।

### १.६.३.राम-कृष्णयोः बाल्यम् :-

कदाचित् गर्गः समागच्छति। राम-कृष्णयोः नामकरणम् आचरति। राम-कृष्णयोः बाल्यं दिव्यं कथयति। श्रीकृष्णस्य बालचेष्टितानि वर्णितानि भवन्ति। तानि सर्वाण्यपि विस्मयजनकानि एव भवन्ति। गोपाङ्गनाःविस्मयं गच्छन्ति। यशोदा आश्चर्यम् अनुभवति। नन्दयशोदयोः पूर्वजन्मवृत्तान्तवर्णनं अत्र लभ्यते । श्रीकृष्णः नलकूबर-मणिग्रीवकौ फलविक्रयिणीं च अनुगृह्णाति। एते च विषयाः श्रीकृष्णस्य दिव्यत्वं प्रबोधयन्ति। दिव्यम् अनुभूतिं च जनयन्ति।

### १.६.४.बृन्दावने राम-कृष्णयोः विहरणम् :-

नन्दादयः उत्पातेभ्यः भयं विशङ्क्य बृन्दावनं प्राप्तुम् इच्छन्ति । बृन्दावनगमनाय सन्नाहं च कुर्वन्ति । तत्र राम-कृष्णौ गवां वत्सानां च पालकौ भवतः । श्रीकृष्णः दैत्यं संहरति । श्रीकृष्णः गुणैः नारायणसमः इति कीर्त्यते । गोपालकैः सह क्रीडति । लीलार्भकः भगवान् (श्रीकृष्णः) पदे पदे स्वस्य महत्त्वम् प्रकटयति। बलरामः श्रीकृष्णस्य महत्त्वं जानाति । ब्रह्मणः गर्वम् अपनुदति । धेनुकासुरं संहरति। कालियं मर्दयति।दवाग्निं पिबति । बलरामः प्रलम्बासुरं हन्ति। गाः गोपालकान् च च रक्षति। बृन्दावने प्रावृट्श्रीः दर्शनीया भवति, इति एते अंशाः कथ्यन्ते। एते च अंशाः कौमारावस्थायां श्रीकृष्णस्य दिव्यत्वं ज्ञातुं प्रभवन्ति।

### १.६.५.गोपाङ्गनाभिः सह श्रीकृष्णः :-

बृन्दावने शरदः शोभा नेत्रानन्दं जनयति । श्रीकृष्णस्य वेणुगानं मनः हरति । श्रीकृष्णः गोपाङ्गनाभिः सह विहरति, नन्दव्रजकुमारिकाः कात्यायन्याः व्रतम् आचरन्ति। गोपिकानां वस्त्राणि अपहरति । विप्रदारान् श्रीकृष्णः अनुगृह्णाति । इन्द्रस्य गर्वम् अपहरति । गोवर्धनपर्वतम्

उद्धरति । व्रजौकसां वरुणलोकं दर्शयति। गोपाङ्गनाभिः सह श्रीकृष्णः नृत्यति । गोपाङ्गनाः उन्मादिन्यः भवन्ति । गोपाङ्गनानां सौन्दर्यदर्पः, गोपाङ्ग- नानां विलपनम् , व्रजसुन्दरीणां विदेहकैवल्यप्रदानम् इति एते अंशाः सुलभशैल्या उपनिबद्धाः सन्ति। एते च गोपाङ्गनानां तदेकभक्तिपारवश्यचित्तता ज्ञापयन्ति।

**१.६.६.कंसस्य वधः :-**

अत्र विद्याधरस्य शापमोचनम् , शङ्खचूडस्य निहननम् , वृषभासुरस्य संहरणम् ,राम-कृष्णयोः निहननाय कंसस्य उद्यमनम्, अक्रूरसहायस्य अभ्यर्थनम्, केशिनः निहनन् , अक्रूरस्य श्रीकृष्णातिथ्यम् , मथुरापुरी-गमनाय प्रस्थानम् , सुदाम्नः अनुग्रहणम्, कुब्जायाः अनुग्रहणम् , धनुषः भञ्जनम् च , मल्लयुद्ध- विशारदानां मल्लरङ्गं प्रवेशनम् , हस्तिनः हस्तिपकानां च हननम् , राम-कृष्णयोः नारायण-अंश-सम्भूतत्वम् , श्रीकृष्ण-चाणूरयोः वादः, कंस-चाणूराभ्यां बलराम-कृष्णयोः च मल्लयुद्धः,चाणूर-मुष्टिकयोः हननम्, कंसस्य क्रोधनम्,कंसस्य वधः, माता-पितरौ उद्दिश्य राम-कृष्णयोः उपसर्पणम्, व्रजं प्रति नन्दस्य गमनम्, राम-कृष्णयोः अन्तेवासित्वम् -गुरुदक्षिणा च इति एते अंशाः वर्णिताः।

काव्यरचनायाः उद्देशं कविनैव आदौ एवम् उपवर्णितम्। सुखबोधाय बालानां जिज्ञासूनां सचेतसाम्। यथाग्रन्थं वर्णयते गौतमो वेङ्कटेश्वरः। भागवतकथाजिज्ञासवः अत्र बालाः। तेषां सुखबोधाय इदम् उपकरोति। कृष्णस्य बाल्यविचेष्टितानि अनुभूतिं ददति। मनस्सु पूततां पूरयन्ति। विस्मयं जनयन्ति। दिव्यसंस्कारं प्रापयन्ति।

**१.७.उपसंहारः**

एवम् अत्र संस्कृतसाहित्यस्य परिचयः, तत्र गद्यकाव्यवैशिष्ट्यम्, तत्रापि आधुनिकगद्यकाव्यस्य परिचयः कृष्णचरितस्य परिचयः, कृष्णचरितस्य रचयितुः परिचयः,कृष्णचरितस्य शैली ,कथावस्तुनः सङ्क्षेपपरिचयः इति एवम् आदिविषयाः अत्र पाठ्यांशे वर्णिताः। एते च कृष्णचरितस्य, तत् रचयितुश्च परिचयं प्राप्तुम् उपकुर्वन्ति।

**१.८.अभ्यासः**

अ).संस्कृतगद्यसाहित्ये कृष्णचरितस्य वैशिष्ट्यं निरूपयत ?

इ). कृष्णचरितप्रथमखण्डस्य कथां सङ्क्षेपेण लिखत ?

# UNIT-II
# भगवतः श्रीकृष्णस्य अवतरणम्

## संरचना

२.१.परिचयः
२.२.लक्ष्याणि
२.३.ग्रन्थप्रारम्भः
२.३.१.रचयितुः प्रार्थनम्
२.३.२.ग्रन्थोद्देशस्य प्रकटनम्
२.४.भगवतः श्रीकृष्णस्य अवतरणम्
२.४.१.भुवः भारापनोदनाय, भगवतः उद्यमनम्
२.४.२.देवकी-वसुदेवयोः विवाहानन्तरप्रस्थानम्
२.४.३.आकाशवाणी – देवक्याः एव हननाय कंसस्य खड्गोद्धरणम्
२.४.४.कंसाय सन्ततेः समर्पणम् , कंसस्य प्रत्यर्पणम्
२.४.५.नारदस्य उत्प्रेरणम् – कंसस्य औद्धत्यम्
२.४.६.देवक्याः सप्तमः गर्भः
२.४.७.देवक्याः अष्टमः गर्भः
२.४.८.श्रीकृष्णस्य अवतरणम्
२.४.८.१.श्रीकृष्णस्य जननम् – वसुदेवस्य आनन्दः
२.४.९.देवकी-वसुदेवयोः अभ्यर्थनम्
२.४.१०.देवकी-वसुदेवयोः पूर्ववृत्तान्तम्
२.४.११.शिशोः नन्दगृहप्रापणम्
२.४.१२.स्त्रीशिशोः अपि निर्दयया शिलापृष्टे क्षेपणम्
२.४.१३.योगमायायाः तर्जनम् – देवकीवसुदेवयोः मोचनम्
२.५.उपसंहारः
२.६.अभ्यासः

## २.१.परिचयः

अयं पाठ्यांशः कृष्णचरितस्य प्रथमखण्डे १-१३ (para graph) पर्यन्तं प्रचलति।प्रथमे पाठ्यांशे (UNIT-I) गद्यवाङ्मये श्रीकृष्णचरितस्य, तत्-कर्तुश्च सामान्यः परिचयः दत्तः

अस्ति। ' मत्स्यः कूर्मः वराहश्च नारसिंहश्च वामनः, रामः (परशुरामः) रामश्च (श्रीरामः) रामश्च (बलरामः) बुद्धः कलिकिः एव च ' इति पद्यं श्रीमहाविष्णोः दश अवतारान् नामतः निर्दिशति। तत्र च नवमः श्रीकृष्णस्य अवतारः। सः अवतारः च द्वापरयुगे सम्भवति। तस्य अवतरणनेपथ्यम्, आकाशवाण्या देवकी–वसुदेवयोः अष्टमगर्भत्वेन भगवतः अवतरणस्य सूचनम्, कंसस्य तर्जनम्,देवकी–वसुदेवौ उद्दिश्य कृतं कंसस्य औद्धत्यम्, भगवतः अवतरणम्,देवकी–वसुदेवयोः दैन्यम्, भगवतः धैर्यकथनम् , नन्दगृहप्रापणाय आदेशनम् , तत्र च प्रवृत्ताः बालारिष्टाः, तत्र भगवता कृतं दुष्टानां दमनं इत्येते विषयाः अत्र वर्णिताः सन्ति । श्रीकृष्ण–अवतारविशेषाः आधुनिकसंस्कृतगद्यमाध्यमेन अत्र प्रस्तुताः।

## २.२.लक्ष्याणि

'यदा यदा हि धर्मस्य ग्लानिः भवति भारत!। अभ्युत्थानम् अधर्मस्य तदा आत्मानम् सृजामि अहम्।।' 'परित्राणाय साधूनाम्,विनाशाय च दुष्कृताम्। धर्मसंस्थापनार्थाय सम्भवामि युगे यगे।।'विश्वं हि सृष्टि–स्थिति–लयात्मकम्। तत्र स्थितिः नाम लोकव्यवस्थानिर्वहणम्। स्थितिप्रक्रियायाः विष्णुः अधिपतिः। लोकव्यवस्थानिर्वहणाय धर्मस्य पालनम् आवश्यकम्। तस्य धर्मस्य यस्मिन् समये हानिः सम्भवति, तस्मिन् समये, धर्मस्य हानिम् अपनुद्य, धर्मस्य उद्धरणाय, धर्मस्य विस्तरराय च,भगवान् आत्मानं सृजति। भगवतः एतत् आत्मसृजनम् एव'अवतारः'भवति। दुष्टशिक्षणम्–शिष्टरक्षणम्–धर्मसंस्थापनं च अवतारस्य मुख्यानि उद्देश्यानि भवन्ति । अस्मिन् पाठ्यांशे 'श्रीकृष्ण–अवतरणस्य नेपथ्यम्, द्वापरयुगे धर्मस्य हानिः कथं जाता ? कथम् अधर्मस्य निखननं कृतम् ? श्रीकृष्णेन कृतं दुष्टशिक्षणं कीदृशम् ? शिष्टरक्षणे–धर्मसंस्थापने च अनेन आचरिताः विशेषाः के ? इति एवमादिविषयाः अत्र पाठ्यांशे वर्णिताः सन्ति। एतत् पाठ्यांशस्य अध्ययनेन–––

- आधुनिकसंस्कृतगद्यं प्रति परिचितः भवति।
- संस्कृतगद्यस्य माध्यमेन पौराणिककथानां परिचितः भवति।
- भाषायाःश्रवण–पठन–भाषण–लेखनेषुउवाक्यरचनासु निपुणः भवति।
- भुवः वेदनावृत्तान्तम् अवगन्तुं समर्थः प्रभवति।
- आकाशवाण्याः भाषितं पठितुं पारयति।
- रोहिण्याः गर्भे बलरामस्य जननविधानं लिखितुं कुशलः भवति।
- भगवता निवेदितं देवकी–वसुदेवयोः पूर्ववृत्तान्तं जानाति।
- योगमायायाः वृत्तान्तं प्रति परिचितः भवति।

## २.३.ग्रन्थस्य प्रारम्भः

२.३.१.रचयितुः प्रार्थनम्

**(मूलम्)** १.करारविन्देन पदारविन्दम्, मुखारविन्दे विनिवेशयन्तम् ।
वटस्य पत्रस्य पुटे शयानम्, बालं मुकुन्दं मनसा स्मरामि ।।
२.न्यग्रोधस्य तरोः मूलम्, अध्यासीनं जगद्गुरुम्।
भावये दक्षिणामूर्तिम्, भवसागरतारकम् ।।

**(विवरणम्)** अत्र प्रथमपद्ये ग्रन्थरचयिता,अन्तरायान् अधिगत्य ग्रन्थसमाप्तिं साधयितुम् इष्टं दैवं बालकृष्णं प्रार्थयति। तथा हि – बालकृष्णस्य करः कमलकोमलः विद्यते। पदं पद्मप्रकाशं वहति। मुखं अरविन्देन सुन्दरं शोभते। अत्र पद्ये मुकुन्दः इत्यत्र मुकुः नाम मोक्षः इत्यर्थः, तं ददाति इति मुकुन्दः, मोक्षप्रदाता इत्यर्थः। तथा च यः, पद्मसन्निभं पदं,कमलकोमलेन करेण , मुखारविन्दे निक्षिपन्, वटवृक्षस्य पर्णेशयानः विद्यते, तादृशं मोक्षप्रदातारं बालकृष्णम् हृदयपूर्वकं नमस्करोमि, इति एवं रचयिता बालकृष्णं स्मृत्वा ग्रन्थं प्रारभते।

द्वितीयपद्ये ग्रन्थरचयिता, मेधासम्पत्त्यै दक्षिणामूर्तिं प्रार्थयति। दक्षिणामूर्तिः भक्तान् संसारसागरात् समुद्धरति। अयं जगतः गुरुः भवति। जगतः = लोकस्य =जनानाम् अज्ञानान्धकारम् अपनुदति। वटवृक्षस्य मूले पद्मासने उपविशति। तथा च वटवृक्षस्य मूले पद्मासने उपविशन्, निखिलजगताम् अज्ञानान्धकारम् अपनुद्य, संसारसागरात् भक्तान् समुद्धरन्तं दक्षिणामूर्तिं मनसि पुनः पुनः चिन्तयामि, इति रचयिता परमेश्वरं प्रार्थयति।

### २.३.२.ग्रन्थोद्देशस्य प्रकटनम् :-

**(मूलम्)** ३.परित्राणाय साधूनाम्, दुष्टानां दमनाय च ।
द्वापरान्ते यदुकले,अवतीर्णं भुवि केशवम् ।।
४.प्रणम्य शिरसा कृष्णम्, तस्य बाल्यविचेष्टितम् ।
पावनं विस्मयकरम्, भवबन्धविमोचनम् ।।
५.सुखबोधाय बालानाम्, जिज्ञासूनां सचेतसाम् ।
यथाग्रन्थं वर्णयते, गौतमो वेङ्कटेश्वरः।।

**(विवरणम्)** साधवः नाम शिष्टाः, येषां दयादाक्षिण्यादिगुणाः विद्यन्ते तादृशाः सद्गुणसम्पन्नाः । परित्राणं नाम रक्षणम्। दुष्टाः क्रूरस्वभाविनः, येषां काम, क्रोध, लोभ, मोह, मद, मात्सर्याणि भवन्ति, दम्भम्, दर्पम्, दुरहङ्कारं च वहन्ति, तादृशाः दुर्गुणविशिष्टाः दुर्जनाः। दमनं नाम शिक्षणम्। युगाश्च कृत–त्रेत–द्वापर– कलि इति नाम्ना चत्वारः सन्ति। द्वापरः तेषु तृतीयः। केशवः नाम विष्णुः। तथा च दुष्टान् शिक्षितुम् ,शिष्टान् रक्षितुं च भूलोके,

द्वापरयुगस्य अन्ते, यदूनां वंशे श्रीकृष्णरूपेण विष्णुः अवतीर्णः अस्ति। तादृशं श्रीकृष्णम् अहं शिरसा प्रणमामि इति तृतीयपद्यस्य भावः।

दुष्टशिक्षणाय, शिष्टरक्षणाय यदूनां वंशे अवतीर्णस्य श्रीकृष्णस्य बाल्यचरितं परमपावनं भवति। पाठकानां मनस्सु दिव्यानुभूतिं जनयति। स्मयः नाम अहंकारः। तम् अहंकारम्, विशेषेण गमयति। पठकानां मनस्सु दुरहंकारम् अपसारयति। पाठकान् संसारसागरात् तारयति । संसारबन्धात् मोचयति। मनसः निस्सङ्ग अभ्यासयति। संसारदुःखम् अपाकरोति। एवं श्रीकृष्णस्य बाल्यं महिमोपेतं प्रभावपूर्णं च अस्ति।

पञ्चमे पद्ये जिज्ञासवः नाम ज्ञातुम् इच्छवः, येषां ज्ञातुम् आसक्तिः अस्ति तादृशाः श्रद्धावन्तः। सचेतसः नाम समीचीनं = अनुकूलदृक्पथम्, चेतः=मनः येषाम् अस्ति, ते अनुकूलबुद्धयः सहृदयाः ,विश्वासशालिनः। सुखबोधः नाम सुलभतया अवगमनम्। तथा च श्रद्धावतां विश्वासशालिनां बालानां सुलभतया अवगमनाय गौतमसगोत्रीकः अहं वेङ्कटेश्वरः, महिमोपेतं प्रभावपूर्णं च श्रीकृष्णस्य चरितम् ,श्रीमद् भागवते यथा अस्ति तथा, वर्णयामि इति रचयिता ग्रन्थस्य उद्देश्यं कथयति।

## २.४.भगवतः श्रीकृष्णस्य अवतरणम्

२.४.१.भुवः भारापनोदनाय भगवतः उद्यमनम् :-

**(मूलम्)** १. पुरा द्वापरान्ते असुरांशसम्भूतैः अधार्मिकैः कंस-साल्व-शिशुपाल-जरासन्ध-प्रभृतिभिः असंख्याकैः दृप्तक्षत्रियैः सर्वतः समाक्रान्ता मैदिनी, अधर्मभारम् असहमाना साश्रुमुखी ब्रह्माणं शरणं प्रपेदे । सः तु तदीय- वचनम् आकर्ण्य तथा देवैः त्रिनयनेन सह क्षीरोदधेः तीरम् आसाद्य समाहितः वासुदेवं पुरुषसूक्तेन उपतस्थे। तदा तेन गगने अशरीरिणी वाक् अश्रूयत । तदाकलय्य भगवान् पितामहः देवान् इदम् अवोचत् - 'हे देवाः ! प्राक् एव अयम् अर्थः पुरुषोत्तमेन अवगतः। भूभारहरणाय स भगवान् वसुदेवगृहे अवतरिष्यति। वासुदेवांशभूतः अनन्तः तस्य अग्रजः भविष्यति। भगवती विष्णुमाया अपि तदादेशेन कार्यार्थम् अंशेन जनिष्यति। भवद्भिः सस्त्रीकैः तत्साहाय्यार्थं यदुषु उत्पत्तव्यम् ' इति आदिश्य देवान् भुवं च आश्वास्य स्वधाम परमं ययौ।

**(विवरणम्)** द्वापरयुगस्य अन्ते कंस-साल्व-शिशुपाल-जरासन्धादयः बहवः राज्यपालाःसञ्जाताः। ते च सर्वे अधर्मवर्तनाः। दुरहंकारिणः, मदान्धाः, राक्षयांशसम्भूताश्च। ते च राज्यं पालयन् भुवं बहुधा पीडयन्ति। तां पीडां सोढुं भूमिः अशक्ता भवति। स्वीयां पीडाम्,स्वीयाम् अशक्ततां च निवेदयितुं भूमिः ब्रह्माणम् उपसर्पति।भुवः वेदनां ब्रह्मा शृणोति। आन्दोलितः भवति। अनुपदम् एव ब्रह्मा परमेश्वरेण, इतरदेवैश्च साकं क्षीरसागरतीरे समा -

वेशम् आरचयति। तत्र ते सर्वे विष्णुं स्तुवन्ति। भुवः पीडापनोदनाय विष्णुं प्रार्थयन्ति। भुवः, ब्रह्मणः, भूतेशस्य च प्रार्थनाम् अवगतः श्रीमहाविष्णुः तदैव आकाशवाण्या अभयं प्रसारयति । तां च आकाशवाणीं ब्रह्मा जानाति। ताम् एताम् आकाशवाणीं ब्रह्मा अनुयायिनां देवानाम् – हे देवाः, भुवः पीडा,भुवः भारः च विष्णुना प्रागेव अवगतः किल। भूभारहरणाय भगवान् वसुदेवगृहे अवतर्तुं संकल्पितः अस्ति। आदिशेषः तस्य अग्रजत्वेन भविष्यति। विष्णुमाया अपि एतन्निमित्तं भुवि अवतरिष्यति । देवैः भवद्भिः अपि सस्त्रीकैः तत्साहाय्यार्थं यदुषु उत्पत्तुं सिद्धैः भाव्यम् ' इति विज्ञापयति। देवान् समाश्वसिति। भुवं च सान्त्वयति। ततः ब्रह्मा स्वनिवासं गच्छति।

| स्वावलोकनप्रश्नाः |
|---|
| १.मेदिनी का ? सा कं शरणं प्रपेदे ? |
| २.त्रिनयनः कः ? पितामहश्च कः ? |
| ३.भगवान् कुत्र अवतरति ? |

## २.४.२.देवकी-वसुदेवयोः विवाहानन्तरप्रस्थानम् :-

**(मूलम्)** २. पुरा शूरसेनो नाम यदुपतिः माथुरान् शूरसेनान् देशान् पर्यपालयत्। अतः सर्व-यादव-भूभुजां मधुरा राजधानी आसीत्। कदाचित् तस्यां वसुदेवः उग्रसेनाग्रजस्य देवकस्य सुतां देवकीं परिणीय,नवोढया तया सह स्वभवनं गन्तु रथम् आरुरोह। उग्रसेनसुतः कंसः स्वभगिनीप्रीत्या रथारूढः सारथ्यम् अकरोत्। देवकःअपि स्वदुहितुः बहुविधं हस्ति-अश्व-आदिरूपं परिबर्हम् अदात् । प्रयाणोपक्रमे च शङ्ख-भेरी-मृदङ्गादिः मङ्गलवाद्य -घोषः प्रवृद्धम् आसीत् ।

**(विवरणम्)** देवकी-वसुदेवयोः विवाहानन्तरं पतिगृहप्रस्थानं वर्णयति अयं वाक्यसमुदायः । शूरसेनः कश्चन यादवराजः। सः मधुराप्रान्तस्य शूरसेनाप्रान्तस्य च पालकः। मधुरा तस्य राजथानी। वसुदेवः मधुरानगरवासी। उग्रसेनस्य अग्रजः देवकः। तस्य पुत्री देवकी। कदाचित् मधुरानिवासिनः वसुदेवस्य देवक्या सह विवाहः प्रचलति। अनन्तरं नूतनौ वधूवरौ मधुरां गन्तुम् उद्युक्तौ। उग्रसेनस्य सुतः कंसः। कंसस्य भगिन्यां प्रीतिः अधिका। अतः नूतनवधू-वरयोः स्वभगिनी-भावुकयोः स्वयं रथचोदकः भवेयम् इति कंसस्य इच्छा। तस्मात् भगिनी-भावुकौ आरोपयित्वा, कंसः स्वयं रथस्य सारथ्यं निर्वहति। देवकः अपि बहुविधानि उपयानानि (GIFTS/ PRESENTATIONS) ददाति। मङ्गलप्रदः मृदङ्गादिवाद्यघोषः प्रवृद्धः भवति। तदा

तयोः प्रस्थानं च प्रचलति।

| |
|---|
| स्वावलोकनप्रश्नाः |
| १.माधुराणां शूरसेनानां च पालकः कः ? |
| २.उग्रसेनाग्रजः कः ?तस्य सुता का ? |
| ३.स्वभगिनीप्रीत्या रथारूढः सारथ्यम् अकरोत्। अत्र 'स्व'शब्दःकं सम्बन्धयति? |

!

## २.४.३.आकाशवाणी - देवक्याः एव हननाय कंसस्य खड्गोद्धरणम् :-

**(मूलम्)** ३.एवं गच्छत्सु तेषु,मध्येपथे गृहीतप्रग्रहं कंसम् आहूय,अशरीरिणी वाक् - 'रे अबुध ! यां त्वं नयसि तस्याः अष्टमः गर्भःत्वां हनिष्यति'इति आह। अहो! किमिति विचारयन् आगामिनः अपायात् आत्मानं गोपयितुं सद्यः एव एतत् जिघांसया धृतासिः तां कचग्राहं समाचकर्ष।तेन च व्यतिकरेण निर्भरशोकविधुरः वसुदेवः किंकर्तव्यता विमूढः तं तस्मात् व्यवसायात् निवर्तयितुं सः सान्त्ववचनैः धर्मोपदेशैः तत्वोपदेशैः च बहुधा प्रायतिष्ट। अथापि अनिवृत्त व्यवसायं तं समीक्ष्य कथञ्चित् अपि तात्कालिकात् अपायात् एनां विमोचयितुं दूयमानमानसःअपि विकसितमुखाम्भोजः प्रहसन् इव 'महाभाग! अपत्यात् खलु अस्याः भवतः विपत्तिः अशरीरवाचा समुदाहृता। एषा खलु दीना अबला नवोढा तव भगिनी। कुतः खलु एनां हन्तुम् उद्युङ्क्षे। अस्यां जातं जातम् अपत्यम् अवश्यं ते प्रदास्यामि' इति अवोचत्। सोपपत्तिकं तद्वचनं निशम्य तद्-वाक्य-प्रत्ययेन, बलवत्तया च भवितव्यतायाः, अनुल्लङ्घ्यतया च भगवत् आदेशस्य, स्वसुः वधव्यवसायात् सः निववृते। वसुदेवः अपि मृत्युमुखात् निवर्त्य देवकीम्, तया सह स्वभवनं प्राविशत्।

**(विवरणम्)**देवकी-वसुदेवयोः विवाहानन्तरं पतिगृहप्रस्थानसमये, आकाशवाणी किं वदति ?,तद्वचसः कंसः कथं स्पन्दते ? इत्यंशद्वयं वर्णयति अयं वाक्यसमुदायः(PARA GRAPH)।

देवकी-वसुदेवयोः विवाहः प्रचलति। तयोः प्रस्थानं प्रवर्तते। कंसः प्रग्रहाणि गृह्णाति। रथं चोदयति। सर्वे किञ्चित् दूरं प्रयान्ति च। अत्रान्तरे, अशरीरिणी वाक्उ आकाशवाणी कंसम् आह्वयति। 'रे मूर्ख ! अस्याः तव भगिन्याः देवक्याः अष्टमः सन्तानः त्वां वधिष्यति' इति तर्जयति । तत् श्रुत्वा कंसः कम्पितः भवति। असहनम् एति। विवेकात् अपैति। आगामिनः अपायात् आत्मानं रक्षितुम् चिन्तयति। अनुपदम् एव खड्गं धरति। भगिन्याः देवक्याः केशराशिं गृह्णाति। शिरः छेत्तुं रथात् बलात् देवकीम् आकर्षति च। तदा वसुदेवः भृशं खिन्नः भवति।

कंसस्य कर्मणः किमपि प्रतिकर्तुं न समर्थः भवति। तथापि सान्त्ववचनैः देवक्याः शिरश्छेदनप्रयत्नात् निवर्तयितुं बहु प्रयत्नं करोति। दैन्येन प्रार्थयति । अन्ततः देवक्यां जातं जातम् अपत्यम् अवश्यं कंसाय समर्पयितुं वसुदेवः वाक् ददाति । एवं विधिवशात् कंसः वसुदेवस्य वचसि विश्वासं प्राप्नोति। देवक्याः वधप्रयत्नात् विरतः भवति। देवकी वसुदेवौ च अन्ततः मृत्युं प्रतियुध्य निजगृहं प्रविशतः।

स्वावलोकनप्रश्नाः

१.'अस्यां जातं जातम् अपत्यम् अवश्यं ते प्रदास्यामि,'इदं कं प्रति कस्य वचनम् ?

२.'सोपपत्तिकं...निशम्य,'तद्-वाक्य-प्रत्ययेन इत्यत्र 'तद्' शब्दः कं परमृशति ?

३.एषा खलु दीना अबला नवोढा तव भगिनी। अत्र 'तव' शब्दः कं सम्बन्धयति ?

## २.४.४.कंसाय सन्ततेः समर्पणम् - कंसस्य प्रत्यर्पणम्

**(मूलम्)**४. अथ समुपस्थिते प्रसूतिकाले देवकी ज्येष्ठं पुत्रम् असूत। वसुदेवः अपि अनृतात् भीतः अतिविह्वलः कृच्छ्रेण जातमात्रं तं कंसाय अर्पयामास। कंसः अपि अशरीर-वाक्प्रत्ययात् अस्मात् आत्मनः भयम् अविशङ्कमानः, सत्ये व्यवस्थितं वसुदेवं प्रति तुष्टमनाः,प्रहसन् इदम् अवोचत्-'युवयोः अष्टमात् खलु गर्भात् मे मृत्युः अभिहितः अशरीरवाचा। न हि अस्मात् मे भयम् अस्ति । अतः कुमारः अयं प्रतियातु'इति। तत् श्रुत्वा आनकदुन्दुभिः अपि सन्तुष्टान्तरङ्गः सुतम् आदाय स्वभवनम् अयासीत्।

**(विवरणम्)** वसुदेवः सन्ततिं समर्पयति। अस्वीकृत्य कंसः प्रत्यर्पयति इति अंशद्वयं वर्णयति अयं वाक्यसमुदायः (PARA GRAPH)।देवकी च गर्भं धरति। प्रसवकालं च प्राप्नोति। पुम् अपत्यं आप्नोति। वसुदेवः सत्यवचनः। असत्यात् बिभेति। कालयापनाय च विह्वलः भवति। अतः कालम् अयापयित्वा, कंसाय दत्तं वचः मनसि धृत्वा वसुदेवः जातम् अपत्यं कंसाय समर्पयति। कंसः आकाशवाण्याः वचसि विश्वस्तः भवति। तस्मात् प्रथमसन्तानात् भयं नैव शङ्कते। प्रत्युत सत्यवचसं वसुदेवं प्रशंसति। अष्टमात् सन्तानात् एव मृत्युभयं संस्मरति। प्रथमात् तु भयम् नास्ति इति वदति। समर्पितं सन्ततिं पुनः वसुदेवाय एव यच्छति। आनकदुन्दुभिः

= वसुदेवः,अपि कंसस्य औदार्येण सन्तुष्टः भवति। सुतं स्वीकृत्य स्वगृहं गच्छति।

स्वावलोकनप्रश्नाः

१.'न हि अस्मात् मे भयम् अस्ति ' इदं कं प्रति कस्य वचनम् ?

२.'नहि अस्मात् मे भयम् अस्ति 'अत्र 'अस्मात्' कस्मात् ?

३'युवयोः अष्टमात् खलु गर्भात् मे मृत्युः अभिहितः' अत्र 'युवयोः' कयोः ?

४. आनकदुन्दुभिः कः ?

## २.४.५.नारदस्य प्रोत्साहनम् - कंसस्य औद्धत्यम्

**(मूलम्)** ५.ततः कंसस्य इयं शान्तिः देवकार्य-अनुगुणा न भवति इति आकलय्य,कालत्रयवेदी भगवान् नारदः समागत्य वसुदेवाद्याः वृष्णयः,देवक्याद्याः यदुस्त्रियः , नन्दाद्याः गोपाः,तत्स्त्रियश्च देवताप्रायाः । ये च त्वाम् अनुवर्तन्ते ज्ञातयः बान्धवाः सुहृदश्च ते सर्वे असुराः ' इति च अप्रस्तुतं कंसाय न्यवेदयत्। किञ्च तं प्राक् विष्णुना हतं कालनेमिं महासुरं च अभिधाय असुरसंहारेण भूमेः भार-अपनुत्तये महाविष्णुः अंशतः देवक्याम् अवतरिष्यति इति च उक्त्वा निरगात्। निर्गते तस्मिन्, सः देवकीं वसुदेवं च निगलैः निगृह्य स्वभवने, तयोः जातं जातं पुत्रम् अहन्। स्वपितरम् उग्रसेनम् अपि निगृह्य स्वयं सिंहासनाधिष्ठितः शूरसेनान् बुभुजे।

**(विवरणम्)** नारदः कथं कंसं प्रेरयति, तस्य कंसः कथं स्पन्दते इत्यंशद्वयं वर्णयति अयं वाक्यसमुदायः (PARA GRAPH)। नारदः त्रिकालज्ञः,भूत-भविष्यत्-वर्तमानेषु किं प्रवर्तते इति अयं सम्यक् जानाति। प्रकृते-कंसः आकाश वाण्याः वचः विश्वस्य कामपि हानिम् अकृत्वा, अष्टमगर्भपर्यन्तं निरीक्षते। समर्पितं, पूर्वं जातं जातं सन्तानं च वसुदेवाय प्रत्यर्पयति च। तादृशं शान्तियुतं कंसस्य निरीक्षणं तस्य पापपरिपाकाय अलं न भवति। अतः नारदः कंसं प्रेरयति। तथा तेन पापं कारयति। पापपरिपाकाय कंसं सिद्धं करोति च। कदाचित् नारदः कंसस्य समीपं गच्छति। वसुदेवं,तदीयं परिवारं देवगणं इति स्तौति । कंसम्, तदीयपरिवारं च असुरगणम् इति निन्दति । किञ्च कंसं, प्राक् विष्णुना हतं कालनेमिं कथयति। असुराणां संहारणाय श्रीमहाविष्णुः देवक्याम् जनिष्यति,इति निवेदयति । अनन्तरं नारदः गच्छति । नारदस्य कथनेन कंसः क्रुद्धो भवति । अनुपदम् एव देवकी- वसुदेवौ बध्नाति । तावत् जातम्

अपत्यम् असिना कृन्तति। पितरम् उग्रसेनं निर्बध्नाति। स्वयं सिंहासनम् अधिष्ठिति। शूरसेनान् पालयति ।

स्वावलोकनप्रश्नाः

१.कालत्रयवेदी भगवान् कः ?

२. देवताप्रायाः जनाः के ?

३'ये च त्वाम् अनुवर्तन्ते...ते सर्वे' अत्र 'त्वाम् ' पदं कं परामृशति ?

४.'ते सर्वे' अत्र 'ते' पदं कं परामृशति ?

५. कालनेमिमहासुरः कः ?

**२.४.६.देवक्याः सप्तमः गर्भः :-**

**(मूलम् )** ६.प्रलम्बक-चाणूर-मुष्टिकादिभिः अन्यैश्च असुर-भूपालैः सह यदून् हिनस्ति स्म। तेन उपद्रुताः यादवाः कुरु-पाञ्चाल-देशान् विविशुः। वसुदेवपत्नी च रोहिणी कंसभयेन व्रजे नन्दगृहे सह यशोदया अवसत्। अन्याः अपि यदुस्त्रियः अलक्ष्यस्थानेषु आसन्। अथ षट्सु सुतेषु देवक्या औग्रसेनिना हतेषु, सा सप्तमं गर्भम् अधात्। विदित-कंस-भयेन च, भगवता माधवेन समादिष्टा, योगमाया तत्-आदेशानुसारेण तदीयं शेषाख्यं धाम देवक्याः जठरात् सन्निकृष्य रोहिणीजठरे न्यक्षिपत्। शौराश्च देवक्याः गर्भः विस्रंसितः इति विचुक्रुशुः।

**(विवरणम्)** देवक्याः सप्तमगर्भस्य वैशिष्ट्यं वर्णयति अयं (PARA GRAPH) वाक्यसमुदायः। प्रलम्बक-चाणूर-मुष्टिकादयः दुष्टाः राजानः। कंसः एतैः सह मिलित्वा,यादवान् अनेकधा पीडयति। यादवाश्च तां पीडां आदौ भरन्ति,अन्ततः ते सोढुम् अशक्ताः भवन्ति। कुरुदेशान् पाञ्चालदेशान् च प्रविशन्ति। तदानीं राज्ञां बहुभार्यात्वं राज्याङ्गसम्मतम् एव अस्ति। रोहिणी वसुदेवस्य द्वितीया भार्या। सा कंसस्य औद्धत्यानि न सहते। परं भयेन विह्वला अपि भवति। भद्रतां काङ्क्षति। नन्दगृहं गच्छति। तत्र यशोदया सह वसति। एवम् अन्याः अपि यदुस्त्रियः अज्ञातप्रान्तेषु जीवनं यापयन्ति। किञ्च एतावत्,कंसः षट् सुतान् हन्ति। देवकी च इदानीं सप्तमं गर्भं धरति। परमकारुणिकः श्रीमहाविष्णुः कंसात् भयं जानाति, योगमायां समादिशति। विष्णोः आदेशानुसारं तदीयं शेषाख्यं धाम देवक्याः गर्भात् अपनुद्य, रोहिण्याः

गर्भे न्यक्षिपति। शौरसेनाः जनाश्च देवक्याः गर्भस्रावः जातः इति क्रोशन्ति।

| स्वावलोकनप्रश्नाः |
|---|
| १.प्रलम्बक–चाणूर–मुष्टिकादयः के ? |
| २. यादवाः कैः उपद्रुताः ? कुत्र विविशुः ? |
| ३.रोहिणी का ?.सा कुत्र अवसत् ? कुतः अवसत् ? कया अवसत् ? |
| ४.योगमाया किम् अकरोत् ? |
| ५. शौराः किं सञ्जातम् इति विचुक्रुशुः ? |

**२.४.७.देवक्याः अष्टमः गर्भः :-**

**(मूलम्)** ७.ततः भगवान् भूतभावनः जगत्–जन्म–स्थिति–लय–हेतुः श्री महाविष्णुः अंशेन आनकदुंदुभेःमनः आविवेश। तेन च मनसा समाहितं जगत्–मङ्गलम् अच्युतांशं मनसैव दधौ। देवकी साग्निगर्भा शमीव नितरां रेजे.। अथ कंसः स्वप्रभया सकलम् अपि भवनं विरोचयन्तीं तां वीक्ष्य ध्रुवं मे प्राणहरः श्रीहरिः अस्याः जठरे सन्निहितः, यत् इयं पुरा नेदृशी इति आकलय्य, तात्कालिकं करणीयं चिन्तयामास। यदि अहम् इदानीम् एव एनां हन्यां तदा स्त्रियः स्वसुः गर्भिण्याश्च वधेन, आयुः श्रीः यशश्च विनश्येत्। यदि श्रिया यशसा च परित्यक्तः स जीवन् अपि मृतः एव, यशोविहीनम् एनम् अन्ये अपि परित्यजन्ति। अतः आप्रसूति प्रतीक्ष्ये इति। तदारभ्य आसीनः अपि, तिष्ठन् अपि, भुञ्जानः अपि, पर्यटन् अपि, तम् एव हृषीकेशं मनसा चिन्तयन् सर्वं जगत् तन्मयम् अपश्यत्। ब्रह्मेशानौ, नारदादयः मुनयः, देवाश्च समेत्य देवकीगर्भस्थम् अच्युतं श्रुतिशिरोभिः अस्तुवन्।

**(विवरणम्)** देवक्याः अष्टमगर्भस्य वैशिष्ट्यं वर्णयति अयं (PARA GRAPH) वाक्यसमुदायः । भगवान् विष्णुः भावनारूपः भावनारायणः। भावे हि विद्यते देवः इति खलु आर्षवचनम्। भगवान् विष्णुः सर्वेषु भवनारूपेण तिष्ठति। किञ्च अयं, जगतः= विश्वस्य, उत्पादयिता, पालकः, लयकारकः च। एवं महिमेपेतः श्रीमहाविष्णुः अंशतः वसुदेवस्य मनः आविशति। वसुदेवस्य मनः आविष्टं च अच्युतांशं जगतः मङ्गलप्रदं विराजते। तच्च देवक्या धृतम्। देवकी अग्निगर्भा शमी इव दृश्यते। ततश्च कंसस्य च आन्दोलनं जातम्। देवकी

अच्युतांशं गर्भे धरति, सकलं भवनं विराजयति, नूनं मम उकंसस्य, प्राणहारकः अस्याः गर्भे सन्निहितः ,इदानीम् अहं किं करोमि इति एवं चिन्तयति। अपयशःकारणतः देवकीं न हन्ति। प्रसूतिपर्यन्तं तु निरीक्षणं करोति। तदा प्रभृति कंसः पश्यन्, शृण्वन्, स्पृशन्, जिघ्रन्, अश्नन्, गच्छन्,स्वपन्,श्वसन्,प्रलपन्,विसृजन् गृह्णन्,उन्मिषन् निमिषन् अपि जगत्सर्वं विष्णुमयं पश्यति। ब्रह्मा ईशानः उ ईश्वरः, नारदादिमुनिगणाः इन्द्रादिसुरगणाश्च, तत्र समागच्छन्ति। देवकीगर्भस्थम् अच्युतांशं वेदसूक्तैः स्तुवन्ति।

**स्वावलोकनप्रश्नाः**

१.महाविष्णुः कीदृशः ? सः कम् आविवेश ?

२. देवकी कथं रेजे ?

३. कंसः किम् इति चिन्तयामास ?

४. कंसः कथं चिन्तयन् जगत् विष्णुमयम् अपश्यत् ?

५. देवकीगर्भस्थम् अच्युतं के अस्तुवन् ? कैः अस्तुवन् ?

## २.४.८.श्रीकृष्णस्य अवतरणम् :-

२.४.८.१.श्रीकृष्णस्य जननम् – वसुदेवस्य आनन्दः

**(मूलम्)** ८.अथ परमशोभने काले प्रसन्नासु दिक्षु,मङ्गलभूयिष्टायां च वसुन्धरायाम्, ब्रह्मदेवताके रोहिणी –नक्षत्रे नभोमासे कृष्णाष्टम्यां निशीधे देवरूपिण्यां देवक्यां, इन्दुः इव प्राच्यां दिशि, श्रीमहाविष्णुः स्वस्वरूपेण अवततार। तदा देव-दुन्दुभयः नेदुः। पुष्पवृष्टिः च अभवत्। चतुर्भुजं पीताम्बरं शङ्ख-चक्र-गदा-असि-धारिणं स-किरीट-कुण्डलं श्रीवत्स लाञ्छनं बालकं वसुदेवः समीक्ष्य विस्मय-उत्फुल्लनयनः साक्षाद् भगवान् अवतीर्णः इति विज्ञाय समाप्लुतः मनसा गवाम् अयुतं द्विजेभ्यः प्रादात् ।

**(विवरणम्)** श्रीकृष्णस्य जननम् – वसुदेवस्य आनन्दः इति अंशद्वयं वर्णयति अयं (PARA GRAPH) वाक्यसमुदायः। अथउअनन्तरम्, शुभप्रदः कालः सञ्जायते। दिशश्च प्रसन्नाःउ निरुपद्रवाः, सन्ति। वसुन्धराउ भूमिः, मङ्गलभूयिष्टाउ सस्यश्याला, शान्तिपूर्णा च भवति। श्रावणमासे, कृष्ण (बहुल) पक्षे अष्टमीतिथौ,रोहिणी नक्षत्रे ब्रह्मदेवताकः परमपवित्रः

कालः सम्पन्नः अस्ति। तस्मिन् काले देवक्यां विष्णुः, स्वस्वरूपेण उ शङ्ख- चक्राभ्यां चतुर्भुजैः, अवतरति। पूर्णिमायां, पूर्वस्यां दिशि चन्द्रः इव महोदयस्सन् विष्णुः अवतीर्णः भवति। तदा दुन्दुभि -नादः उपजायते। पुष्पवृष्टिः समापतति। अवतीर्णः श्रीमहाविष्णुः चतुर्भुजान् वहति। पीताम्बरं धरति। चतुर्षु भुजेषु चतुरान् शङ्ख-चक्र-गदा-खड्गान् धरति। शिरसि किरीटम्, कर्णयोः कुण्डले,वक्षसि श्रीवत्सं च वहति।वसुदेवः एवंगुणविशिष्टं शान्ताकारं विष्णुं पुण्यवशात् साक्षात् (Directly) पश्यति। परमानन्दभरितःभवति। वसुदेवस्य नेत्रे विकसिते भवतः। साक्षाद् भगवान् अवतीर्णः इति जानाति। सन्तोषेण, मनसा= भावनारूपेण, ब्राह्मणेभ्यः सहस्रशः गाः ददाति।

**स्वावलोकनप्रश्नाः**

१.महाविष्णुः कदा अवततार ?

२. तदा= अवतरणकाले, किम् अभवत् ?

३. अवतरणसमये वसुदेवः, बालकं = शिशुं, कीदृशम् अपश्यत् ?

४. अवतरणसमये वसुदेवः, बालकं समीक्ष्य किम् इति ज्ञातवान् ?

५. अवतरणसमये वसुदेवः, बालकं समीक्ष्य, विष्णुं विज्ञाय, कीदृशः अभूत् ?

६. समाप्लुतः वसुदेवः गवाम् अयुतं द्विजेभ्यः कथं प्रादात् ?

### २.४.९.देवकी - वसुदेवयोः अभ्यर्थनम् :-

**(मूलम्)** ९.अथ स्वरोचिषा सकलम् अपि सूतिकागृहं विरोचयन्तं परमपुरुषं समुपसृत्य,वसुदेवः नताङ्गः कृताञ्जलिः बहुधा प्रणुत्य,विदित-भगवत्-तत्त्वः अपि मायामोहितः विस्मृत्य,पुत्रवात्सल्येन ' हे सुरेश्वर ! भवान् मद्गृहे खलसंहाराय अवतरिष्यति इति अशरीरिणीं वाचं श्रुत्वा खलेश्वरः सः कंसः भवदग्रजान् अहन्। अद्य तु स्व-भृत्यैः निवेदितं भवत्-जन्म निशम्य धृतासिः हननोद्यतः समागमिष्यति ' इति कंसजं भयं निवेदयामास। देवकी अपि तम् अवतीर्णं परमपुरुषं बहुधा स्तुत्वा , हे भृत्यवित्रासहारिन् ! खलेश्वरात् उग्रसेनात्मजात्

भीतान् अस्मान् पाहि। यथा, असौ पापी, मयि त्वत्-जन्म, मा विद्यात् तथा अनुगृहाण। भवत्-हेतोःअहं कंसात् उद्विजे। हे विश्वात्मन् ! शङ्ख-चक्रादिसहितं चतुर्भुजम् अलौकिकम् इदं रूपम् उपसंहर ' इति व्यजिज्ञिपत्।

**(विवरणम्)** भगवते देवकी-वसुदेवयोः विज्ञप्तिं वर्णयति अयं (PARA GRAPH) वाक्यसमुदायः। देवक्यां स्वस्व रूपेण अवतीर्णः महाविष्णुः स्वस्य कान्त्या प्रसूतिगृहं प्रकाशयति। उज्ज्वलरूपिणं महाविष्णुं वसुदेवः उप -सर्पति। विधेयशीली भवति। अञ्जलिं बध्नाति। बहुधा प्रस्तौति। वसुदेवः भगवतः तत्त्वं जानाति एव, तथापि मायाप्रभावेण सर्वं विस्मरति। वात्सल्येन, अवतीर्णं विष्णुं- 'भगवन् कंसः भवान् दुष्टशिक्षणाय अत्र अवतरिष्यति इति आकाशवाण्या जानाति। तस्मात् भयमाशङ्क्य भवतः पूर्वं जातान् हन्ति। इदानीं भवतः अवतरणं शृणोति। खड्गं धरति। भवतः हननाय समागच्छति' इति कंसात् भयं निवेदयति। देवकी अपि अवतीर्णं पुरुषोत्तमं बहुधा स्तौति। अनन्तरं ' हे भयापनोदक !कंसात् भीतान् अस्मान् रक्षतु। दुष्टः कंसः भवतः अवतरणं मा जानातु। भवन्तं कंसात् रक्षितुम् अहं न पारयामि, भयं शङ्के। अतः इदम् अलौकिकम्उ शङ्ख-चक्रादिसहितं चतुर्भुजम् रूपं उपसंहरतु' इति विज्ञापयति।

**स्वावलोकनप्रश्नाः**

१.वसुदेवः भगवते किं निवेदयामास ?

२. भृत्य-वित्रास-हारी कः ?

३. देवकी विश्वात्मने किम् इति व्यजिज्ञिपत् ?

## २.४.१०. देवकी-वसुदेवयोः पूर्ववृत्तान्तम् :-

**(मूलम्)** १०. ततः भगवान् देवकीं प्रति एवम् उवाच - त्वमेव पूर्वसर्गे स्वयम्भुव-मन्वन्तरे पृश्निः आसीः। अयं च वसुदेवः सुतप नामा प्रजापतिः अभूत्। यदा युवां ब्रह्माणं प्रजासर्गे समादिष्टौ तदा द्वादश-दिव्यवर्ष- सहस्राणि मां प्रति तपः तेपतुः। तेन अतितुष्टः वरप्रदः अहं युवयोः वर-दिदित्सया अनेनैव रूपेण प्रादुरभवम्। 'वरः व्रियताम्' इति उक्तवति मयि,मत् मायामोहितौ अनपत्यौ युवाम् अपवर्गं विहाय मादृशं पुत्रं वव्राथे। तथा इति प्रतिश्रुत्य मादृशस्य अन्यस्य अभावात् अहम् एव पृश्निगर्भः इति श्रुतः सूनुः अभवम्। द्वितीये जनुषि अदिति-कश्यपनाम्नोः युवयोः उपेन्द्रनामा सूनुः आसम्। वामनत्वात् वामनः इति च ख्यातः अभवम्। तृतीये भवे तयोः एव भवतोः तेन एव रूपेण भूयः जातः अहम्। रूपं च इदम्

अलौकिकं प्राक्–जन्मस्मरणाय युवयोः दर्शितम्। अन्यथा मद्भवं ज्ञानं न युवयोः जायेत। अतः मां पुत्रभावेन ब्रह्मभावेन च असकृत् चिन्तयन्तौ युवां परांमद्गतिम् अवाप्स्यथ। यदि कंसाद् भयं तर्हि मां गोकुलं नय। यशोदातनयां मत्–मायां द्रुतम् आनय। द्वाराणि स्वयमेव विवृतानि भवेयुः। दुस्तरा यमुनापि विवृता भवेत्, इति उक्त्वा भगवान् आत्ममायया संपश्यतोः एव पित्रोः सद्यः एव प्राकृतः शिशुः अभवत्।

**(विवरणम्)** देवकी–वसुदेवयोः पूर्ववृत्तान्तं वर्णयति अयं वाक्यसमुदायः। अवतीर्णः विष्णुः देवक्याः वसुदेवस्य च पूर्वजन्मनां वृत्तान्तं एवं ज्ञापयति। स्वयम्भुव–मन्वन्तरे देवकी पृश्निनाम्ना जाता। वसुदेवः सुतपः प्रजापतिः जातः। एतौ द्वौ अपि ब्रह्माणं प्रजोत्पत्तिंउ सृष्टिं,कर्तुं समादिशतः। अनन्तरं च तौ द्वौ द्वादश–दिव्यवर्ष –सहस्त्राणि विष्णुम् उद्दिश्य तपः कुरुतः। तपसा च विष्णुः तृप्तिम् एति। वरं दातुं च तयोः पुरतः आविर्भवति। वरं वृणोतु इति विष्णुः पृच्छति। मायया भ्रान्तौ एतौ देवकीवसुदेवौ मोक्षम् अवृत्वा, विष्णुसदृशम् पुत्रं वृणुतः। विष्णुसदृशस्य अन्यस्य अभावात् विष्णुः एव पृश्निगर्भे सम्भवति। पुनः अनन्तरजन्मनि विष्णुः अदितिकश्यपयोः सूनुः जातः। वामनत्वात् वामनः इति नाम्ना प्रसिद्धिं प्राप्नोति । तृतीये अस्मिन् अपि तयोः सूनुः अभवत्। एवं पूर्वजन्मस्मरणाय विष्णुः देवक्यां शङ्खचक्राभ्यां अवतरति। अन्यथा विष्णुभावं न तयोः जायते। एवं देवकी– वसुदेवौ विष्णुं, पुत्रत्वेन ब्रह्मत्वेन च आराधयतः। परमपदं च आप्नुतः। ततश्च तत्रैव विष्णुः तयोः कंसात् भयं च अपनेष्यति। आत्मानं गोकलं नयतु, आत्मनः मायया जनितां यशोदातनयां च अत्र आनयतु, अत्र कः अपि अन्तरायः न भवति। द्वाराणि स्वयमेव उद्घाटितानि भवन्ति। यमुना अपि मार्गं ददाति, इति वदति। देवकी–वसुदेवौ च पश्यन्तौ एव आस्ताम्। अत्रान्तरे महाविष्णुः, प्राकृतःउ साधारणः, शिशुः भवति।

**स्वावलोकनप्रश्नाः**

१.पूर्वस्मिन् जन्मनि,देवकी–वसुदेवौ कौ ?

२. विष्णुना अलौकिकं रूपं किमर्थं दर्शितम् ?

३. अन्यथा किं भवेत् ?

### २.४.११.शिशोः नन्दगृहप्रापणम् :–

(मूलम्) ११.एवं भगवता प्रचोदितः शौरिः यदा सूतिकागृहात् शिशुं बहिः नेतुम् इयेष तदा एव यशोदायां व्रजे योगमाया अपि अजनि। तत् महिम्ना च द्वारपालकाः, सर्वे च पौराः निद्रापरवशाः

आसन्। उत्तानशयं भगवन्तम् आदाय समागते वसुदेवे, सशृङ्खलैः बृहत् कवाटैः बद्धानि पिहितानि दुरत्यानि द्वाराणि स्वयमेव व्यशीर्यन्त। उपांशु–गर्जितैः पर्जन्ये वर्षति, अनन्तः फणैः आच्छाद्य शिशुं वारि निवारयामास। गम्भीर–तोयौघ– जव– ऊर्मिफेनिला भयानक–आवर्त–शताकुला कलिन्दकन्यापि श्रियः पतेः बन्धुः इव मार्गं ददौ। शौरिः अपि निरुपरोधं नन्दव्रजम् उपेत्य प्रसुप्तेषु सर्वेषु अपि गोपेषु, यशोदाशयने शिशुं निधाय, तत्सुताम् आदाय पुनःस्वगृहं प्राविशत्। तां च देवक्याः शयने अशाययत् यथापूर्वं सर्वाणि अपि द्वाराणि पिहितानि आसन्। यशोदा अपि नन्दपत्नी जातं केवलशिशुम् अबुध्यत। प्रसव–परिश्रान्ति–निद्रा–अपगत–स्मृतिः सुतः कन्या वा इति परं न अबुध्यत।

**(विवरणम्)** शिशोः (भगवतः विष्णोः) नन्दगृहप्रापणवृत्तान्तं वर्णयति अयं वाक्यसमुदायः। यदा देवकी भगवतः जन्म ददाति, तदा एव व्रजे यशोदापि योगमायायाः जन्म ददाति। योगमायाप्रभावतः मधुरायां, व्रजे च सर्वे निद्रां गच्छन्ति। वसुदेवः भगवदादेशम् अनुसरति। त्वरितः भवति। शिशुरूपिणं विष्णुं हस्तयोः समाददाति।

व्रजं प्रस्थास्यति। पिहितानि महान्ति द्वाराणि स्वयम् एव उद्घाटितानि भवन्ति। कुम्भवृष्टिः पतति। वर्षात्शिशुं विष्णुं रक्षितुम् आदिशेषः फणान् आच्छादयति। व्रजं गन्तुं मध्ये, कालिन्दीउयमुना, नदी अपि अस्ति। सा च अगाथजलैः पूर्णा अस्ति। उत्तुङ्गतरङ्गैः फेनम् उद्वमन्ती अस्ति।महद्भिः आवर्तैः आकुला च भवति। तादृशी अपि कालिन्दी व्रजं प्रापयितुं शिशुरूपाय विष्णवे मार्गं कल्पयति।एवं वसुदेवः कष्टं विना एव नन्दव्रजमुपसर्पति। तत्र च सर्वे गोपाः गाढनिद्रासु भवन्ति। शयने यशोदायाः पार्श्वे शिशुं स्थापयति। यशोदायाः सुतां आददाति। स्वस्य गृहं प्रविशति। देवक्याः पार्श्वे तां शाययति। पुनः द्वाराणि यथावत् पिहितानि भवन्ति। यशोदा अपि जातं केवलशिशुं इत्येव जानाति। यशोदा प्रसववेदनया परिश्रान्ता। निद्रितमनस्का च जता। तेन अपगतस्मृति –सामर्थ्या भवति। अतः प्रसवानन्तरं रात्रौ एव पुं शिशुः वा, स्त्री शिशुः वा,इति ज्ञातुम् उत्कण्ठिता न भवति।

**स्वावलोकनप्रश्नाः**

१.भगवन्तम् आदाय समागते वसुदेवे, कीदृशानि द्वाराणि, कथम् अभवन् ?

२. पर्जन्ये वर्षति,कः,कैः,कथं शिशुं वारि निवारयामास ?

३. कलिन्दकन्या का ? सा कीदृशी ? श्रियः पतेः कथं मार्गं ददौ ?

## २.४.१२.स्त्रीशिशोः अपि निर्दयया शिलापृष्टे क्षेपणम्

**(मूलम्)** १२.ततः सूतिकागृहे बालध्वनिं निशम्य, समुत्थिताः गृहपालाः तूर्णम् उपासृत्य, भोजराजाय देवक्याः प्रसूतिवृत्तान्तं निवेदयामासुः। सः अपि तल्पात् तूर्णं समुत्थाय अतिविह्वलः मुक्तमूर्धजः पदे पदे प्रस्खलन् सूतिकागृहं प्राविशत्। हननोद्यतं च भ्रातरम् अवेक्ष्य देवकी बाहुभ्याम् उपगूह्य सुताम्, 'हे भ्रातः! स्नुषा इयं तव। इतः पूर्वं बहवः पुत्राः हिंसिताः। स्त्रियम् एनां हन्तुं न अर्हसि। अहं तव अवरजा दीना। मह्यम् एनां चरमजां दातुम् अर्हसि इति अतिकृपणं ययाचे। एवम् अतिदीनं याचितः अपि सः खलः देवक्याः हस्तात् आकृष्य तां सुतां चरणयोः गृहीत्वा शिलापृष्टे दृढम् अक्षिपत्।

**(विवरणम्)** स्त्रीशिशुरूपिणीं योगमायाम् अपि हन्तुं कंसः सिद्धः भवति इति अंशं वर्णयति अयं वाक्य -समुदायः। प्रकृते - प्रसवगृहात् बालस्य रोदनं श्रूयते। अनुपदम् एव नियमिताः गृहस्य सेवकाः समुत्तिष्ठन्ति। शीघ्रं भोजराजम् = कंसम्, उपसर्पन्ति। देवक्याः प्रसूतिं निवेदयन्ति। कंसः अपि भयेन आन्दोलनपरः भवति।तत् क्षणे एव शयनात् उत्तिष्ठति। क्रोधेन केशान् विप्रकिरति। भयेन तस्य पदानि प्रस्खलन्ति। तथैव सूतिकागृहं प्रविशति। शिशुं हन्तुम् उद्युक्तः भवति। देवकी, हनने उद्यतात् भ्रातुः कंसात्, शिशुम् उपगूहति= दृष्टिपथात् अपवारयति। 'कंस! भ्रातः!इमां सुतां मा हन्तु। अहं= देवकी, तव= कंसस्य, अवरजा= अनुजा। इयं= स्त्री -शिशुः, तव, स्नुषा= स्वसुः सुता, भवति। पूर्वं बहवः पुत्राः हिंसिताः। स्त्रियम् एनां हन्तुं न अर्हसि। चरमजाम् =कनिष्ठाम्, इमां मत्कृते विजहातु ' इति अतिदीनतया पृच्छति। परं कठिनात्मा कंसः देवक्याः प्रार्थनां न विचा -रयति। हस्तात् शिशुं आकर्षति। शिशोः पादौ गृह्णाति। शिलापृष्टे बलात् ताडयति।

**स्वावलोकनप्रश्नाः**

१.गृहपालाः कीदृशाः ?

२. कंसः सूतिकागृहं कथं प्राविशत् ?

३. भ्रातरं देवकी किं ययाचे ?

४. कंसः स्त्रियम् अपि शिशुं किम् अकरोत् ?

**२.४.१३.योगमायायाः तर्जनम् - देवकीवसुदेवयोः मोचनम् :-**

**(मूलम्)**१३.सद्यः एव सा भगवती योगमाया दिव्य-स्रक्-अम्बर-अनेकरत्न-अभरण-भूषिता सायुधा अष्ट -भुजा सिद्ध-चारण-वृन्द-रूपबलिभिः अभिष्टूयमाना, देवी भूत्वा, गगने साक्षात्कृत्य ,एवम् उदाजहार -‘रे मूढ ! किं मया हतया प्रयोजनम् ? कुत्रचित् तव अन्तकः जातः अस्ति,वर्धते च। कृपणाम् इमां देवकीं मा हिंसीः’ इति। तदाकर्ण्य परं विस्मितः कंसः देवकीं वसुदेवं च विमुच्य, प्रश्रितः ‘हे भगिनि ! भाव ! मर्त्याः इव दैवम् अपि अनृतं वक्ति इति अजानता दुरात्मना पापेन मया अशरीरवाक् प्रत्ययात् युवयोः बहवः पुत्राः व्यापादिताः। कान् वा लोकान् अहम् इह प्रेत्य गमिष्यामि। क्षन्तव्यः अयं मे अपराधः’ इति उक्त्वा, पादयोः निपत्य, बहुधा सानुतापम् उपसान्त्वयित्वा निगलबन्धात् विमोचयामास। अनुतप्तस्य भ्रातुः क्षान्त्या देवकी रोषम् अत्याक्षीत्। वसुदेवः अपि प्रसन्नः प्रहसन् ’महाराज! सर्वमेतत् दैवकृतम्, न ते दोषः अस्ति’ इति आश्वासयामास। एवं प्रसन्नाभ्यां ताभ्याम् अनुज्ञातः स्वभवनं प्राविशत्।

**(विवरणम्)**अयं वाक्यसमुदायः,योगमायायाः तर्जनम्-देवकीवसुदेवयोः मोचनम् इति अंशद्वयं वर्णयति। प्रकृते - क्रूरः कंसः यदा पादौ गृहीत्वा स्त्रीशिशुं शिलायाः उपरि क्षिपति,तदा शिशुः योगमाया देवीरूपं धरति। वेगेन ऊर्ध्वं गच्छति।गगने साक्षात् भवति।सा दिव्यानि वस्त्राणि धरति। दिव्यां पुष्पमालां कण्ठे वहति। अवयवेषु अनेकानि रत्नाभरणानि अलङ्करोति। अष्टभुजान् वहति। आयुधान् हस्तेषु दधाति। परितः सिद्धाः, चारणाः वृन्दाःउ एते देवगणाः,ताम् अभिस्तुवन्ति। आकाशं व्याप्नोति। ’रे मूढ,मम= योगमायायाः, हननेन ते= कंसस्य, किमपि प्रयोजनं नास्ति। तव = कंसस्य, अन्तकः कुत्रचित्(च्ग्रक ज़्त्तक्र्डक) जातः, वर्धते च। देवकी दीना, किमपि कर्तुं न पारयति। तां मा पीडयतु’ इति कंसं तर्जयति।

कंसः तत् शृणोति। विस्मयम् उपैति। क्रोधम् अपनुदति। देवकीं वसुदेवं च बन्धनात् मोचयति। सौम्यः भवति - मानवाः इव दैवम् अपि असत्यं कथयति इति अहं = कंसः,न जानामि।अहं आकाशवाण्याः वचांसि विश्वसितवान् अस्मि। अहं युवयोःउ देवकीवसुदेवयोः,बहून् पुत्रान् घातितवान्। अहम् अवश्यं नरकं गमिष्यामि। मां क्षमेथाम् (EXCUSE) इति वदति। पादयोः निपतति। पश्चात्तापम् अनुभवति। देवकीवसुदेवौ समाश्वसिति। बन्धनात् मोचयति। पश्चात्तप्तं कंसं दृष्ट्वा देवकी रोषं त्यजति। वसुदेवः अपि एतत् मनसि अनिधाय,कंसम् औदार्येण आश्वासयति। देवकी वसुदेवौ च प्रशान्तौ भवतः। कंसश्च देवकीवसुदेवाभ्याम् अनुमतिं आप्नोति। स्वगहं प्रविशति।

**स्वावलोकनप्रश्नाः**

१.योगमाया किम् अभूत् ?

२. योगमाया देवी भूत्वा, कंसं किम् उदाजहार ?

३. कंसः देवकी-वसुदेवौ किम् अवोचत् ?

४. वसुदेवः कंसं कथम् आश्वासयामास ?

## २.५.उपसंहारः

एवम् अत्र,भुवः भारापनोदनाय विष्णुः सङ्कल्पितः भवति, विवाहानन्तरं देवकी-वसुदेवौ स्वस्थानं प्रस्थास्यतः। कंसः सारथिः भूत्वा तौ नयति। मार्गमध्ये अशरीरिणी वाक् देवक्याः अष्टमगर्भात् ते मृत्युः आसन्नःइति कंसं तर्जयति। कंसः च आगामिप्रमादवारणाय देवकीं हन्तुं खड्गम् उद्धरति। सन्ततेः समर्पणाय नियमं कृत्वा, वसुदेवः देवकीं त्यक्तुं कंसं प्रार्थयति। कंसःदेवकी-वसुदेवयोः कारागारवासं विदधाति। देवक्याः सप्तमः गर्भः रोहण्यां वर्धते। देवकी अष्टमं गर्भं विधत्ते। श्रीकृष्णः अवतरति। वसुदेवः आनन्दम् आप्नोति। भगवतः आदेशेन वसुदेवः शिशुं नन्द गृहं प्रापयति। नन्दगृहात् स्त्रीशिशुम् आनयति। कंसाय समर्पयति। स्त्रीशिशुः अपियोगमाया भूत्वा कंसं तर्जयति, इति एते विषयाः अत्र प्रस्तुताः। एते च श्रीकृष्ण-अवतारस्य नेपथ्य-वैशिष्ट्यं बोधयन्ति।

## २.६.अभ्यासः

अ).श्रीकृष्णावतारस्य नेपथ्यं वर्णयत ?

इ).श्रीकृष्णावतारस्य दिव्यत्वम् , महिमानं च वर्णयत ?

# UNIT-III
# कंसस्य दुष्टकर्माणि

**संरचना**

३.१.परिचयः
३.२.लक्ष्याणि
३.३.कंसस्य दुष्टकर्माणि
३.३.१.शिशूनां हिंसने दैत्यानां नियोजनम्
३.३.२.नन्दस्य पुत्रोत्सवः
३.३.३.नन्द-वसुदेवयोः मेलनम्
३.३.४.गोकुले उत्पाताः - शिशोः बालारिष्टानाम् अधिगमनम्
३.३.४.१.पूतनायाः संहरणम्
३.३.४.१.१पूतनायाः प्रवेशः
३.३.४.१.२.पूतनायाः मरणम्
३.३.४.१.३.नन्दशिशोः बालविचेष्टितम्
३.३.४.१.४.नन्दादीनां विस्मयः - पूतनाः सद्गतिप्रसादनम्
३.३.५.शकटस्य भञ्जनम्
३.३.६.बालग्रहशङ्का-शान्तिहोमादिकं च
३.३.७.तृणावर्तः
३.४.उपसंहारः
३.५.अभ्यासः

## ३.१.परिचयः

अयं पाठ्यांशः कृष्णचरितस्य प्रथमखण्डे १४-२३ (para graphs) पर्यन्तं प्रचलति। द्वितीये पाठ्यांशे (UNIT - II) श्रीकृष्ण-अवतरणस्य नेपथ्यम्, अवतरणम्,तस्य नन्दगृहप्रापणम्, नन्दगृहात् स्त्रीशिशोः आनयनम् इति एते विषयाः प्रस्तुताः । अनन्तरं प्रकृते योगमाया (स्त्रीशिशुः) द्वारा कंसः, अन्यत्र स्वस्य मारकस्य पोषणं -वर्धनं च जानाति। भृशम् आकुलितः भवति। निर्दाक्षिण्यतया भुवि स्थितान् शिशून् सर्वान् हन्तुम् आदिशति। कतिपयान् राक्षसान् नियच्छति। ते च नन्दगृहे शिशुरूपे स्थितं भगवन्तम् उपसर्पन्ति। तस्य हस्ते प्राणान् त्यजन्ति। कैवल्यं प्राप्नुवन्ति इति एते विषयाः अत्र बोध्यन्ते। अस्मिन् च पाठ्यांशे कंसेन नियुक्तानां राक्षसानां क्रूरता,

श्रीकृष्णस्य कारुण्यं च वर्ण्यते । अत्र गद्यं सरलम् , पठन-अनुकूलं च वर्तते । श्रीकृष्णस्य महिमोपेतं शैशवं पाठकानाम् अनुभूतिं आनन्दं च जनयति।

## ३.२.लक्ष्याणि

लोके मानवाः साधवः असाधवः द्विविधाः भवन्ति। दिव्यगुणसम्पन्नाः साधवः भवन्ति। अहिंसा, सत्यम्, अक्रोधः, त्यागः, शान्तिः, लोभविरहः, भूतेषु दया,मार्दवम्, ह्रीः, अचापलम्, क्षमा,धैर्यम्, पवित्रता, परिशुद्धता, अद्रोहः, न अतिमानिता इति दिव्यगुणाः। एते च मानवम् अभ्युदयमार्गे प्रवर्तयन्ति । मानवं प्रेमास्पदं कुर्वन्ति । मनवान् दिव्यान् कुर्वन्ति। क्रूरगुणसम्पन्नाः असुराः भवन्ति। दम्भः, दर्पः, दुरभिमानः, क्रोधः, पारुष्यम्, अज्ञानं च एते असुरगुणाः। एते च मानवम् अधः पातयन्ति। मानवं क्रोधपूर्णं कुर्वन्ति। दुरहङ्कारिणं करोति। मानवेषु दान - वतां पूरयन्ति। समाजे साधूनाम् असाधवः निष्कारणम् एव वैरिणः भवन्ति। सर्वदा असाधवः साधूनाम् क्लेशान् कल्पयन्ति। साधवः च तान् क्षमया सहन्ते। साधुषु यथा यथा क्षमा वर्धते, तथा तथा असाधुषु असहनम् अधिकं भवति । तदा इतः अपि अधिकं क्लेशं कल्पयन्ति। साधून् पीडयन्ति। प्रकृते कंसः शिष्टान् वसुदेवादीन् कथं बाधते ? वसुदेवादीनां रक्षणाय अवतीर्णः श्रीकृष्णः कंसस्य दुष्कृत्यानि कथम् निरुणद्धि? वसुदेवादीनां, नन्दादीनां, गुरुजनानां च कथम् आनन्दं जनयति इति एते अंशाः अत्र प्रस्तुताः भवन्ति। एतत् पाठ्यांशस्य अध्ययनेन -

- आधुनिकसंस्कृतगद्यं प्रति परिचितः भवति।
- संस्कृतभाषाकौशलेषु श्रवण-पठन-भाषण-लेखनेषु वाक्यरचनासु, निपुणः भवति।
- पुराणककथासाहित्यं प्रति आकर्षितः भवति।
- योगमायायाः तर्जनद्वारा कंसस्य आन्दोलितमनस्कतां जानाति
- प्रतीकाराय दुष्टानां राक्षसानां नियोजनद्वारा कंसस्य क्रूरत्वम् अवगन्तुम् प्रभवति।
- पूतना-शकटासुर-तृणावर्तादीनां दुष्प्रभावं पठितुं पारयति।
- भगवतः आपन्नप्रसन्नत्वं प्रति,शिष्टरक्षणं प्रति च परवशः भवति
- दुष्टशिक्षणाय भगवतः निबद्धताम् अवगच्छति।

## ३.३.कंसस्य दुष्टकर्माणि

### ३.३.१.शिशूनां हिंसने दैत्यानां नियोजनम्

**(मूलम्)** १४. व्यतीतायां च रात्रौ, प्रतः मन्त्रिणः समाहूय, तं वृत्तान्तं सर्वम् आचचक्षे। तत् श्रुत्वा देवशत्रवः दैतेया एवम् ऊचुः- 'हे भोजेन्द्र! यदि एवं पुर-ग्राम-व्रजादिषु अनिर्दशान् निर्दशान् च शिशून् वयं हन्मः, किम् अद्य देवाः समरभीरवः करिष्यन्ति ? किञ्च ते अल्पवीर्याः। अथापि यथा व्याधिः उपेक्षितः चिकित्सितुं न शक्यते, एवम् उपेक्षितः शत्रुः रूढबलः न

चाल्यते। अतः अवश्यम् अद्यैव प्रतीकार्यः। देवानां हि विष्णुः मूलम्। तस्य च ब्रह्म-गो-विप्र-यज्ञ-दान-तपांसि मूलानि। अतो ब्रह्मवादिनो ब्राह्माणान्, तपस्विनो यज्ञशीलान् गावश्च हनिष्यामः। अयम् एव हरेः वधोपायः' इति। एवं दुर्मन्त्रिभिः उदाहृतम् आकर्ण्य कालपाश-वशंगतः कंसः कदनप्रियान् कामरूपधरान् दैत्यान् साधूनां हिंसने, शिशुहनने च सन्दिश्य, गृहम् आविशत्।

**(विवरणम्)**अयं वाक्यसमुदायः, कुत्रचित्(SOME WHERE) जन्म लब्ध्वा,वर्धमानस्य शिशोः मारणार्थं,कंसः दैत्यान् नियमयति, इति अंशं विवृणोति।प्रकृते- कंसः आन्दोलनेन यथाकथञ्चित् रात्रिं यापयति। प्रातः भवति। मन्त्रिणः= अमात्यान्, समावेशार्थम् आह्वयति। देवक्याःअष्टमगर्भस्य स्त्रीशिशोः वृत्तान्तं विवृणोति। ते अपि स्त्री -शिशोः वृत्तान्तं शृण्वन्ति। कंसस्य मन्त्रिणः अपि दुष्टाः एव भवन्ति खलु। ते अपि कंसस्य एवं कुतन्त्रम् एव बोधयन्ति।'हे भोजेन्द्र = कंसराज !नगरेषु,ग्रामेषु पत्तनेषु च, जातदन्ताः, अजातदन्ताः यावन्तः शिशवः विद्यन्ते, तेषां हननम् अस्माकम् अवश्यं तत्क्षणं च कर्तव्यम्।तत् वयं कुर्मः।परिमितबलवन्तः हि देवाः। ते अस्मान् किमपि कर्तुं न पारयन्ति। किञ्च उपेक्षितः,व्याधिः= रोगः,यथा चिकित्सितुम् =TREATMENT दातुम् अपि न शक्यते, तथा उपेक्षितः शत्रुः अपि, सम्पादित बलः सन्,उद्धर्तुम् अशक्तः भवति। अतः अद्यैव प्रतिक्रिया विधेया। देवाश्चविष्णोः अभिमानिनः अनुगामिनः च भवन्ति। विष्णोश्च यज्ञाः प्रीतिकराः ,दानानि, तपांसि, च प्रीतिपात्राणि। गावः, ब्राह्म -णाश्च इष्टतमाः। अतः विष्णोः अभिमतान् गाः, ब्राह्मणान् हनिष्यामः, तपसां विघ्नम् आचरिष्यामः, यज्ञ- यागा -दीनां आतङ्कं कल्पयामः च,एवं करणेन विष्णुः अवश्यं हतः भवति' इति एवं कंसं प्रेरयन्ति। कंसः मन्त्रिभिः उक्तं शृणोति। विधि वशं गच्छति। राक्षसाः केचन कामरूपधराः सन्ति। यं रूपं धर्तुम् इच्छन्ति तं रूपं ते आप्तुं प्रभवन्ति। तादृशान् युद्धप्रियान् राक्षसान् साधूनां हिंसने, शिशूनां हनने च नियोजयति। समावेशं समापयति। गृहं प्रविशति च।

**स्वावलोकनप्रश्नाः**

१.भोजेन्द्रः कः ? तं दैतेयाः किम् ऊचुः ?

२. व्याधिः उपेक्षितः किं भवति ?

३. विष्णोः मूलानि कानि ?

४. कंसः दुर्मन्त्रिभिः उदाहृतम् आकर्ण्य किं सन्दिष्टवान् ?

## ३.३.२.नन्दस्य पुत्रोत्सवः :-

**(मूलम्)** १५.अथ व्रजे नन्दः पुत्रजन्मना जात-आह्लादः समाप्लुतः अलङ्कृतः शुचिः,वेदविदः विप्रान् समाहूय शिशोः स्वस्त्ययनं जातकर्मादिसंस्कारं च विधिवत् अकारयत्। धेनूनाम् अयुतं विप्रेभ्यः प्रायच्छत्। अन्यानि च दानानि विधिवत् अकार्षीत्। सूत-मागध-वन्दिनः गायकाः विप्राश्च सौमङ्गल्य-गिरःसमूचुः। मङ्गल -वाद्यघोषश्च भू-नभोऽन्तरं भिन्दन् व्यजृम्भत। सर्वोऽपि व्रजः पल्लवतोरणैः पताकाध्वज-मालिकाभिः अलङ्कृतः आसीत्। गोपाश्च बहूनि उपायनानि आजहुः। गोप्यश्च यशोदायाः सुतोदयम् आकर्ण्य प्रमुदिताः विचित्र-वस्त्र- आभरणादिभिः अलङ्कृताः दृततरं नन्दालयम् उपेत्य हरिद्राचूर्ण-तैलादिभिः शिशुम् आसिच्य-अगरुधूपैः धूपयित्वा आशिषः प्रयुञ्जत। महाभागा रोहिणी च स्वपुत्रोदयेन नन्दादिभिः अभिनन्दिता दिव्य- वस्त्र- आभरण भूषिता सानन्दं व्यचरत्। तदारभ्य नन्दव्रजे हरेः निवासेन सर्वसमृद्धिः आसीत्।

**(विवरणम्)**अयं वाक्यसमुदायः, वसुदेवः शिशुं, शयने यशोदायाः पार्श्वे,स्थापयति खलु। तत्र किं प्रचलति इति अंशं विवृणोति। अत्र व्रजः नाम गोपालकानाम्, आवासभूमिः (Colony) इत्यर्थः। तत्र नन्दः, पुत्रः जातः इति परम-आनन्द-भरितः भवति। साधु स्नानम् आचरति। पवित्रः भवति। नूतनवस्त्राणि धरति। वेदान् अधीतान् ब्राह्मणान् सादरम् आह्वयति। शास्त्रोक्तप्रकारेण शिशोः स्वस्ति पुण्याहवाचनं, जातकर्मादिसंस्कारम् = षोढश संस्कारेषु आदिमं संस्कारं, च कारयति। सन्तोषदायके तस्मिन् काले ब्राह्मणेभ्यः गाः ददाति। ब्राह्मणाः गाय -काश्च शिशोः शुभाशिषः वदन्ति। मङ्गलकरः वाद्यघोषश्च समन्ततः व्याप्नोति। व्रजप्रान्तः सर्वः अपि चूत-पर्णानां तोरणैः, पताकाभिः, ध्वजमालिकाभिः(Threads Stuck of Colour Papers) च विराजते। गोपाःअनेकानि उपयनानि (Gifts) आनयन्ति। गोप्यश्च यशोदायाः पुत्रोत्सवं शृण्वन्ति। भृशं मोदन्ते।नूतनानि चित्र विचित्राणि वस्त्राणि,आभरणाणि च धरन्ति। शीघ्रं नन्दगृहम् आगच्छन्ति। शिशुं हरिद्राचूर्णं, तैलं च लेपयन्ति। स्नापयन्ति। अगरुधूपं कल्पयन्ति। शुभाशिषः वदन्ति। रोहिणी अपि तदैव खलु पुत्रं प्रसूते। नन्दादयश्च रोहिणीम् अभि नन्दन्ति। सापि इदानीं दिव्यानि वस्त्राणि, आभरणानि धरति। अत्र नन्दगृहे सानन्दं कार्यकलापेषु भागं स्वीकरोति। हरिः तत्र वसति इति कारणतः, तत् आरभ्य नन्दव्रजे सर्वसम्पदः समृद्धाः भवन्ति।

**स्वावलोकनप्रश्नाः**

१.नन्दः पुत्रजन्मना किं किं कृतवान् ? कं कं कारितवान् ?

२. विप्रेभ्यः किं प्रायच्छत् ?

३. गोपाः किं चक्रुः ?

४. नन्दव्रजे हरेः निवासेन का आसीत्। ?

### ३.३.३.नन्द-वसुदेवयोः मेलनम् :-

**(मूलम्)** १६.तदनु गोकुलरक्षणाय गोपान् नियुज्य नन्दो वार्षिकं करं कंसाय निवेदयितुम् एकदा मधुरापुरीम् अगमत्। वसुदेवस्तु समुपागतं,राज्ञे दत्तकरं,नन्दम् उपश्रुत्य तन्निवासभवनम् आससाद। नन्दोऽपि प्रियसुहृदम् एनं परिष्वज्य दोर्भ्याम्,अनामयम् अपृच्छत्। वसुदेवस्तु स्वात्मजयोः प्रसक्तबुद्धिः प्रवयसं प्रजाशया निवृत्तं चिरात् लब्धप्रजम् आत्मनः सुहृदं नन्दम् अभिनन्द्य रोहिण्याः तदात्मजस्य च कुशलम् अपृच्छत्। नन्दोऽपि कंसनिहत-देवकी-पुत्रं तम् आश्वासयामास।तदनु कृतकार्येण भवता नात्यन्तम् अत्र अवस्थेयम्। सन्ति गोकुले उत्पाताः इति वसुदेवेन निवेदितः नन्दः, प्रियसखम् आपृच्छ्य सपरिवारः नन्दगोकुलमनः अभिययौ। मध्येपथे शौरेः वचः न वृथा इति विचिन्तयन् उत्पात-आगमशङ्कित-मनसा हरिं शरणं प्रपेदे।

**(विवरणम्)** अयं वाक्यसमुदायः, नन्द-वसुदेवयोः मेलनं वर्णयति। प्रकृते- नन्दः गोकुलस्य= व्रजस्य रक्षणाय भद्रतां कल्पयति। तदर्थं गोपान् नियोजयति। नन्दः प्रतिसवत्सरं कंसाय करं(Tax)समर्पयति। तत् निवेदयितुं कदाचित् मधुराम् आगच्छति। तत्कार्यं पूरयति। वसुदेवः एतत् विषयं जानाति। नन्दम् उपसर्पति। तं गृहम् आनयति। नन्द-वसुदेवौ प्रियसुहृदौ। अतः नन्दः अपि वसुदेवं परिष्वजति। कुशलं पृच्छति। वसुदेवःस्वस्य पुत्रयोः (देवकीपुत्र-रोहिणीपुत्रयोः) क्षेमसमाचारं ज्ञातुम् अभिलषति। सन्दर्भं कल्पयति। नन्दः अपि बहु कालं सन्तत्यै प्रतीक्ष्य विरतः। इदानीम् एव भाग्यवशात् सन्तानवान् जातः। चिरात् सन्ततिं प्राप्तं तम् अभिनन्दति। तदभिनन्दनव्याजेन वसुदेवः रोहिण्याः तदात्मजस्य च कुशलं पृच्छति। कंसः निखिलं देवक्याः सन्तानं हन्ति खलु। तद्विषये नन्दः सानुभूतिं प्रकटयति। अनन्तरं वसुदेवः नन्दम् – 'आगमनकार्यम् अवसितं खलु। आलस्यं मा कुरु। गोकुले उत्पाताः सम्भवेयुः। आलस्यं मा कुरु' इति निवेदयति। वसुदेवेन उक्तं शृणोति। व्रजं गन्तुम् अभिमुखो भवति। गच्छन् मार्गमध्ये

वसुदेवः असत्यं न वदति इति चिन्तयति। प्रमादान् अपि आशङ्कते। आपदाम् अपहर्तुं विष्णुं शरणं प्राप्नोति।

**स्वावलोकनप्रश्नाः**

१.नन्दः मधुरापुरीं किमर्थम् अगमत् ?

२. वसुदेवः नन्दं किम् अपृच्छत् ?

३. वसुदेवेन किम् इति नन्दः निवेदितः ?

४. नन्दः किं विचिन्तयन् हरिं शरणं प्रपेदे ?

## ३.३.४.गोकुले उत्पाताः - शिशोः बालारिष्टानाम् अधिगमनम् :-

३.३.४.१पूतनायाः संहरणम्

३.३.४.१.१.पूतनायाः प्रवेशः

**(मूलम्)** १७.अथ कंसेन प्रहिता बालघातिनी पूतना नाम राक्षसी पुर-ग्राम-व्रजादिषु निर्दशान् अनिर्दशान् च शिशून् निघ्नती कामरूपितया अतिमनोहरं स्त्रीरूपम् आस्थाय एकदा नन्दव्रजम् उपागत्य किमेषा हरिं द्रष्टुं समागता श्रीः इति विस्मय-उत्फुल्ल-नयनाभिः व्रजाङ्गनाभिः अभिवीक्ष्यमाणा निश्शङ्कं सुपरिचिता इव नन्दभवनं प्राविशत्।

**(विवरणम्)**अयं वाक्यसमुदायः,पूतनायाः नन्दभवनप्रवेशं,वर्णयति।प्रकृते-कंसः शिशूनां हिंसने राक्षसान् नियमयति। तेषु पूतना अन्यतमा। राज्ये पुर-ग्राम-व्रजादिषु= यत्र कुत्रापि,स्थितान् जात दन्तान् अजातदन्तान् च शिशून् संहर्तुं कंसः तां नियोजयति। सा कामरूपिणी,मनेहरं स्त्रीरूपं धरति। कदाचित् नन्दव्रजम् आगच्छति। हरिं द्रष्टुम् आगता साक्षात् श्रीः इव सर्वान् आकर्षति। सर्वेषाम् आश्चर्यं जनयति। सर्वाः अपि व्रजाङ्गनाः नेत्राणि समर्प्य पश्यन्ति। ताः तथा पश्यन्ति एव । सा तु निर्भयं सुपरिचिता इव नन्दगृहं प्रविशति।

**स्वावलोकनप्रश्नाः**

१.कंसेन प्रहिता बालघातिनी राक्षसी का ?

२.बालघातिनी राक्षसी किं रूपम् आस्थाय नन्दव्रजम् उपागतवती ?

३.बालघातिनी व्रजाङ्गनाभिः कथम् अभिवीक्ष्यमाणा प्राविशत् ?

**३.३.४.१.२.पूतनायाः मरणम् :-**

**(मूलम्)** १८. तत्र च शिशून् विचिन्वती भस्मना-आच्छन्नम् अग्निम् इव प्रतिच्छन्न-निज-ऊरुतेजसं बाल -भावम् आपन्नं हरिम् अद्राक्षीत्। निसर्ग-विज्ञात-जगद्विचेष्टितः चर-अचरात्मा सोऽपि तां बालकमारिकाग्रहां विदित्वा, अज्ञातः इव बालभावेन निमीलितेक्षणः तस्थौ। सा तु रज्जुधिया सर्पम् इव तम् अर्भकम् अङ्कम् आरोप्य, सविषं स्तन्यं पाययितुम् आरेभे। जनन्यौ यशोदा-रोहिण्यौ अपि वरस्त्रियं तां वीक्ष्य तत्प्रभया मोहिते केवलं निरीक्षमाणे अतिष्ठताम्। बालभावम् आपन्नः भगवान् सरोषः कराभ्यां गाढं प्रपीड्य, तस्याः स्तनौ प्राणैः समं तस्याः स्तन्यम् अपिबत्। सा तु ' मुञ्च मुञ्च अलम् ' इति उच्चैः आक्रौशन्ती नेत्रे विवृत्य, चरणौ भुजौ च क्षिपती प्रस्विन्नगात्रा रुरोद।

**(विवरणम्)** अयं वाक्यसमुदायः,पूतनायाः मरणं, वर्णयति। पूतना च नन्दगृहे शिशून् अन्विष्यति। यथा अग्निः भस्मना (निर्गतज्वालस्य अग्नेः धूलिकणजालेन) आच्छादितः भवति, तथैव भगवान् विष्णुः आत्मनः तेजः आच्छाद्य बालभावेन प्रतिछन्नः विद्यते खलु। पूतना तादृशं हरिं पश्यति। भगवान् विष्णुः स्थावर-जङ्गमरूपः सहजतया एव जगतः चेष्टितानि सर्वाणि विजानाति। पूतनायाः राक्षसत्वम् अपि जानाति। परम् अजानन् इव विष्णुः बालभावेन पूतनया प्रसारितयोः हस्तयोः गच्छति। निद्राम् अभिनयति।जनाः रज्जुं दृष्ट्वा सर्पभ्रान्तिं प्राप्नु -वन्ति। तथा विष्णोः प्रभावम् अज्ञात्वा पूतना शिशुम् अङ्कम् आरोपयति। विषपूर्णं स्तन्यं पाययति। यशोदा- रोहिण्यौ तां वरस्त्रियं मन्येते। पूतनायाः सौन्दर्येण मोहिते स्तः। नेत्रे समर्प्य पश्यतः। नैव वारयतः। बालरूपः विष्णुः तु, रुष्टः सन्, पूतनायाः वक्षः भृशं पीडयति। स्तन्येन साकं पूतनायाः प्राणान् च पिबति। भगवतः प्रपीडनेन असहमाना पूतना 'मुञ्च मुञ्च अलम् ' इति उच्चैः रुदति। नेत्रे विवृते भवतः। पादौ हस्तौ च भूमौ पततः। शरीरं सन्नं भवति। पूतना प्राणान् त्यजति।

**स्वावलोकनप्रश्नाः**

१. बालभावम् आपन्नं हरिं बालघातिनी कथम् अद्राक्षीत् ?

२.हरिः बालघातिनीं कीदृशीं जानाति ?

३.भगवान् कथं तस्याःउबालघातिन्याः स्तन्यम् अपिबत् ?

४.सा= बालघातिनी कथं रुरोद ?

**३.३.४.१.३.पूतनायाः दुष्प्रभावः - नन्दशिशोः बालविचेष्टितम् :-**

**(मूलम्)** १९.तत् स्वनेन द्यौः मही च चचाल। दिशश्च प्रतिनेदुः। व्रजवासिनः च अशनिशङ्कया क्षितौ पेतुः। एवं सा निशाचरी अपगतासुः निजं रूपम् आस्थाय भूमौ अपतत्। पतता च तेन कलेबरेण गव्यूतिवर्तिनः द्रुमाः चूर्णिताः बभूवुः। ईषामात्रोग्रदष्ट्रास्यं गिरिकन्दरनासिकं गण्डशैलस्तनं प्रकीर्णारूणमूर्धजं शून्यतोयह्लदोदरं तत्कलेबरम् उद्वीक्ष्य,प्राक् तत्स्वनित-भिन्न-हृत्-कर्णमस्तकाः व्रजवासिनः गोपाः गोप्यश्च नितरां तत्रसुः। तस्याश्च उपरि क्रीडन्तम् अकुतो भयं लीलाबालकम् उद्वीक्ष्य जातसम्भ्रमाः गोप्यः समुत्पत्य तम् अगृह्णन्। यशोदा- रोहिणीभ्यां समन्तात् अस्य गोपुच्छ भ्रमणेन, गोमूत्रस्नपनेन, तत् तत् अङ्गेषु केशवादि-द्वादशनामभिः गोमयविन्या- -सेन च रक्षाविधिम् अकार्षुः। तदनु यशोदा पाययित्वा स्तनं, तं पर्यङ्के न्यवेशयत्।

**(विवरणम्)** अयं वाक्यसमुदायः, पूतनायाः मरणाक्रोशनस्य प्रभावम्-नन्दशिशोः बालविचेष्टितम् इति अंश -द्वयं वर्णयति। प्रकृते-पूतनायाः रोदनेन आकाशं चलति। भूमिः कम्पते। दिशः प्रतिध्वनन्ति। वज्रस्य पातः इति व्रजवासिनः निस्स्पृहाः भवन्ति। एवम् उपद्रवं सृजति। निजरूपं प्राप्नोति। प्राणान् त्यजति। भूमौ पतति। पूत -नायाः कलेबरस्य भूमौ पतनेन क्रोशद्वयदूरे स्थिताः वृक्षाः चूर्णं भवन्ति। पूतनायाः मुखम् अतिभयङ्करंभवति। तस्याः मुखे, ईषा = लाङ्गलदण्डः,तत्सदृशे तीक्ष्णे दंष्ट्रे स्तः। नासिकायाः पुटे च पर्वतगुहान् स्मारयतः। तस्याः स्तनौ गण्डशैलौ इव स्तः। (गण्डशैलाःउभूकम्पादिना पर्वतात् पतिताः महान्तः बृहदाकाराः

पाषाणाः) शिरसि केशाः अरुणाः सन्ति। विप्रकीर्णाश्च भवन्ति। जलशून्यं तटाकसदृशम् उदरं वर्तते। एवम् पूतनायाः कलेबरम् अतिविकृतं भयङ्करं च अस्ति।

**स्वावलोकनप्रश्नाः**

१.तत् (बालघातिनी) स्वनेन किं किं जातम् ?

२.सा (बालघातिनीं) कथं भूमौ अपतत् ?

३.व्रजवासिनः बालघातिन्याः कलेबरम् कीदृशम् उदीक्षन्त ?

४.यशोदा-रोहिण्यौ शिशोः कथं रक्षाविधिम् अकार्ष्टाम् ?

### ३.३.४.१.४.नन्दादीनां विस्मयः - पूतनाया- सद्गतिप्रसादनम् :-

**(मूलम्)** २०.तदैव मधुरातः व्रजम् उपागताः नन्दादयः तम् अवलोक्य सविस्मयाः,ज्ञानिना योगीश्वरेण वसुदेवेन ज्ञानचक्षुषा समीक्ष्य यत् अभिहितं तत् अवितथम् आसीत् इति अमंस्त। ततः व्रजौकसः तत्कलेबरं परशुभिः खण्डशः आच्छिद्य अदहन्। कृष्णनिर्भुक्ते र्निरस्त-अखिलदुरितस्य दह्यमानस्य तत्-देहस्य धूमः काल- अगररु- सौरभः आसीत्। जिघांसया अपि भगवते स्तन्यदानात् बालघ्नी सा राक्षसी पूतना सद्गतिम् अवाप। या च एनं भक्त्या प्रेम्णा च स्तन्यम् अपाययत्, यस्याश्च अङ्कं पद्भ्याम् आक्रम्य भगवान् स्तन्यम् अपिबत्, तासां यशोदादीनां भाग्यविशेषः किमु वक्तव्यः। नन्दः स्वभवनम् आसाद्य, गोपैः अभिवर्णितं पूतना-आगमनादिकं तन्निधनं निशम्य, सुविस्मितः पुत्रम् आदाय मूर्घ्नि उपाघ्राय,परिचुम्ब्य,परमां मुदं प्रपेदे।

**(विवरणम्)**अयं वाक्यसमुदायः,नन्दस्य विस्मयं,पूतनायाः सद्गतिं च वर्णयति।प्रकृते-नन्दः करं कंसाय समर्पयति। मित्रं वसुदेवं मिलति। उत्पातानां सम्भवम् प्रति वसुदेवस्य सूचनां स्वीकरोति। तदानीम् एव नन्दादयः व्रजम् उपागच्छन्ति। विकृतस्य भयङ्करस्य च पूतनायाः शरीरस्य उपरि शिशोः उल्लसनं च पश्यन्ति। आश्चर्यं आप्नुवन्ति।वसुदेवस्य सूचनां सत्यं भावयन्ति।

अनन्तरं व्रजवासिनः पूतनायाः कलेबरं, परशुभिः= कुठारैः, खण्डशः छिन्दन्ति, दहन्ति च। शिशुरूपस्य विष्णोः हस्ते मरणं प्राप्ता इति पूतनायाः समस्तं पापं निरस्तं भवति। शिशुरूपस्य

विष्णोः केवलं करास्फालनेन पूतनायाः शरीरं पवित्रं भवति। तथा पवित्रभूतस्य पूतनायाः शरीरस्य दहनात् जातः धूमः,काल-अगरु-सौगन्ध्यं वहति। हननेच्छया पूतना भगवते स्तन्यं ददाति। एवं सा बालानां घातुका तथापि, स्तन्यदानात् भगवान् विष्णुः पूतनायाः सद्गतिं प्रसादयति । हननेच्छया स्तन्यं दत्तवत्याः पूतनायाः विषये, भगवतः अनुग्रहः एवम् अस्ति!। या पुनः भक्त्या प्रेम्णा च स्तन्यम् पाययति,यस्याश्च अङ्कं पद्भ्याम् आक्रम्य भगवान् स्तन्यम् पिबति, तस्याः यशोदायाः विषये भगवतः अनुग्रहः कीदृशं भवति! तस्याः यशोदायाः भाग्यविशेषं वक्तुं न पारयामः।

नन्दः गृहम् आगच्छति। गोपाः पूतनायाः आगमनम्, तस्याः मरणं च नन्दाय कथयन्ति। नन्दः शृणोति। आश्चर्येण चकितः भवति। आनन्दभरितः भवति। शिशुं हस्तयोः गृह्णाति। शिरः जिघ्रति। शिशुम् अभिनन्दति।

**स्वावलोकनप्रश्नाः**

१.वसुदेवेन ज्ञानचक्षुषा समीक्ष्य अभिहितं किम् आसीत् ?

२.बालघातिन्याः कलेबरं कथं अदहन् ?

३.बालघातिनी कुतः सद्गतिम् अवाप ?

**३.३.५.शकटस्य भञ्जनम् :-**

**(मूलम्)** २१.एकदा यशोदा भगवतः लीलामानुषस्य अङ्गपरिवर्तन-जन्म-ऋक्ष-महोत्सव-प्रसङ्ग-समाहूत -व्रजपुरन्ध्री-जनेन गीता-वादित्र-स्वस्त्ययनादिपूर्वकं सुतस्य अभिषेचनं कारयित्वा,अभीष्ट-वस्त्र-आभरण- धेन्वादि -दानेन सुपूजित-ब्राह्मण-कृत-स्वस्त्ययनं निद्रा-निमीलीताक्षम् एनं शनैः शकटस्य अधस्तात् अशाययत्। तदनु तन्महोत्सव-व्यतिकर-समवेत-सुवासिनी-सत्कार-संरम्भ-व्यापृता नन्दपत्नी बालभाव-विडम्बनेन स्तनार्थिनं रुदन्तं बालकं न अपश्यत्। बालभाव-उत्क्षिप्त-तच्चरण-पल्लव-प्रतिहन्यमानम् उपरिस्थित-मनो -भग्न -चक्राक्ष -कूबरं विपर्यस्तम् आसीत्। सन्निहितानि च नानारसवन्ति भाण्डानि भग्नानि आसन्।

**(विवरणम्)** अयं वाक्यसमुदायः, शकटस्य भञ्जनं वर्णयति। प्रकृते-यशोदा कदाचित्, भगवतः लीलामानुषस्य = शिशोः, शरीरवर्धनसन्दर्भम्,जन्मनक्षत्रसन्दर्भं(जन्मनक्षत्रसन्दर्भः च प्रति मासम् आवर्तते) च पुरस्कृत्य उत्सवं प्रचालयति। तस्य उत्सवस्य यशोदा सर्वाः व्रजाङ्गनाः आह्वयति। गानं मङ्गलवाद्यं च समायोजयति। ब्राह्मणान् समाह्वयति। स्वस्तिवाचनम् आरचयति। तदा सुतं स्नापयति। अभिमतानि वस्त्राणि आभरणानि धारयति। ब्राह्मणेभ्यः धेनूः ददाति। ब्रह्मणान् पूजयति। तैः पुत्रस्य कृते आशीः दापयति। एतैः अलसितः सन् शिशुः निद्रां गच्छति। तं कस्यचन शकटस्य अधः शाययति। ततः यशोदा,उत्सवार्थम् आहूतानां सम्मानसंरम्भे अतिव्यापृता भवति। स्तन्याय रुदन्तम् अपि शिशुं न अनुसरति। शकटस्य अधस्तात् बालः शिशुतया पादौ उत्- क्षिपति। तस्य उत्क्षेपणेन शकटमध्यभागः विपर्यस्तः,विध्वस्तश्च भवति। समीपस्थानि पाकपदार्थवन्ति पात्राणि ध्वस्तानि च भवन्ति।

**स्वावलोकनप्रश्नाः**

१.यशोदा सुतस्य अभिषेचनं कथं कारितवती ?

२.यशोदा कुत्र सुतम् अशाययत् ?

३.नन्दपत्नी कुत्र व्यापृता ?

४.बालभाव-उत्क्षिप्त-तच्चरण-पल्लव-प्रतिहतं किम् ?

## ३.३.६.बालग्रहशङ्का-शान्तिहोमादिकं च :-

(मूलम्) २२.तत् महाध्वनेः प्रकम्पिताः यशोदा – रोहिण्यादयः व्रजसुन्दर्यः नन्दादयश्च समन्तात् परिवृताः अति विस्मिताः कथम् अयं शकटः निर्हेतुकं स्वयं विपर्यस्तः इति विचिन्तयन्तः,उत्पातशङ्कया नितरां विषादम् आपुः। सन्निहितैः गोपबालकैः 'रुदतः पादौ उत्क्षिपतः अस्य पादघातेन अयं विपर्यस्तः' इति निवेदिताः अपि लीलार्भकस्य भगवतः अस्य सामर्थ्यम् अविजानन्तः बालभाषितम् एतत् इति तेषां वचः न श्रद्दधिरे। रुदन्तं सुतम् आदाय यशोदा बालग्रहशङ्कया विप्रैः कृतस्वस्त्ययनम् एनम् स्तनम् अपाययत्। बलवद्भिः गोपैः

यथावत् स्थापितं सपरिच्छदम् एनं शकटं दधि–अक्षत–कुश–अम्बुभिः विप्राः अर्चयाञ्चक्रुः। नन्दोऽपि सुतस्य अरिष्टपरिहाराय समाहितैः विप्रैः शान्तिहोमादिकं स्वस्त्ययनं च अकारयत्।

(विवरणम्)अयं वाक्यसमुदायः,बाल–अरिष्टानाम् अपनोदनाय नन्दः शान्तिहोमादिकम् अनुष्ठापयति इति अंशं वर्णयति।प्रकृते –शकटः विपर्यस्तः भवति खलु। तदा हृदयविदारकः भयङ्करः च महान् शब्दः जायते। यशोदा–रोहिण्यादयः तु कम्पन्ते। नन्दादयः परितः निशितं भ्रमन्ति। अयं शकटः निष्कारणं शब्दं कुर्वन् कुतः एवं विपर्यस्तः इति चिन्तयन्ति। उत्पातः इति निर्धारणाय आगच्छन्ति। भृशं विषादं प्राप्नुवन्ति। समीपस्थाः गोपबालकाः 'अयं बालः रुदति,पादौ उत्क्षिपति। अर्भकस्य उत्क्षिप्तपादस्य, आघातेनउताडनेन, शकटः एवं विपर्यस्तः जातः' इति कथयन्ति। शिशोः महिमानम् एते न जानन्ति खलु। अतः बालभाषितम् एतत् इति बालकानां वचः श्रद्धया न स्वीकुर्वन्ति।

कोऽपि ग्रहः वा पिशाचः वा,भूतः वा आविष्टः इति भिया यशोदा ब्राह्मणान् आह्वयति। स्वस्ति वाचनं कारयति। आशीः दापयति। अनन्तरं सुतं स्तन्यं पाययति। महाबलशालिनः केचन गोपाः शकटं पूर्ववत् स्थापयन्ति। विप्राः दधिना–अक्षतैः–कुशैः–अम्बुभिः च एनं शकटं पूजयन्ति। नन्दः अपि सुतस्य अरिष्टपरिहाराय, विप्रान् समाह्वयति। शान्तिहोमादिकं स्वस्त्ययनं च कारयति।

**स्वावलोकनप्रश्नाः**

१.विस्मिताः नन्दादयः, किमिति विचिन्तिताः ?

२.गोपबालकैः नन्दादयः किम् इति निवेदिताः?

३.नन्दादयः गोपबालकानां वचः कुतः न श्रद्दधिरे ?

४.रुदन्तं सुतम् आदाय यशोदा किम् अकरोत् ?

## ३.३.७.तृणावर्तः :–

**(मूलम्)** २३.एकदा यशोदा सुतम् अङ्कम् आरोप्य लालयन्ती,गिरिकूटवत् अतिगरिमाणम् आवहन्तं तं वोढुम् असहमाना सविस्मयं तं भूमौ न्यवेशयत्। उत्पातशङ्कया च सा तत्परिहाराय परमेश्वरम् आदध्यौ।ततः तृणावर्तः नाम कंसप्रचोदितः राक्षसः चक्रवातरूपेण आगत्य आसीनम् एनं बालकं हत्वा,भीषणध्वनिना दिशः विदिशश्च प्रपूरयन्, सः चक्रवातः

क्षणेन समन्ताद् गोकुलं पांसुवर्षेण आच्छादयामास। तेन च सकलम् अपि गोष्ठम् अन्धकारावृतम् इव अनवाप्तचक्षुःप्रसरम् आसीत्। आत्मानं परं वा न कोऽपि अपश्यत्। किञ्चत् उपरते च पांसुवर्षे नन्दपत्नी सन्निहितं बालकम् अपश्यन्ती मृत-वत्सा गौः इव भूमौ निपत्य अरुदत्। तत् उपसृत्य तत्र नन्दसूनुम् अपश्यन्त्यः अन्या अपि व्रजस्त्रियः उच्चैः आचुक्रुशुः। बालकस्तु स्वापहारिणं तम् असुरं गले दृढम् अगृह्णात्। क्रमेण दुर्वहभारं तम् अर्भकं मोचयितुम् अशक्नुवन्,सः तृणावर्तः गलग्रहणनिश्चेष्टः निर्गतलोचनः अव्यक्तरावः अपगतासुः सह बालकेन गगनतलाद् भूमौ न्यपतत्। कठिन-शिलातल-निपतनेन विशीर्ण-सर्व- अवयवकस्य तस्य-उरसि लम्बमानम् अन्तकमुखात् विनिर्गतम् इव बालकम् आदाय अतिविस्मिताः गोप्यः यशोदायै ददुः। नन्दादयः गोपाः गोप्यश्च सुतलाभेन परमां मुदम् अवापुः।सर्वथा खलः स्वपापेन हिंसितो भवति, साधुस्तु स्वकर्मणैव भयात् विमुक्तः भवति इति गोपाः तत्र परस्परम् ऊचुः। नन्दोऽपि बृहद्वने पुनः पुनः प्रसक्तानि उत्पातानि दृष्ट्वा वसुदेवोदितं न मृषा इति अमंस्त।

**(विवरणम्)** अयं वाक्यसमुदायः, अर्भकः तृणावर्तनामानं राक्षसं हन्ति, इति अंशं वर्णयति। प्रकृते – कदाचित् यशोदा बालकम् अङ्के उपवेशयति। प्रेम्णा लालयति । अङ्कस्थः शिशुः,कुतः वा, अकस्मात् पर्वतशिखरः इव महान् भारभूतः भवति। यशोदा बालकं वोढुम् सोढुं च अशक्ता भवति। आश्चर्येण अर्भकं क्षितौ क्षिपति। परिशीलनानन्तरम् एतत् उत्पातम् इति अवगच्छति। भयम् उपैति। उत्पातात् अर्भकस्य रक्षणाय भगवन्तं प्रार्थयति।

वस्तुतः तृणावर्तः कश्चन कंसेन चोदितः राक्षसः अस्ति। वायोः प्रबलैः आवर्तनैः आवृतः तत्र आयाति। यशोदायाः अङ्के उपविष्टं बालकं हरति। तदा तृणावर्तः महत् स्वनम्= भयोत्पादकं ध्वनिं करोति। दश दिशः, आत्मना = गाढवायुना, व्यापयति। गोकुलम्= व्रजं, परितः पाषाणान् वर्षति। व्रजं अन्धकारे स्थापयति। तदा व्रजे कः अपि परस्परं द्रष्टुम् अपि न पारयति। किञ्चित्कालानन्तरं क्रमशः पाषाणवृष्टिः विरता भवति। प्रकाशः जायते। यदा पुरतः स्थापितं अर्भकं द्रष्टुम् अभिलषति, तदा सः न दृश्यते। अर्भकस्य अदर्शनेन वत्से मृते गौः यथा वा विलपति, तथा यशोदा भूमौ निपत्य रुदति। यशोदायाः रोदनं श्रुत्वा अन्याः गोप्यः अर्भकम् अन्विष्यन्ति। परं नैव अर्भकं लभन्ते। उच्चैः क्रोशन्ति च।

एवं स्थिते बालकः आत्मनः अपहारिणं तृणावर्तस्य कण्ठं गृह्णाति। भृशं तृणावर्तं पीडयति । सः अपि क्रमशः बालकस्य पीडाभारं वोढुं न सहते। बालकस्य पीडनात् मोचयितुम् अपि न शक्नोति। कण्ठस्य दृढं ग्रहणात् निश्चेष्टः भवति। नेत्रे निर्गते भवतः। मुखात् वचः न निस्सरति। प्राणान् च त्यजति। एवं तृणावर्तस्य कलेबरं बालकेन सह आकाशात् अधः शिलातले पतति। तृणावर्तस्य कलेबरं चूर्णं भवति। तस्य उरसि निर्भयं सोल्लासं विहरन्तम्

अर्भकं पश्यन्ति। तत्रस्थाः मृत्युमुखं प्रविश्य भाग्यववशात् बहिरागतं भावयन्ति। बालकं स्वीकुर्वन्ति। यशोदायै यच्छन्ति। व्रजवासिनः नन्दादयः गोपाः गोप्यः च सुतस्य लब्ध्या भृशं मोदन्ते।'यथाकथम् अपि दुष्टः शिक्षाम् आप्नोति, साधुः तु रक्षाम् आप्नोति एव। अयं हि प्रकृतिनियमः ' इत्येवं व्रजवासिनः परस्परं कथयन्ति। नन्दः पुनः एकवारम्,उत्पातसम्भवं प्रति वसुदेवेन कथितं, स्मरति। वसुदेवस्तु सत्यम् एव कथितवान् इति चिन्तयति।

**स्वावलोकनप्रश्नाः**

१.तृणावर्तः कः ?

२.तृणावर्तः किम् अकरोत् ?

३.चक्रवातः क्षणेन किं चकार ?

४.बालकम् अपश्यन्ती यशोदा कथम् अरुदत् ?

५.तृणावर्तः कथं भबमौ अपतत् ?

## ३.४.उपसंहारः

एवम् अत्र कंसः साधूनाम्,शिशूनां च हिंसने दैत्यान् नियोजयति। नन्दश्च सानन्दं पुत्रोत्सवं निर्वहति। नन्दः करस्य (TAX) समर्पणव्याजेन वसुदेवं मिलति। वसुदेवः च गोकुले उत्पातानां सम्भवं सूचयति। शिशुश्च बालारिष्टान् अधिगच्छति। पूतनां पीडयति। शकटासुरं भञ्जयति। तृणावर्तं हन्ति। एते च विशेषाः, पाठकानां, कंसस्य क्रूरताम्, भगवतः शिशोः श्रीकृष्णस्य कारुण्यम्,महिमातिशयं च ख्यापयन्ति।

## ३.५.अभ्यासाः

अ). नन्द-यशोदयोः पुत्रजननोत्सववृत्तान्तं वर्णयत ?

इ). कंसस्य क्रूरताम्, भगवतः शिशोः श्रीकृष्णस्य कारुण्यम्, महिमातिशयं च वर्णयत ?

उ). एतत् गद्यपठन -अनुभूतिः कीदृशी ? नामतः अनुभुतिविशेषान् विशदयत ?

# UNIT-IV
# श्रीकृष्णस्य बाल्यम्

**संरचना**

४.१.परिचयः
४.२.लक्ष्याणि
४.३.श्रीकृष्णस्य बाल्यम्
४.३.१.गर्गस्य आगमनम्
४.३.२.नामकरणम्
४.३.३.राम – कृष्णयोः बाल्यम्
४.३.४.श्रीकृष्णस्य बालचेष्टितानि
४.३.५.गोपीनां विस्मयः
४.३.६.यशोदायाः विस्मयः
४.३.७.नन्द-यशोदयोः पूर्वजन्मवृत्तान्तम्
४.३.८.श्रीकृष्णस्य अद्भुतकर्माणि
४.३.८.१.यशोदायाः विस्मयः
४.३.९.नलकूबर-मणिग्रीवकयोः अनुग्रहणम् (प्रसादः)
४.३.१०.फलविक्रयिण्याः अनुग्रहणम् (प्रसादः)
४.४.उपसंहारः
४.५.अभ्यासः

## ४.१.परिचयः

अयं पाठ्यांशः कृष्णचरितस्य प्रथमखण्डे २४-३४ (Para graph) पर्यन्तं प्रचलति। तृतीये पाठ्यांशे (UNIT-III) योगमायायाः (स्त्रीशिशोः) तर्जनम्,कंसस्य आन्दोलनम्, निर्दाक्षिण्यतया भुवि स्थितानां शिशूनां सर्वेषां हननाय राक्षसानां नियमनम्, भगवता तेषां संहरणम् इति एते विषयाः प्रस्तुताः। अनन्तरं प्रकृते चतुर्थपाठ्यांशे (UNIT-IV) राम-कृष्णयोः नामकरणम्,व्रजे श्रीकृष्णस्य बालचेष्टितानि,गोपीनां यशोदायाः च आनन्दम् आश्चर्यं च अभिवर्णितम्। नन्द-यशोदयोः पूर्वजन्मवृत्तान्तम्,नलकूबरमणिग्रीवकफल-विक्रयिणीनाम् अनुग्रहणम्, इति एते अंशाः बोध्यन्ते। अत्र च गद्यम् आसक्तिं जनयति। कथाकथनं कुतूहलं

वर्धयति। व्रजे वर्णितानि श्रीकृष्णस्य बालचेष्टितानि श्रीकृष्णस्य मुग्धतां ,मनोहरतां च आविष्कुर्वन्ति। पाठकानाम् आनन्दम्, अनुभूतिं च जनयन्ति।

## ४.२.लक्ष्याणि

शतानि संवत्सराणि मानवस्य सम्पूर्णम् आयुः। तत्र शैशवम्, बाल्यम्, कौमैरम्, यौवनम्, वार्धकम् इति अवान्तराः आयुषः दशाः विद्यन्ते। सर्वः अपि एताः दशाः अधिगच्छेत् एव। एतासु दशासु एकैका स्वीयं स्वीयं वैशिष्ट्यं वहति एव। एताः दशाः सर्वाः अपि मानवस्य कर्मणः फलात्मकतया,कदाचित् सुखम्,कदाचित् दुःखम्, कुत्रचित् कष्टम्, कुत्रचित् नष्टम्,क्वचित् लाभम्, च कल्पयन्ति। परम् अवतारपुरुषस्य भगवतः शैशवादि दशाविशेषाः तु सर्वत्र सर्वदा सर्वेषां प्रमोदम् एव कुर्वन्ति। उल्लासं कल्पयन्ति। विनोदं-विज्ञानं च वितरन्ति। आश्चर्यम् आनन्दं च आरचयन्ति। भगवति विश्वासं वर्धयन्ति। मानवान् आस्तिकान् कुर्वन्ति। प्रेमपूर्णान् संस्कारसम्पन्नान् च कुर्वन्ति। प्रकृते अवतारपुरुषः श्रीकृष्णः स्वेन बाल्येन कथं आश्चर्यं जनयति ?कीदृशम् आनन्दं वितनोति ? कम् अनुगृह्णाति ? विज्ञानं कथं वर्धयति ? विनोदं केषु वितरति इति एतेषां विषयाणां बोधनम् अत्र भवति। एतत् पाठ्यांशस्य अध्ययनेन :-

- आधुनिकसंस्कृतगद्यं प्रति परिचितः भवति।
- आधुनिकसंस्कृतगद्यस्य माध्यमेन पौराणिककथायाः परिचयः सम्पादितः भवति।
- संस्कृतगद्यस्य माध्यमेन सरलसंस्कृतस्य भाषणे,सरलवाक्यरचनायाः निर्माणे,प्रवीणः भवति।
- श्रीकृष्णस्य बालचेष्टितानि पठितुं प्रभवति।
- गोपीनां यशोदायाश्च आश्चर्यानुभूतिम्, आनन्दानुभूतिं च लिखितुं पारयति।
- नन्द-यशोदयोः पूर्वजन्मवृत्तान्तं वक्तुं समर्थः भवति।
- नलकूबर-मणिग्रीवकयोः अनुग्रहं ज्ञातुं प्रभवति।
- भगवतः कारुणिकतां दिव्यत्वं प्रति च अवगाहनापरः भवति।

## ४.३.श्रीकृष्णस्य बाल्यम्

४.३.१.गर्गस्य आगमनम् :-

**(मूलम्)** २४.एकदा यशोदा स्व-अर्भकम् अङ्कम् आरोप्य प्रस्नुतं स्तनं पाययन्ती, स्नेह-परिप्लुता रुचिरस्मितं तद्-आननम् अपश्यत्। निवृत्त-स्तन्य-पानस्य जृम्भतः तस्य मुखे चराचरात्मकं सकलम् अपि विश्वं वीक्ष्य सञ्जातवेपथुः अतिविस्मिता नेत्रे न्यमीलयत्। अतिक्रान्तेषु कतिषुचित् दिनेषु वसुदेवप्रचोदितः यदुपुरोहितः महातपाः गर्गः नन्दव्रजम् अगच्छत्। परां

प्रीतिम् उपगतः नन्दः प्रत्युत्थाय कृताञ्जलिः अधोक्षजधिया तम् आनर्च। कृतातिथ्यं सुखोपविष्टम् एवम् अतर्कित-उपनतं परावरज्ञं तं नन्दः प्रत्युद्गमन-अभिवादादिना यथार्हं सत्कृत्य, एवम् उवाच 'भगवन्। त्वं हि ब्रह्मविदां श्रेष्ठः। किञ्च नृणां जन्मना ब्राह्मणो गुरुः। अतः अनयोः दारकयोः द्विजजातिसंस्कारं कर्तुमर्हसि' इति।

**(विवरणम्)**अयं वाक्यसमुदायः गर्गस्य आगमनम् -बलराम-कृष्णयोः द्विजाति-संस्काराणाम् आचरणाय नन्दस्य प्रार्थनम् इति अंशद्वयं वर्णयति। कदाचित् यशोदा अर्भकं पुत्रम् अङ्कम् आरोपयति। पयः पाययति । अर्भकः पुत्रः, विष्णु-अंश सम्भूतः खलु। अतः दिव्यकान्त्या पुत्रस्य आननं सुन्दरं स्मितपूर्णं च विराजते। पयः पाययन्ती यशोदा तत्परतया पुत्रस्य स्मितपूर्णम् आननं पश्यति। अनुभूतिम् एति। आनन्दपरवशा भवति। अनन्तरं पुत्रः पयः पानं समापयति। अलसतया मुखं जृम्भति। तदा यशोदा पुत्रस्य मुखे स्थावरजङ्गमात्मकं विश्वं समस्तम् अवलोकते। तथा दृष्ट्वायशोदा भयम् एति। कम्पनम् आप्नोति। आश्चर्यम् अनुभवति। नेत्रे निमीलति। तदा तदा पुत्रः यशोदायाः, एवम् आनन्दम् आश्चर्यं च जनयति। ततः कानिचित् दिनानि अतीतानि भवन्ति। गर्गः कश्चन तपस्वी अस्ति। सः यादवानां श्रेयोभिलाषी पुरोहितः। वेदविहितसंस्काराणाम् अनुष्ठानाय नन्दव्रजं गन्तुं वसुदेवः गर्गं प्रार्थयति। वसुदेवस्य प्रार्थनया प्रचोदितः गर्गः नन्दकुलं गच्छति। गर्गस्य आगमनाय नन्दः प्रीणाति। उत्तिष्ठति। अभिमुखं गच्छति। अञ्जलिं बध्नाति। विष्णुम् इव ,गर्गं विधेयपूर्णम् अर्चयति।गर्गश्च आतिथ्यं स्वीकरोति। सुखम् उपविशति। तदा नन्दः गर्गं समेत्य 'भगवन् ! रोहिणीपुत्रस्य, यशोदायाः पुत्रस्य च जन्मसंस्कारान् अनुतिष्ठतु ' इति प्रार्थयति।

**स्वावलोकनप्रश्नाः**

१.यशोदा अतिविस्मिता सती नेत्रे किमर्थं न्यमीलयत् ?

२.वसुदेवप्रचोदितः यदुपुरोहितः कः ?

३.नन्दः गर्गं कथम् आनर्च ?

४.'त्वं हि ब्रह्मविदां श्रेष्ठः' इदं वाक्यं कं प्रति कस्य वचनम् ?

५.नन्दः गर्गं किम् उवाच ?

## ४.३.२.नामकरणम्

**(मूलम्)** २५. एवं सम्प्रार्थितः सः 'यदूनाम् अहम् आचार्यः' इति सुप्रसिद्धम्। यदि अहम् अनयोः संस्कारं कुर्यां तदा तव वसुदेवस्य च सख्यम्, देवकीदारिकावचनम्, अशरीरवाक्-प्रत्ययेन 'देवक्याःअष्टमः गर्भः न स्त्री भवितुम् अर्हति ' इति च विचिन्त्य क्रूरः औग्रसेनिः एनं हन्यात्। तदा महान् अनर्थः आपतेत् इति उवाच। 'भगवन् ! मामकैः अपि अलक्षितः अत्र वसामि। अतः गूढं संस्कारं कुरु' इति भूयः नन्देन प्रार्थितः स स्वचिकीर्षितं निर्वर्त्य रोहिणीपुत्रस्य गुणैः अभिरामकतया रामः इति, बलाधिक्येन बलः इति, विमतानां यदूनाम् ऐकमत्यसाधकतया सङ्कर्षण इति च नामत्रयं भवति। भवत्-तनयस्तु कृष्णवर्णतया कृष्णः इति उच्यते। वसुदेवेन प्राक् ज्ञातत्वात् वासुदेवः इति अपि उच्यते। किञ्च अस्य गुण-कर्म-अनुसारेण बहूनि नामानि सन्ति। तानि सर्वाणि अपि अहम् अन्ये अपि जनाः न जानन्ति। अयं च ते व्रजस्य च श्रेयः आधास्यति। किञ्च पुरा अनेन बहवः दस्युपीडिताः साधवः रक्षिताः आसन्। ये चास्मिन् मानवाः परां प्रीतिं कुर्वन्ति न तेषां शत्रवो भवन्ति। तस्मात् तव अयम् आत्मजः गुणैः साक्षात् नारायणसमः। अतः एवं समाहितः गोपाय ' इति नन्दं समादिश्य गर्गाचार्ये गते सति, नन्दः एनं परमात्मानम् अमन्यत।

**(विवरणम्)**अयं वाक्यसमुदायः बलराम-कृष्णयोः नामकरणवृत्तान्तं वर्णयति। गर्गः नन्दस्य प्रार्थनां शृणोति। 'उत्सवपूर्वकं रोहिणीपुत्रस्य, यशोदायाः पुत्रस्य च संस्काराणाम् अनुष्ठानं, कंसस्य अनुमानं जनयति। तदा कंसः कुपितः भवति। क्रोधेन इमं तव शिशुं हन्ति च। तथा करणे महान् अनर्थः सम्भवति' इति गर्गः नन्दं सन्दिशति। यः कोऽपि यथा न जानाति तथा, रहसि उमत्कृते अपि दूरतः, संस्कारम् आचरतु इति नन्दः पुनः पुनः गर्गं प्रार्थयति। तस्य प्रार्थनाम् गर्गः अङ्गीकरोति। एकान्ते, तयोः= रोहिणीपुत्र-यशोदापुत्रयोः,गर्गः जन्मसंस्कारान् निर्वहति। अनन्तरं नामकरणं च करोति। तत्र रोहिणीपुत्रे अभिरामाः उआनन्ददायकाः,गुणाः सन्ति। अतः रामः इति एकं नाम कृतम्। रोहिणीपुत्रः बलशाली च। तस्मात् बलः इत्यपि द्वितीयं नाम विहितम्। अपि च रोहिणीपुत्रः सङघटनसाधकःउअभिप्रायभेदान् अपाकृत्य यादवेषु ऐक्यतायाः साधकः भविष्यति इति दृष्ट्या सङ्कर्षणः इति तृतीयम् अपि नाम दत्तम्। एवम् आहत्य रोहिणीपुत्रस्य नामत्रयं भवति। यशोदायाः पुत्रः तु कृष्णवर्णःउनीलमेघश्यामः,भवति । अतः तस्य कृष्णः इति एकं नाम कृतम्। प्रथमं वसुदेवेन दृष्टः। तस्मात् वासुदेवः इति व्यवहारम् अपि आप्नोति। अस्य सहस्रशः नामानि सन्ति। तानि ये केऽपि वा न जानन्ति। कृष्णः गोकुलस्य कीर्तिं प्रतिष्ठां च आर्जयति। अयं दुष्टशिक्षणं-शिष्टरक्षणं च करोति। कृष्णे प्रीत्या व्यवहर्तॄणां शत्रवः न भवन्ति। अयं विष्णुसदृशः, अतः अमुं कृष्णं सावधानेन पोषय, पालय च

इति, गर्गः नन्दं सन्दिशति, गच्छति च। नन्दश्च कृष्णं परमात्मानं भावयति। उग्रसेनस्य अपत्यम् पुमान् = औग्रसेनिः,तद्धित(इञ्) प्रत्ययान्तं पदम्,उग्रसेनस्य पुम् सन्ततिः,कंसः इत्यर्थः। वसुदेवस्य अपत्यम् पुमान्उवासुदेवः,तद्धित(अण्)प्रत्ययान्तं पदम् ,वसुदेवस्य पुम् सन्ततिः,कृष्णःइत्यर्थः।

**स्वावलोकनप्रश्नाः**

१.रोहिणीपुत्रस्य नामत्रयं किम् ?

२.रोहिणीपुत्रस्य सङ्कर्षणः इति नाम केन आशयेन कृतम् ?

३.नन्द-नन्दनः किमर्थं कृष्णः इति उच्यते ?

४.नन्द-नन्दनस्य वाससुदेवः इति व्यवहारः कुतः जातः ?

५.नन्दः तनयं कथम् अमन्यत ?

### ४.३.३.राम - कृष्णयोः बाल्यम् :-

**(मूलम्)**२६.गच्छता च कालेन रामकृष्णौ मुग्ध-विलोकितैः रुचिर-स्मितैः अव्यक्तध्वनिभिः जानुचङ्क्रमणैः मात्रोः व्रजसुन्दरीणां च अमन्दम् आनन्दं जनयामासतुः। इतस्ततः पर्यटन्तीः व्रजस्त्रियः अनुसृत्य, कतिचित् पदानि गत्वा, भीतभीतौ इव पुनः परावृत्य,मात्रोःअन्तिकम् उपेयतुः। तत् मातरौ अपि तौ आलिङ्ग्य प्रस्नुत-पयोधर्यौ अपाययताम्। प्रगृहीतपुच्छैः गोवत्सैः इतस्ततः अनुकृष्यमाणम् इदं दारकद्वयम् अवेक्षमाणाः व्रजस्त्रियः विस्मृत-गृहव्यापाराः प्रहसन्त्यः जहृषुः। जानु-चङक्रमणैः पुनः पुनः इतस्ततः पर्यटन्तौ इमौ जल-अग्नि-कण्टकिद्रुमेभ्यो निवारयितुम् अनुक्षणं व्यग्रमानसे तत्-मातरौ आवश्यकानि गृहकर्माणि यथापूर्वं निर्वर्तयितुं न शेकतुः। क्रमेण आकृष्टजानुभिः पद्भिः झटिति चरन्तौ इमौ सवयोभिः गोपबालकैः सह क्रीडन्तौ कौमारचापलानि कुर्वन्तौ व्रजनिवासिनाम् अतिशयितां मुदम् आदधतुः।

**(विवरणम्)** अयं वाक्यसमुदायः बलराम-कृष्णयोः बाल्यदशां वर्णयति। कालः गच्छति। बलराम-कृष्णौ शैशवं त्यजतः। बाल्ये पदं क्षिपतः। तयोः मुखे सौन्दर्येण मनोहरे भवतः। स्मितं= ईषत् हसनं, वहतः। स्पष्टं वदतः। जानुभिः चङ्क्रमणं= उल्लङ्घनं (LEAP) कुरुतः। एतानि तयोः सर्वाणि चेष्टितानि रोहिणी -यशोदयोः, सर्वासां व्रजस्त्रीणां च अपरिमितम्

आनन्दं जनयन्ति। बालकौ एतौ गोपाङ्गनाः कानिचित् पदानि अनुसरन्ति। पुनः निवर्तन्ते । भीतौ इव स्वस्वमातरौ आप्नुतः। समालिङ्गतः। जनन्योः अङ्के पयः पिबतः। अनन्तरं कदाचित् गोवत्सानां पुच्छान् गृह्णन्ति। इतस्ततः गोवत्सान् कर्षन्ति। व्रजस्त्रियः तादृशौ बालकौ पश्यन्त्यः गृहकार्यकलापं विस्मरन्ति। प्रहसन्ति, प्रहर्षन्ति च। एतौ इतस्ततः लङ्घेते। लङ्घने कुत्रापि जलात्, अग्नेः , कण्टक-द्रुमेभ्यश्च प्रमादः सम्भवेत् इति यशोदा-रोहिण्यौ व्यग्रमानसे भवतः । यथाकालं गृहकर्माणि आचरितुम् अपि न पारयतः। किञ्च समानवयस्कैः गोपबालकैः क्रीडतः। कौमारचापलानि प्रदर्शयतः। गोकुलवासिनाम् आनन्दम् आधास्यतः।

**स्वावलोकनप्रश्नाः**

१.रामकृष्णौ मात्रोः कथम् आनन्दं जनयामासतुः ?

२.मातरौ अपि रामकृष्णौ किम् अकुरुताम् ?

३.व्रजस्त्रियः रामकृष्णौ अवेक्ष्य कथं जहृषुः ?

४.मातरौ आवश्यकानि गृहकर्माणि यथापूर्वं निर्वर्तयितुं कुतः न शेकतुः ?

५.रामकृष्णौ किं किं कुर्वन्तौ व्रजनिवासिनाम् मुदम् आदधतुः ?

### ४.३.४.श्रीकृष्णस्य बालचेष्टितानि :-

**(मूलम्)** २७.कदाचित् मातरि शृण्वत्यां श्रीकृष्णम् उद्दिश्य व्रजस्त्रियः एवम् ऊचतुः- 'अतिचपलोऽयमर्भकः अदोहनकाले गोवत्सान् मोचयति। मधुरं पयश्च सरहस्यम् अत्ति। अवशिष्टं मर्कटेभ्यः विभजति।यत्र क्वापि गृहे द्रव्य-अलाभे तत्र प्रसुप्तान् अर्भकान् ताडयित्वा,आक्रोश्य,गच्छति। शिक्यादि-निक्षिप्त-दधि-पयो-भाण्ड-निहित- दधि-पयो-नवनीतादि-ग्रहणाय पीठक-उलूखलादि-साधनानि उपयुङ्क्ते।तदलाभे दारूणा,लोष्ठादिना वा भाण्डानि सच्छिद्राणि करोति ' इति। जननी तु अस्य बाल्यचापलं शृण्वती प्रहसन्ती प्रेमातिशयेन न उपालब्धुम् ऐच्छत्।

**(विवरणम्)** अयं वाक्यसमुदायः बालकृष्णस्य बाल्यविलसितानि वर्णयति। कदाचित् यशोदातनयस्य कृष्णस्य चपलकर्माणि उद्दिश्य व्रजस्त्रियः एवं परस्परं कथयन्ति- यशोदातनयः कृष्णः भृशं चपलः अस्ति। अयम् अर्भकः असमये गोवत्सान् मोचयति। गोभ्यः पयः पाययति। सम्पादितं

संरक्षितं च पयः यावदभीष्टं रहसि पिबति। अवशिष्टं वानरेभ्यः विभजति= DISTRIBUTE करोति। यत्र क्वचित् दध्यादिकं न प्राप्नोति, तत्र गृहे स्थितान् प्रसुप्तान् बालकान् ताडयति। आक्रोशयति च। शिक्यम् = पाशैः कृतं, लम्बमानं, दधि–पयो–भाण्डानां निक्षेपणस्थानम्, तत्र क्रमेण दधि–पयो–नवनीतादिकं स्थाप्यते। तद्–ग्रहणाय, गृहस्थं पीठकादिकं = stool इत्यादिकं यदि विद्यते तत् आनयति। पीठकादिकस्य अभावे पाषाणेन दधि–पयो–भाण्डानि भिनत्ति। अधः स्थित्वा एव यावदभीष्टं पिबति खादति च इति। अमुं कृष्णस्य बाल्यचापलं (दुर्विलसितानि/चपलकर्माणि)यशोदा शृणोति। किञ्चिदिव हसति। वात्सल्यकारणतः किमपि दण्डितुं न पारयति। ताडयित्वा; क्त्वा(त्वा)–प्रत्ययान्तम्, कृत्वा, पठित्वा,लिखित्वा प्रभृतीनि उदाहरणान्तराणि। आक्रोश्य;ल्यप्(य)–प्रत्ययान्तम्, आगत्य, आचम्य.आदाय,प्रभृतीनि उदाहरणान्तराणि।

**स्वावलोकनप्रश्नाः**

१.व्रजस्त्रियः किम् ऊचुः ?

२.अर्भकः गोवत्सान् कदा मोचयति ?

३.कृष्णः किं किं रहस्यम् अत्ति ?

४.भाण्ड–निहित–दधि–पयो–नवनीतादि–ग्रहणाय कानि उपयुङ्क्ते ?

५.जननी कुतः तम् उपालब्धुं न ऐच्छत् ?

### ४.३.५.गोपीनां विस्मयः

**(मूलम्)** २८.एकदा गोप्यः स्व–स्व–गृहान् प्रविश्य सरहस्यं नवतीतादि–भक्षयन्तम् एनं श्रीकृष्णं पृथक् पृथक् उपगृह्य तद्–अपराधनिवेदनाय यशोदा–निकटम् आगत्य, मातुः समीपे निभृतम् उपविष्टम्, स्वनिकटे अपरिदृश्यमानं च तं समीक्ष्य सलज्जाः सविस्मयाश्च न्यवर्तन्त।

**(विवरणम्)** अयं वाक्यसमुदायः, बालकृष्णस्य विलसितैः गोपाङ्गनाः विस्मयम् एष्यन्ति इति अंशं वर्णयति। कदाचित् कृष्णः युगपत् एव गृहेषु प्रविशति। तत्र प्रतिगृहे, एकान्ते नवनीतादिकं च भक्षयन् अस्ति। व्रजवासिन्यः अङ्गनाः स्व–स्व गृहेषु एकान्ते नवनीतादिकं

च भक्षयन्तं कृष्णं प्रत्येकशः गृह्णन्ति। कृष्णस्य अप -राधं निवेदितुम् एकस्मिन्नेव समये यशोदायाः सकाशम् आगच्छन्ति। तदा ते,यशोदायाः अङ्के साधु उपविष्टं कृष्णं पश्यन्ति। स्वहस्तैः बद्धः, स्वयम् आनीतस्तु कृष्णः तासां हस्तेषु अदृष्टः भवति। सर्वाः अपि युगपत् आश्चर्यं प्राप्नुवन्ति। लज्जिताः भवन्ति। विस्मयं यान्ति। स्व-स्वगृहाणि गच्छन्ति। प्रविश्य,उपगृह्य,आगत्य,समीक्ष्य;ल्यप्(य)-प्रत्ययान्तरूपाणि। भूतकालिक असमापक-क्रियारूपाणि (Past Infinitives) भक्षयन्तम्;शतृ(अत्)-प्रत्ययान्तरूपाणि। वर्तमानकालिक-असमापकक्रियारूपाणि(Present Infinitives/ Participle)

**स्वावलोकनप्रश्नाः**

१.गोप्यः किमर्थं सलज्जाः सविस्मयाश्च न्यवर्तन्त ?

२.गोप्यः किमर्थं यशोदा-निकटम् आगताः ?

३. गोप्यः श्रीकृष्णं कथं समीक्षिताः ?

**४.३.६.यशोदायाः विस्मयः :-**

**(मूलम्)** २९.कदाचन सरामाः गोपबालकाः समेत्य 'कृष्णः मृदम् अभक्षयत्'इति यशोदायै न्यवेदयन्। हितैषिणी सा भय-सम्भ्रान्त-प्रेक्षण-अक्षम् एनं करे गृहीत्वा,निर्भर्त्स्य 'कुतः त्वं रहः मृदं भक्षितवान् ? तव भ्राता रामः अपि वक्ति इति अपृच्छत्। कृष्णस्तु ' न अहम् अम्ब ! मृदम् अभक्षयम्। सर्वे एते मिथ्यावादिनः ' इति उवाच। 'तर्हि मुखं व्यादेहि ' इति मात्रा प्रचोदितः सः मुखं व्याददौ। विदारिते तदास्ये, सा साब्धिद्वीपां वसुन्धरां नभोमण्डलं रसातलम् इत्यादि कृत्स्नं जगत् सव्रजम् आत्मानं च दृष्ट्वा , किम् अयं स्वप्नः ? उत देवमाया ? आहोस्वित् मम चित्तमोहः ? उत अस्यैव मम अर्भकस्य जन्मसिद्धः कश्चन अत्मयोगः ? इति वितर्क्य निश्चेतुम् अक्षमा जगत्-उत्पत्ति-स्थिति-लय-कारणःअयं साक्षात् परमेश्वरः इति ज्ञात्वा नमश्चकार। इत्थं विदिततत्त्वायां यशोदायां भगवान् पुनरपि पुत्र स्नेहमयीं मायां व्यतनोत्। तया च नष्टमतिः सा पुत्रम् अङ्कम् आरोप्य प्रवद्ध-स्नेह-कलित-हृदया चुचुम्ब। तं च उपनिषद्-वेद्यं साक्षात् अजं मेने।

**(विवरणम्)** अयं वाक्यसमुदायः यशोदायाः विस्मयकरसङ्घटनां वर्णयति। काचित् बलरामः, अन्ये बालकाश्च यशोदायाः, निकटम्= समीपम्, आगच्छन्ति। कृष्णः, मृदम्= मृत्तिकाम्, खादति इति निवेदयन्ति। कृष्णस्य, हितम्उ आरोग्यम्, इच्छन्ती यशोदा कृष्णं

तीक्ष्णं पश्यति, तर्जयति, भापयति च। कृष्णश्च भयम् एति। सम्भ्रान्तः भवति। कृष्णस्य नेत्रे कातरे भवतः। तादृशं कृष्णं हस्तयोः स्वीकरोति। सान्त्वयति। 'कियतीं मृदं खादसि ? कथं मृदं खादसि ? किमर्थं मृदं खादसि ? वदतु ' इति कृष्णं पृच्छति। 'अम्ब ! एते असत्यं वदन्ति। अहं मृदं न खादामि ' इति कृष्णः जनन्यै विवरणं (Explanation) ददाति। ' यदि एवं तर्हि मुखं व्याददातु ! दर्शयतु ! ' इति यशोदा पुनः पृच्छति। एवं जनन्या पुनः पुनः पृष्टः बालकृष्णः मुखं व्याददाति। दर्शयति च। उद्घाटिते च कृष्णस्य मुखे, यशोदा-समुद्रान्, द्वीपान्, वसुन्धराम् = भूमिम्, आकाशम्, पातालम्, इति एतत् यावत् विश्वं , नन्दव्रजम्, तत्र च आत्मानम् ( यशोदाम्) च पश्यति। अयं स्वप्नः वा ? देवमाया वा ? चित्तमोहः वा ? बालकस्य जन्मसिद्धः योगविशेषः वा ? इति ज्ञातुं न पारयति। आश्चर्यम् एति । अयं बालः साक्षात् परमेश्वरः, जगतः सृष्टि-स्थिति-लयानां कारकः इति निश्चिनोति। नमस्करोति च। एवं भगवान् स्वस्य रूपं जनन्यै दर्शयति। अनन्तरं पुनः यशोदां मायायाम्उ अज्ञाने, पातयति। स्वस्मिन् जातां भगवद्-भावनां मार्जयति। ततः यशोदा दृष्टं सर्वं विस्मरति। पुत्रं वात्सल्येन अङ्के आरोपयति, चुम्बति, लालयति च।

**स्वावलोकनप्रश्नाः**

१.गोपबालकाः किम् इति यशोदायै न्यवेदयन् ?

२.भय-सम्भ्रान्त-प्रेक्षण-अक्षः कः ?

३.यशोदा श्रीकृष्णं किम् इति निर्भर्त्सितवती ?

४.विदारिते श्रीकृष्णस्य आस्ये, यशोदा किम् अपश्यत् ?

५.यशोदा नष्टमतिः कया जाता ?

### ४.३.७.नन्द-यशोदयोः पूर्वजन्मवृत्तान्तम् :-

**(मूलम्)** ३०.तदनु केन वा कर्मणा नन्द-यशोदयोः ईदृशं भाग्यं जातम् इति परीक्षिता पृष्टः,श्रीशुकः एवम् उवाच- 'द्रोणः नाम कश्चन वसुप्रवरः, धरया भार्यया सह ब्रह्मणः आदेशान् कुर्वन्, एकदा भुवि जातयोः आवयोः' परमपूरुषे हरौ परा भक्तिः अस्तु 'इति तं ययाचे। पितामहः अपि ' तथैव अस्तु' इति वरं ददौ। सः एव द्रोणः नन्दः अजनि। सा एव च

धरा यशोदा अजनिष्ट। श्रीहरिः अपि ब्रह्मणः वरम् अवितथं कर्तुं भुवि व्रजे रामेण सह वसन्, स्वलीलया तयोः परां प्रीतिं चक्रे ' इति।

**(विवरणम्)** अयं वाक्यसमुदायः नन्द–यशोदयोः पूर्वजन्मवृत्तान्तं बोधयति। व्यासस्य तनयः श्रीशुकः। सः पुराणवेत्ता। परिक्षिन्महाराजः अभिमन्योः पुत्रः। सप्तसु दिनेषु श्रीमद्भागवतं श्रीशुकात् शृणोति। स्वीयान् पौराणिकान् संशयान् श्रीशुकद्वारा अपनुदति स्म च। भगवान्, नन्द–यशोदयोः एव सन्ततित्वेन किमर्थम् अवतीर्णः ? तयोः भाग्यं कीदृशम् ? विवृणोतु इति परीक्षित्–महाराजः कदाचित् श्रीशुकं पृच्छति। तदा श्रीशुकः नन्द–यशोदयोः जन्मवृत्तान्तम् –द्रोणः कश्चन वसुः,धरा तस्य च भार्या। धराद्रोणौ ब्रह्मणः आदेशान् अनुतिष्ठतः। धरा–द्रोणौ एकदा ' पुरुषोत्तमे विष्णौ उत्तमा भक्तिः अस्तु ' इति ब्रह्माणं वरं याचतः। पितामहः= ब्रह्मा, अपि वरं अनुगृह्णाति। तथा द्रोणः एव नन्दः भवति। धरा एव यशोदा च भवति। विष्णुः अपि ब्रह्मणः वरं सत्यं करोति। भुवि, व्रजे, बलरामेण सह अवतरति। स्वलीलया तयोः= नन्द–यशोदयोः प्रीतिं जनयति–इति वदति।

**स्वावलोकनप्रश्नाः**

१.नन्द–यशोदयोः पूर्वजन्मवृत्तान्तं कः,कं प्रति उक्तवान् ?

२.पूर्वस्मिन् जन्मनि नन्दः कः ? तस्य भार्या का ?

३.धरा – द्रोणौ ब्रह्माणं किं ययाचाते ?

४.श्रीहरिः कि कुर्वन् नन्द–यशोदयोः प्रीतिं चक्रे ?

## ४.३.८.श्रीकृष्णस्य अद्भुतकर्माणि :-

४.३.८.१.यशोदायाः विस्मयः

**(मूलम्)** ३१.एकदा यशोदा गृहदासीः कार्यान्तरेषु नियुज्य,स्वयमेव श्रीकृष्णस्य बालक्रीडाः गायन्ती दधि निर्ममन्थ। अत्रान्तरे स्तन्यकामः श्रीहरिः आसाद्य मातरम्, प्रगृह्य मन्थनदण्डम्, मन्थनात् तां न्यषेधत्। सा तु तत् विरम्य,बालकम् अङ्के समारोप्य,स्नेहप्रस्नुतं स्तनं पाययन्ती,सस्मितं तत् मुखम् ईक्षमाणा, अग्नौ अधिश्रिते तप्ते पयसि, भाण्डाद् बहिः उद्गच्छति, ससम्भ्रमं तम् अङ्कात् अवरोप्य,तत् अवश्रयणाय ययौ। सः तु जातकोपः शिलापुत्रकेण दधिभाण्डं भित्वा, प्रविश्य अन्तर्गृहं रहः नवनीतम् आनशे। सा तु प्रतिनिवृत्य

भग्नं दधि अमत्रं विलोक्य,तं च तत्र अपश्यन्ती जहास। तद्-गवेषणाय गृहाभ्यन्तरं प्रविश्य, उलूखल-उपविष्टं मर्कटेभ्यः यथाकामं हैयंगवीनं ददतं चौर्य-विशङ्कित-ईक्षणं सुतम् अवलोक्य पश्चात् शनैः वेत्रग्रहणाय अगमत्। गृहीतवेत्रां ताम् अवलोक्य कृष्णः ततः अवरुह्य अधावत्। सा अपि तम् अनुसृत्य धावन्ती कथञ्चित् तम् अगृह्णात्। कृतागसं रुदन्तं साञ्जन-लोचने पाणिना प्रकर्षन्तं भय-विह्वल-ईक्षणं तं गृहीत्वा अभर्त्सयत्। भीतम् अर्भकम् उद्वीक्ष्य, गोपी यष्टिम् अपास्य दाम्ना तं बन्धुम् इयेष। यस्य पूर्वापरौ न स्तः, यः कृत्स्नस्य जगतः बहिः अन्तश्च आस्ते, यश्च जगत् जन्म-स्थिति-लयकारणं तम् अव्यक्तम् अधोक्षजम् आत्मजम् अमत्वा, यशोदा उलूखले बन्धुम् आरेभे। बन्धनाय गृहीतं दाम द्व्यङ्गुल-ऊनम् अभवत्। तदा तत्सन्धानाय अन्यत् आनयत्। तत् अपि द्व्यङ्गुलम् ऊनम् आसीत्। एवं समाहृत्य संहितानि तद्-गृहान्तरवर्तीनि सर्वाण्यपि दामानि बन्धनाय अपर्याप्तानि आसन्। तदा गोपीभिः सह नन्दपत्नी सविस्मया अतिष्ठत्। बन्धन-प्रयासेन अत्यन्तं परिश्रान्तां प्रस्विन्नगात्राम् उच्छ्वसन्तीं प्रकम्पमानवक्षसं मातरम् अवेक्ष्य भक्तवत्सलः स स्वयम् एव बन्धने आसीत्। ईदृशम् अनुग्रहम् अजः भवः श्रीरपि वा न प्रापुः,यादृशं यशोदा अलभत। यतः अन्येषां मुक्तिप्रदः भगवान् स्वभक्तायाः मातुः परिश्रमम् अवेक्ष्य कृपया स्वयं बद्धः आसीत्। भगवान् अयं गोपिकासुतः यथा भक्तानां सुलभः, न तथा ज्ञानिनाम् अन्येषां वा सुलभः भवति।

**(विवरणम्)** अयं वाक्यसमुदायः बालकृष्णस्य महिमानं वर्णयति। कदाचित् यशोदा अन्येषु गृहकार्येषु दासीः नियोजयति। स्वयं श्रीकृष्णस्य बालक्रीडाः गायति। दधि च मथ्नाति। तस्मिन्नेव समये स्तन्यं पातुं बालकृष्णः यशोदायाः सकाशं गच्छति। मन्थनं स्थगयितुं दण्डं गृह्णाति। मन्थनात् मातरं वारयति। यशोदा अपि मन्थनं विरमति। कृष्णम् अङ्कम् आरोपयति। स्तनं पाययति। सस्मितं तत् कृष्णस्य मुखारविन्दं पश्यन्ती अनुभूतिम् एष्यति। बाह्यं प्रपञ्चं विस्मरति। कृष्णस्य सुन्दरं वदनं पश्यन्ती यशोदा उष्णं कर्तुं अग्नौ स्थापितं क्षीरम् अपि विस्मरति। अधिकौष्ण्येन पात्रात् बहिः, अधः अपि उद्गच्छति, ससम्भ्रमं कृष्णम् अङ्कात् अवरोपयति। क्षीरपात्रस्य, अवश्रयणाय (= अधः स्थापयितुम्),गच्छति। अङ्कात् अवरोपणाय कृष्णः कुपितः भवति। शिलापुत्रकेण= पाषाणेन (STONE) दधिभाण्डं भिनत्ति, गृहस्य अन्तः प्रविशति। तत्र,रहः= एकान्ते, नवनीतं खादति। यशोदा प्रतिनिवर्तते। भग्नं दधि पात्रं विलोकते। कृष्णः तत्र न भवति। कृष्णस्य अन्वेषणाय गृहं परितः भ्रमति। कुत्रचित् कृष्णं पश्यति। तत्र कृष्णः उलूखले उपविशति। पात्रं भित्त्वा आनीतं नवनीतं वानरेभ्यः ददाति। आत्मानं चोरम् इव विशङ्कते। मातुः तर्जनम् आशङ्कते। भयम् एष्यति। यशोदा एतत् सर्वम् अवगच्छति। शिक्षितुं वेत्रं गृह्णाति। कृष्णः मातरं पश्यति। उलूखलात् अवरुह्यउ अवतीर्य, धावति। कथञ्चित् =

अतिप्रयासेन, कृष्णं गृह्णाति। कृष्णः पात्रछेदनाय खिन्नः भवति। कृष्णः लोचनयोः अञ्जनं धरति। नेत्रयोः प्रकर्षेण अञ्जनं, मुखे लेपितं भवति। भयेन चकित-ईक्षणश्च भवति। यशोदा तं गृह्णाति, भर्त्सयति च। अर्भकं भीतं पश्यति। सानुभूतिम् एति। यष्टिम् अपास्यति। दाम्ना= पाशेन, कृष्णं बन्धुम् इच्छति। कृष्णः बालः न खलु। साक्षात् विष्णुः। अयम् अनन्तः, अपरिमितश्च। तस्य आद्यन्तौ न भवतः। विश्वस्य बहिः अन्तश्च सः एव आस्ते। किञ्च अयं जगतः सृष्टि-स्थिति-लयानां हेतुभूतः। एवं यशोदा तनयम् अव्यक्तम् अधोक्षजं नैव जानाति। यशोदा उलूखले बन्धुम् आरभते। बन्धुं स्वीकृतः दामउ पाशः द्वि-अङ्गुल(INCHES)ऊनः भवति। तदा तत्- सन्धानाय अन्यं पाशं आनयति। तत् अपि द्वि-अङ्गुल-ऊनः भवति। एवं गृहे स्थिताः पाशाः सर्वे अपि कृष्णं बद्धुम् अपर्याप्तानि एव भवन्ति। तदा गोपाङ्गनाः यशोदा च सविस्मयाः तिष्ठन्ति।यशोदा च बन्धन-प्रयासेन अत्यन्तं परिश्रान्ता भवति। यशोदायाः शरीरे प्रस्वेदः उच्छ्वासः प्रकम्पः च जायते। बालकृष्णरूपः विष्णुः मातरम् अवेक्षते। मातुः इच्छां पूरयितुं भक्तवत्सलः कृष्णः स्वयम् एव बद्धः भवति। ईदृशः अनुग्रहः ब्रह्मणः वा महेश्वरस्य वा नास्ति। भगवान् बन्धनेभ्यः अन्यान् विमोचयति। तादृशः, इदानीं स्वभक्तायाः मातुः परिश्रमम् अवेक्ष्य कृपया स्वयं बन्धनेषु प्रविशति। भगवान् यथा भक्तानां सुलभः, न तथा ज्ञानिनां सुलभः भवति इति यशोदा स्वजन्मानं धन्यं मनुते। आश्चर्यम् एति। आनन्दं च आप्नोति।

**स्वावलोकनप्रश्नाः**

१.कस्य पूर्वापरौ न स्तः ?

२.कृत्स्नस्य जगतः बहिः अन्तश्च कः आस्ते ?

३.जगत् जन्म-स्थिति-लयानां कारणभूतः कः ?

४.मातरम् कीदृशीम् अवेक्ष्य, सः= श्रीकृष्णः, बन्धने आसीत् ?

४.३.९.नलकूबर-मणिग्रीवकयोः अनुग्रहणम् (प्रसादः)

**(मूलम्)** ३२.एवं स्वयम् एव उलूखले बद्धम् आत्मजम् उत्सृज्य, गृहकार्य-व्यापृतायां मातरि, भगवान् श्रीकृष्णः पुरा नारदशापेन सालवृक्षतां प्रापितौ, अग्रतः स्थितौ, धनद-आत्मजौ नलकूबर-मणिग्रीवकनामानौ गुह्यकौ अद्राक्षीत्। पुरा श्री-मद-अन्धौ वारूणी-मदमत्तौ एतौ

स्रीजनेन सह, करेणुभिः गजौ इव, मन्दाकिनी नदीजले चिक्रीडतुः । तत्र यदृच्छया समागतं देवर्षिनारदं वीक्ष्य, स्त्रियः ससम्भ्रमं वासांसि परिदधुः। एतौ गुह्यकौ तु विवस्त्रौ आस्ताम्। अतः नारदः तद्-अनुग्रहाय शशाप - 'यतः युवां लोकपालस्य पुत्रौ भूत्वा, स्त्रीमदान्धौ सुदुर्मदौ विगतवाससौ आत्मानं न विजानीथः, अतः स्थावररूपतां प्राप्य,मत्-अनुग्रहात् एव दिव्यशरत्-शतान्ते वासुदेव-सान्निध्यं प्राप्य, भूयः स्वर्लोके भक्तौ भविष्यथ ' इति। अतः भागवतमुख्यस्य देवर्षेः वचः सत्यं कर्तुं श्रीहरिः शनैः उलूखलम् आकर्षन् अन्तरेण यमलार्जुनयोः अगच्छत्। आत्मनिर्वेशमात्रेण तिर्यक् गतम् उलूखलं यदा तरसा समाचकर्ष, तदा वृक्षद्वयं प्रशिथिल-मूलबन्धनं प्रचण्डशब्देन भूमौ अपतत्। तस्मात् दिव्यपुरूषौ उत्थाय देवकीसुतं सर्वान्तर्यामिनम् आदिपुरुषं विदित्वा, शिरसा प्रणम्य, बद्धञ्जलिपुटौ बहुधा तुष्टुवतुः। उलूखले बद्धः भगवान् अपि तौ अनुजग्राह। तौ तु पुनः पुनः प्रणम्य भगवन्तम् ,उत्तरां दिशम् ऊखतुः।

**(विवरणम्)** अयं वाक्यसमुदायः नलकूबर-मणिग्रीवकयोः अनुग्रहणरूपं बालकृष्णस्य अपरं महिमानं वर्णयति। श्रीकृष्णः उलूखले बद्धः खलु, इतः परं किम् अपि कर्तुं न पारयति इति यशोदा चिन्तयति। आत्मजम् उ पुत्रम् उत्सृजति। गृहकार्येषु व्यापृता भवति। अत्र च कश्चन संघटनं (INCIDENT) प्रचलति। नलकूबर- मणिग्रीवकौ गुह्यकौ। एतौ कुबेरस्य कुमारौ। दुरहङ्कारिणौ, धनस्य मदेन अन्धौ, एतौ वारुण्याः= मद्यस्य मदेन मत्तौ, स्त्रीलोलुपौ च भवतः। गजाः नदीजलेषु,करेणुभिः= स्त्रीगजैः, यथा क्रीडन्ति, तथा कदाचित् एतौ स्त्रीभिः सह नग्नतया नदीजलेषु क्रीडतः स्म। तदानीम् एव देवर्षिः नारदः अपि स्नातुम् आगच्छति। स्त्रियः नारदं पश्यन्ति। ससम्भ्रमं वस्त्राणि धरन्ति। मदेन नलकूबर-मणिग्रीवकौ तथैव नग्नतया जले भवतः। कुबेरः दिक् -पालकेषु अन्यतमः। उत्तरां दिशं पालयति। दिक्-पालकस्य सुतौ अपि, गौरवं मर्यादां च न पालयतः। स्त्रीमदेन मत्तौ भवतः। स्त्रीभिः नग्नं क्रीडतः। नारदं न जानीतः। कुबेरपुत्रयोः अमर्यादाप्रवर्तनं नारदस्य आग्रहं जनयति। अनुपदं नलकूबर-मणिग्रीवकयोः स्थावररूपतां शपति। शरदां शतस्य अन्ते भगवतः वासुदेवस्य सान्निध्ये स्थावररूपं त्यजतः। स्वर्गं गच्छतः। विष्णोः भक्तौ भवतः , इति च , पुनः नारदः एव , सानुभूत्या शापस्य विमोचनम् अपि सूचयति। तदेतस्य नारदस्य वचनं सत्यं कर्तुं यशोदया बद्धम् उलूखलम् आकर्षति। श्रीकृष्णः च यमल-अर्जुनवृक्षयोः मध्ये गच्छति। वृक्षयोः मध्ये च मार्गः सन्नः (NARROW) भवति। प्रथमं श्रीकृष्णः प्रविशति। उलूखलं तु विपर्यस्तं भवति। तेन वृक्षयोः मध्ये सन्ने मार्गे उलूखलं न प्रविशति। उलूखलम् अपि प्रवेशयितुं यदा बलेन श्रीकृष्णः आकर्षति, तदा द्वौ अपि वृक्षौ मूलबन्धनैः सह प्रशिथिलौ भवतः। प्रचण्डशब्देन भूमौ पतति। पतितात् वृक्षद्वयात् दिव्यपुरुषौ उत्तिष्ठतः। तौ यशोदातनयं , विष्णुं जानीतः। शिरसा प्रणमतः। अञ्जलिं घटयतः।

बहुधा प्रशंसतः। उलूखले बद्धः अपि भगवान्, नलकूबर-मणिग्रीवकौ अनुगृह्णाति। नलकूबर-मणिग्रीवकौ अपि पुनः पुनः भगवन्तं प्रणमतः। उत्तरां दिशं गच्छतः।

**स्वावलोकनप्रश्नाः**

१.नलकूबर-मणिग्रीवकौ कौ ?

२.नलकूबर-मणिग्रीवकौ केन सालवृक्षतां प्रापितौ ?

३. नारदः नलकूबर-मणिग्रीवकौ किमर्थं शशाप ?

४.श्रीहरिः उलूखलम् आकर्षन् यमलार्जुनयोः अन्तरेण किमर्थम् अगच्छत् ?

**(मूलम्)** ३३.भीषणं वृक्षपतन-रवम् आकर्ण्य निर्घात-भय-शङ्किताः नन्दादयः तम् उद्देशम् आसाद्य तयोः पतनहेतुम् अतर्कयन्तः सविस्मयाः इतस्ततः बभ्रमुः। तत्रत्याः गोपबालकाः तिरश्चीनम् उलूखलं कर्षता द्रुमान्तर -गतेन अनेन वासुदेवेन निपातितौ इति,ततः दिव्यपुरुषौ समुत्थितौ इति च ऊचुः। अथापि बालकेन अनेन तयोः उन्मूलनं न घटते इति नैव प्रत्यायन्। केचित्तु सन्दिग्धचेतसः आसन्। नन्दः तु नातिदूरे उलूखलं विकर्षन्तं दाम्ना बद्धम् आत्मजं वीक्ष्य, प्रहसन् बन्धनात् विमुमोच। गोपीभिः प्रेरितः क्वचित् गायन्, क्वचित् नृत्यन् क्वचित् आज्ञप्तं वस्तुजातम् आनयन्, मातुः गोपीनां च अत्यन्तं प्रमोदम् आदधौ।

**(विवरणम्)** अयं वाक्यसमुदायः बालकृष्णस्य महिमानं प्रति नन्द-यशोदयोः अनवगाहनां निरूपयति। तथा हि - द्वौ वृक्षौ प्रचण्डशब्देन भूमौ पततः। तं शब्दं नन्दादयः शृण्वन्ति। भयं प्राप्नुवन्ति। वृक्षपतनप्रदेशम् आगच्छन्ति। परं तत्र वृक्षपतनहेतुं नन्दादयः नैव अवगच्छन्ति। विस्मयेन इतस्ततः भ्रमन्ति। तत्र गोपबालकाः विद्यन्ते। ते प्रचलितं वृत्तं जानन्ति। श्रीकृष्णः उलूखलं कर्षति। वृक्षयोः मध्यमार्गस्य सन्नकारणतः उलूखलं न प्रविशति। विपर्यस्तं भवति।तं श्रीकृष्णः बलेन कर्षति। तदा तौ वृक्षौ पततः। पतिताभ्यां वृक्षाभ्याम् एतौ दिव्य-पुरुषौ समुत्तिष्ठतः- इति, बालकाः नन्दादिभ्यः विषयं निवेदयन्ति। बालकैः कथितं नन्दादयः

नैव विश्वसन्ति। केचित् मनस्सु संशयम् आप्नुवन्ति। अनन्तरम् अपि श्रीकृष्णः उलूखलं कर्षत्येव। नन्दः श्रीकृष्णं पश्यति। दामभिः (उपाशैः) बद्धं मोचयति। स्मितेन परिगृह्णाति। स्वगृहं नयति। ततश्च गोपीभिः श्रीकृष्णः क्वचित् गायति। क्वचित् नृत्यति। क्वचित् तासाम् आदेशं पालयति। एवं श्रीकृष्णः यशोदायाः, गोपीनां च अमन्दम् आनन्दं जनयन्, वर्धते।

**स्वावलोकनप्रश्नाः**

१.नन्दादयः वृक्षपतन-रवम् आकर्ण्य कीदृशाः जाताः ?

२.नन्दः कीदृशम् आत्मजं वीक्षितवान् ?

३.गोपबालकाः नन्दं किम् ऊचुः ?

४.बालकृष्णः,मातुः गोपीनां च किं कुर्वन् प्रमोदम् आदधौ ?

## ४.३.१०.फलविक्रयिण्याः अनुग्रहणम् (प्रसादः) :-

**(मूलम्)** ३४. व्रजवीथ्याम् एकदा ' क्रीणीध्वं भोः बालकाः फलानि ' इति एवम् आक्रोशन्त्यां फलविक्रयिण्यां कृष्णः गृहाभ्यन्तरात् अञ्जलिना धान्यम् आदाय एनां फलविक्रयिणीम् ' आनय फलानि ' इति अवोचत्। सा तु सस्पृहं भगवन्तं लीलार्भकं वीक्षमाणा तत्-कर-च्युतं धान्यम् आदाय यावत् अञ्जलिं फलैः आपूरयत्, तावत् तस्याः फलभाजनं रत्नैः आपूरितम् आसीत्। सर्वफलप्रदः अयं सर्वाणि अपि तानि फलानि गोपीभ्यः व्यभजत्। एवं रामेण वयस्यैश्च सह व्रजवीथ्यां बहुविधाः क्रीडाः कुर्वन् सर्वान् आनन्दयामास।

**(विवरणम्)** अयं वाक्यसमुदायः फलविक्रयिण्याः अनुग्रहणरूपं बालकृष्णस्य अपरं महिमानं वर्णयति। श्रीकृष्णः फलानि विक्रीय जीवनं यापयन्तीं काञ्चन स्त्रियम् अनुगृह्णाति। तथाहि- कदाचित् श्रमेण जीविनी काचन वृद्धा स्त्री नन्दव्रजवीथिषु ' फलानि क्रीणन्तु ' इति उच्चैः घोषति। फलविक्रयिण्याः घोषणम् श्रीकृष्णः शृणोति। श्रीकृष्णः गृहस्य अन्तः प्रविशति।

अञ्जलिना धान्यं स्वीकरोति। फलविक्रयिण्यै समर्पयति। फलानि प्रतिदातुं च विक्रयिणीं पृच्छति। श्रीकृष्णः सुन्दरवदनः खलु। फलविक्रयिणी श्रीकृष्णस्य वदनं सस्पृहम्उ उत्कण्ठा पूर्वकम्, अवलोकते। लीलार्भकं भगवन्तं पश्यन्ती एव तत्-कर-च्युतं धान्यं स्वीकरोति। भगवतः श्रीकृष्णस्य अञ्जलिं फलैः पूरयति। अत्रान्तरे एव आश्चर्यं जनयन् विक्रयिण्याः फलभाजनम् अपि रत्नैः आपूरितं भवति। सर्वेषां फलप्रदः खलु श्रीकृष्णः। तादृशः अयं सर्वाणि अपि तानि फलानि गोपीभ्यः वितरति। एवं बलरामेण वयस्यैश्च सह श्रीकृष्णः व्रजवीथिषु बहुविधं क्रीडति। आबालवृद्धं सर्वान् आनन्दयति च।

**स्वावलोकनप्रश्नाः**

१. 'क्रीणीध्वं भोः बालकाः फलानि ' इति का, कुत्र आक्रोशति ?

२. 'आनय फलानि ' इति कः, कां प्रति अवोचत् ?

३.फलविक्रयिणी यावत् बालकृष्णस्य अञ्जलिं फलैः आपूरयत्, तावत् किम् आसीत् ?

४.सर्वफलप्रदः बालकृष्णः, फलानि किम् अकरोत् ?

## ४.४.उपसंहारः

एवम् अत्र पाठ्यांशे (Unit-iv) गर्गः समागच्छति,राम-कृष्णयोः नामकरणम् आचरति। राम-कृष्णयोः बाल्यं दिव्यं भवति,श्रीकृष्णस्य बालचेष्टितानि सर्वाण्यपि विस्मयजनकानि भवन्ति। गोपाङ्गनाः विस्मयं यान्ति।यशोदा आश्चर्यम् आप्नोति। आनन्दपरवशा भवति। श्रीशुकः नन्द-यशोदयोः पूर्वजन्मवृत्तान्तं ज्ञापयति। बालकृष्णः नल- कूबर-मणिग्रीवकौ, फलविक्रयिणीं च अनुगृह्णाति। एते च विषयाः श्रीकृष्णस्य दिव्यत्वं प्रकटयन्ति। पाठकानां दिव्यानुभूतिम् ,आनन्दानुभूतिं च जनयन्ति ।

## ४.५.अभ्यासः

अ). गोपीनां,यशोदायाश्च विस्मयजनकानि श्रीकृष्णस्य बाल्यचेष्टितानि कानि ? विशदयत ?

# UNIT-V
# बृन्दावने राम-कृष्णयोः विहरणम्

**संरचना**


५.१.परिचयः

५.२.लक्ष्याणि

५.३.बृन्दावने राम-कृष्णयोः विहरणम्

५.३.१.बृन्दावनगमनाय सन्नाहकरणम्

५.३.२.रामकृष्णयोः गो-वत्स-पालनम्

५.३.३.दैत्यस्य संहरणम्

५.३.४.गोपालकृष्णस्य दिव्यत्वम् (नारायणसमो गुणैः)

५.३.५.गोपालकैः सह क्रीडनम्

५.३.६.बकासुरस्य संहरणम्

५.३.६.१.बकासुरसंहरणाय श्रीकृष्णस्य अभिनन्दनम्

५.३.७.गोपबालकैः श्रीकृष्णः

५.३.८.लीलार्भकस्य भगवतः (श्रीकृष्णस्य) महत्त्वम्

५.३.९.आत्मना आत्मनः पालनम्

५.३.१०.बलरामस्य निरहङ्कारः

५.३.११.ब्रह्मणः निश्चेष्टता

५.३.११.१.ब्रह्मणः निरहङ्कारः

५.३.१२.कृत्रिमगोपालानां विस्मयः

५.३.१३.नन्दसूनोः अद्रिकन्दरेषु विहरणम्

५.३.१४.श्रीकृष्णस्य गोपबालकत्वम्

५.३.१५.धेनुकासुरवधः

५.३.१६.मातुः पर्यङ्कशयनम्

५.३.१७.कालियमर्दनम्

५.३.१७.१.मृतानां सञ्जीवनम्

५.३.१७.२.कालिन्द्यां (गोप)बालकृष्णस्य विहरणम्

५.३.१७.३.भोगैः कालियस्य आवेष्टनम् - गोपबालकाणां रोदनम्

५.३.१७.४.गोपवृद्धानां गोपीनां च आन्दोलनम्
५.३.१७.५.कालियस्य शरणागतिः
५.३.१७.६.कालियस्य पत्नीभिः क्षमायाः याचनम्
५.३.१७.७.कालियस्य अब्धिसमाश्रयणम्
५.३.१७.८.परिवारस्य परितोषणम्
५.३.१८.अग्नेः पानम्
५.३.१९.श्रीकृष्णस्य विहरणम्
५.३.२०.बलरामकृतः प्रलम्बासुरवधः
५.३.२१.गवां, गोपालकानां च रक्षणम्
५.३.२२.बृन्दावने प्रावृट्-श्रियः वीक्षणम्
५.४.उपसंहारः
५.५.अभ्यासः

## ५.१.परिचयः

अयं च पञ्चमः पाठ्यांशः (UNIT-V)। अयं च कृष्णचरितस्य प्रथमखण्डे ३५-६८ (Para graphs) पर्यन्तं प्रचलति। गते चतुर्थे पाठ्यांशे (UNIT-IV) राम-कृष्णयोः नामकरणम्, व्रजे श्रीकृष्णस्य बाल्यक्रीडाः , गोपीनाम् आश्चर्यम्, यशोदायाश्च आनन्दं च वर्णितम्। नन्द-यशोदयोः पूर्वजन्मवृत्तान्तम्, नलकूबर-मणिग्रीवक - फल विक्रयिणीनाम् उद्धरणम्, इति एते अंशाः वर्णिताः। ततश्च इदानीम् अत्र पञ्चमे(UNIT-V)पाठ्यांशे प्रधानतया बृन्दावने राम-कृष्णयोः विहरणं वर्ण्यते। तत्र गोपालकैः सह क्रीडनम्, बकासुरस्य संहरणम्, लीलार्भकस्य भगवतः श्रीकृष्णस्य महत्त्वम्,बलरामस्य अहङ्कारनिरसनम्,ब्रह्मणः गर्वभङ्गः, नन्दसूनोः अद्रिकन्दरेषु विहरणम्, धेनुकासुरस्य वधः,मातुः पर्यङ्कयनम्, कालियमर्दनम्, अग्नेः पानम्,श्रीकृष्णस्य विहरणम्,बलरामकृतः प्रलम्बासुरस्य वधः इति एते अंशाः निरूपिताः सन्ति। अत्र च गद्यं पठनासक्तिं जनयति। कथाकथने कुतूहलस्य वर्धनाय समर्थं च भवति।

## ५.२.लक्ष्याणि

षष्ठवर्षात् आरभ्य षोडशवर्षपर्यन्तं कौमारं वयः भवति। इदम् अपि सुकुमारं वयः। परिस्थित्यनुसारं परिवारेण साकं श्रीकृष्णः बृन्दावनं प्राप्नोति। अस्मिन् सुकुमारे अपि वयसि भगवान् श्रीकृष्णः बृन्दावने आत्मनः अवतारपुरुषत्वं तदा तदा प्रकटयति एव। अत्र अपि दुष्टशिक्षणं करोति। शिष्टरक्षणं साधयति।दीनान् उद्धरति। सखीन् सन्तोषयति। आश्रितान्

रक्षति। जीवकारुण्यम् शिक्षयति। इदानीम् अत्र पञ्चमे (UNIT-V)पाठ्यांशे अवतारपुरुषः श्रीकृष्णः तत्र बृन्दावने कांश्चन (कान् अ चन) स्नेहेन उद्धरति, कांश्चन वैरेण अनुगृह्णाति। कांश्चन दमनेन दण्डयति। कांश्चन गर्व-अपनोदनेन सान्त्वयति, कांश्चन स्वमहिमातिशयज्ञापनेन आश्चर्य चकितान् करोति। तदीयं जन्म,कर्म च दिव्यं प्रकटयति। 'ते च विषयाः के ? ' इति अयम् अंशः अत्र वर्ण्यते। एतत् पाठ्यांशस्य अध्ययनेन-

- संस्कृतगद्यं प्रति परिचयः सम्पादितः भवति।
- संस्कृतगद्यस्य माध्यमेन पौराणिककथायाः श्रवणे समर्थः भवति।
- आधुनिकसंस्कृतगद्ये पौराणिककथायाः पठने च कुशलः भवति।
- भगवतः बृन्दावन-विहरण-विशेषान् प्रति अनुभूतिपरः भवति।
- बृन्दावने भगवतः श्रीकृष्णस्य अन्यगोपालकैः सहक्रीडनं प्रति लिखितुं पारयति।
- भगवतः आपन्नप्रसन्नत्वं प्रति,शिष्टरक्षणं प्रति पठितुं समर्थः भवति
- कालियमर्दनम्-गोवर्धनगिरि उद्धरणं प्रति च वक्तुं प्रभवति। ।
- बलरामकृतं प्रलम्बासुरवधं वक्तुं समर्थः भवति। ।

## ५.३.बृन्दावने राम-कृष्णयोः विहरणम्

५.३.१.बृन्दावनगमनाय सन्नाहकरणम् :-

**(मूलम्)** ३५. नन्दादयः गोपवृद्धाः गोकुले अनुभूतानि महोत्पातानि परामृश्य कर्तव्यम् अमन्त्रयन्। तत्र समवेतेषु ज्ञान-वयो-वृद्धः देश-काल-अर्थतत्त्वज्ञः उपनन्दनामा गोपवृद्धः रामकृष्णयोः प्रियकृत् एवम् आह- 'बृहद्वने अस्मिन् प्रजा-नाश-हेतवः बहवः उत्पाताः समायान्ति। बालघ्न्या राक्षस्या कथञ्चित् बालकः मुक्तः, हरेः अनुग्रहात् शकटम् अपि तस्य उपरि न अपतत्। चक्रवातेन दैत्येन अन्तरिक्षं नीतः, शिलायां पतितः असौ सुरेश्वरैः संरक्षितः। पततोः अर्जुनयोः मध्यगः अपि अयं भगवता गोपायितः । अतः अत्र न चिरम् अस्माभिः अवस्थातव्यम्। यावत् अन्यत् अपि औत्पातिकं न भवेत् तावद् बालकौ गृहीत्वा पुण्याद्रि-तृणवीरुधं वासार्हं बृन्दावनं नाम काननम् अद्यैव यास्यामः। शकटानि अयुङ्क्त ' इति।

**(विवरणम्)** अयं वाक्यसमुदायः बृन्दावनगमनाय वृद्धानाम् आलोचनाकरणं वर्णयति। नन्दव्रजे महान्तः उत्पाताः सम्भवन्ति। गोपाः गोपिकाश्च भयम् एष्यन्ति। कथं वा उत्पातानां दूरं भवामः इति तर्कयन्ति। गोप -वृद्धाः एकत्र मिलन्ति। उत्पातेभ्यः पीडायाः निवारणं कथं कुर्मः इति विचारयन्ति। तत्र समवेतेषु उपनन्दनामा गोपवृद्धः कश्चित् अस्ति। सः ज्ञानवृद्धः, वयोवृद्धः च भवति। अयं देशानुगुणं कालानुगुणं कार्यान् साधयति। किञ्च अयं बलराम-कृष्णयोः श्रेयसः अभिलाषी च अस्ति। अयं समावेशे, बृहद्वने=नन्दव्रजे, बहवः उत्पाताः समायान्ति। ते

च उत्पाताः नन्दव्रजं नाशयन्ति। पूतनया यथाकथञ्चित् बालकः मुक्तः भवति। हरेः प्रसादेन शकटं बालकं किमपि न करोति। चक्रवातः बालकम् अन्तरिक्षं नयति। शिलायां पातयति। तथापि देवाः तं रक्षन्ति। पततोः वृक्षयोः मध्ये अयं भगवता एव संरक्षितः भवति। अतः अत्र= बृहद्वने न चिरम् अस्माभिः स्थातव्यम्। यदि विलम्बं कुर्मः, अन्यः उत्पातः अपि सम्भवति। वासार्हं अन्यत् यत्किञ्चित् काननं गच्छामः। अपायरहितं सुरक्षितं च बृन्दावनं अस्ति। अस्मात् प्रदेशात् बलराम–कृष्णौ गृहीत्वा बृन्दावनं गच्छमः।
शकटानि सन्नद्धानि कुर्वन्तु – इति हितम् =पदिशति।

**स्वावलोकनप्रश्नाः**

१.नन्दादयः किं परामृश्य कर्तव्यम् अमन्त्रयन् ?

२.उपनन्दः कः ? सः कीदृशः ?

३.उपनन्दः नन्दादीन् किम् आह ?

४.'अतः अत्र न चिरम् अस्माभिः अवस्थातव्यम्' अत्र 'अत्र' पदं कं परामृशति ?

**बृन्दावनप्रवेशनम् :–**

**(मूलम्)** ३६.तत् श्रुत्वा सर्वे अपि गोपाः एकधियः शकटान् संयोज्य, वृद्धान्, बालान्, स्त्रियः,गृहोपकरणाणि च तेषु आरोप्य,गोधनानि पुरोहितं च पुरस्कृत्य,आत्त–शर–आसनाः शृङ्गाणि आपूरयन्तः तुङ्ग–तूर्य–घोषेण बृन्दावनं प्रतस्थिरे। शकटेषु आरूढाः सुवाससः गोप्यः प्रीत्या ऐककण्ठ्येन कृष्णलीलाः गायन्त्यः ययुः। यशोदा –रोहिण्यौ च सह राम–कृष्णाभ्याम् एकं शकटम् आरुह्य व्रजन्त्यौ तत्–कथाश्रवण–उत्सुके आस्ताम्। एवं शकटैः गन्तव्यम् अध्वानम् अतिक्रम्य सर्वकाल–सुखावहं बृन्दावनं सम्प्रविश्य, अर्धचन्द्रवद् व्रजावासम् अकुर्वन्।

**(विवरणम्)** अयं वाक्यसमुदायः नन्दादीनां बृन्दावनगमनवृत्तान्तं वर्णयति। उपसन्दुना उक्तं व्रजवासिनः सर्वे एकग्रीवतया अङ्गीकुर्वन्ति। शकटान् संयोजयन्ति। गन्तुम् असमर्थान् वृद्धान् बालान् स्त्रियः,केषुचित् शकटेषु, उपवेशयन्ति। अपरेषु केषुचित् शकटेषु गृहोपकरणाणि= गृहसामग्रीं पूरयन्ति। गावः पुरतः प्रयान्ति। तान् च पुरोहिताः अनुसरन्ति। रक्षणार्थं केचन गोपाः सन्धीकृतशराणि धनूंषि धरन्ति। तुङ्गः तूर्यः च प्रान्तीयः जनपदेषु उपयुज्यमानः वाद्यविशेषः

तयोः घोषपुरस्सरं च बृन्दावनाय गन्तुं प्रयाणम् आरभन्ते। प्रयाणं च सुखं प्रचलति। शकटम् अधिष्ठिताः सुवासिन्यः गोपस्त्रियः श्रीकृष्णस्य लीलाविशेषान् गायन्ति। यशोदा श्रीकृष्णं, रोहिणी बलरामं च अङ्के स्वीकुरुतः। यशोदा-रोहिण्यौ उभे अपि एकम् एव शकटम् आरोहतः। सुवासिनीभिः कृतं श्रीकृष्णकथायाः गानं सोत्सुकं शृणुतः। आबालवृद्धम् एवम् आनन्देन प्रयाणं कुर्वन्ति। बृन्दावनं प्राप्नुवन्ति। बृन्दावनं च सर्वकालेषु= सर्वेषु ऋतुषु, अपि उषितुम् अर्हं प्रशस्तं प्रदेशं भवति। तत्र अर्धचन्दाकारेण आवासं निर्मान्ति। तत्र निवसन्ति।

**स्वावलोकनप्रश्नाः**

१.गोपाः कथं बृन्दावनं प्रतस्थिरे ?

२.गोप्यः किं कुर्वन्त्यः बृन्दावनं ययुः ?

३.यशोदा-रोहिण्यौ कथं व्रजन्त्यौ आस्ताम् ?

४.बृन्दावनं कीदृशम् ?

### ५.३.२.रामकृष्णयोः गोवत्सपालनम् :-

**(मूलम्)** ३७. बृन्दावनं गोवर्धनं यमुनापुलिनानि च वीक्ष्य राम-कृष्णौ परां प्रीतिम् उपेयतुः। कलमधुरैः वचोभिः व्रजौकसां प्रीतिम् आदधानौ राम-कृष्णौ स्वकालेन गोवत्सपालौ अभूताम्। सवयोभिः गोपबालकैः सह नानाविधाः क्रीडाः कुर्वन्तौ मधुरमधुरं वेणुं वादयन्तौ व्रजभुवः अनतिदूरे वत्सान् अचारयताम्।

**(विवरणम्)** अयं वाक्यसमुदायः बृन्दावने बलराम-कृष्णयोः गवां पालनस्य वृत्तान्तं वर्णयति। बृन्दावनस्य एकतः गोवर्धनपर्वतः अस्ति। अपरतः यमुनानदी प्रवहति। यमुनायां पुलिनानि (सिकताराशयः) सुन्दराणि भवन्ति। बलराम-कृष्णौ तानि पश्यतः। परां प्रीतिं प्राप्नुतः। तत्र कलमधुरैः वचोभिः व्रजौकसां प्रीतिम् आदधतः। क्रमेण तयोः वयः वर्धते। राम-कृष्णौ गवां पालकौ भवतः। प्रतिदिनं गवां पालनार्थं गच्छतः। पर्यन्तभूमिषु गाः चारयतः। सवयोभिः गोपबालकैः सह बहुविधं क्रीडतः। वेणुं मधुरं वादयतः। सहचराणाम् आनन्दम् आरचयतः।

**स्वावलोकनप्रश्नाः**

१.राम–कृष्णौ कानि वीक्ष्य प्रीतिम् उपेयतुः ?

२.व्रजौकसां प्रीतिम् आदधानौ कौ ?

३.कौ गोवत्सपालौ अभूताम् ?

४.राम–कृष्णौ कथं वत्सान् अचारयताम् ?

### ५.३.३.दैत्यस्य संहरणम् :-

**(मूलम्)** ३८.कदाचित् यमुनातटे वयस्यैः सह वत्सान् चारयतोः राम–कृष्णयोः जिघांसया कश्चन दैत्यः गृहीत–वत्स–रूपः आगत्य वत्सयूथं प्राविशत्। सर्वज्ञः भगवान् तत् विज्ञाय, भ्रात्रे तं दर्शयित्वा, मुग्धः इव पश्चात् तम् उपससाद। ततः लाङ्गूलेन सह परपादयोः एनं जीवग्राहं गृहीत्वा, भ्रामयित्वा, गतचेतसं तं कपित्थवृक्षाग्रे अक्षिपत्। महाकायः स दैत्यः कपित्थफलैः सह भूमौ निपत्य ममार। तत् दृष्ट्वा गोपबालकाः सविस्मयाः ‘ साधु साधु’ इति ऊचुः। तेन कर्मणा सन्तुष्टाः देवाश्च तस्य उपरि पुष्पाणि अवाकिरन्।

**(विवरणम्)** अयं वाक्यसमुदायः बृन्दावने गोपालकृष्णेण कृतस्य दैत्यसंहरणस्य वृत्तान्तं वर्णयति। बलराम–कृष्णौ यमनायाः तीरे गोपबालकैः सह क्रीडतः। गाः पालयतः च। प्रतिदिनं एवं प्रचलति। कदाचित् कश्चन राक्षसः आगच्छति। बलराम–कृष्णौ हन्तुम् इच्छति। गोवत्सरूपं धरति। वत्सानां, यूथं(समूहम्) प्रविशति। भगवान् सर्वज्ञः खलु। राक्षसस्य वृत्तान्तम् , हननाय राक्षसस्य आगमनम्, वत्सरूपधारणम्, वत्सानां समूहे प्रवेशनम्,एतानि सर्वाणि अपि जानाति। भ्रात्रेउबलरामाय, तं(राक्षसम्), दर्शयति। अमायकः इव पृष्ठतः राक्षसम् उपसर्पति। ततः लाङ्गूलेन (पुच्छेन) चतुरः पादान् बध्नाति। हस्तयोः गृह्णाति। दशवारं परितः भ्रामयति। विगतचैतन्यं करोति। राक्षसं कपित्थवृक्षस्य उपरि क्षिपति। बृहत् देहः सः दैत्यः कपित्थफलैः सह भूमौ निपतति। प्राणान् त्यजति। गोपबालकाः श्रीकृष्णस्य साहसं पश्यन्ति। विस्मिताः भवन्ति। गोपबालकाः अपि साधु साधु श्रीकृष्णं प्रोत्साहयन्ति। श्रीकृष्णस्य साहसकर्मणा देवाः तुष्टाः भवन्ति। तस्य उपरि पुष्पाणि विकिरन्ति। श्रीकृष्णम् अभिनन्दन्ति च।

**स्वावलोकनप्रश्नाः**

१.राम-कृष्णयोः जिघांसया आगतः कः ?

२.राम-कृष्णयोः जिघांसया आगतः केन रूपेण, स्थितः ? कुत्र प्रविष्टः ?

३.भगवान् तं दैत्यं कथम् अक्षिपत् ? कुत्र अक्षिपत् ?

४.दैत्यः कथं ममार ?

## ५.३.४. गोपालकृष्णस्य दिव्यत्वम् (नारायणसमो गुणैः)

**(मूलम्)** ३९.एकदा सर्वलेकपालकौ इमौ वत्सपालौ भूत्वा,गृहीत-प्रातराशौ सहवयस्यैः वत्सान् चारयामासतुः। गोपबालकाः, वत्सान् जलं पाययितुं जलाशयं प्रविश्य, जलं पाययित्वा, स्वयम् अपि जलम् अपिबन्। उपजलम् अवस्थितं बकं प्रेक्ष्य सन्त्रस्ताः उच्चैः आचुक्रुशुः। सः तु सत्वरम् आगत्य, अच्युतं तुण्डेन अग्रसत्। तालुमूलं प्रविष्टम् अग्निवत् प्रदहन्तम् एनं ग्रसितुम् अशक्नुवन् बहिः उद्गीर्य अतिरुषा तुण्डेन हन्तुम् अभ्यद्रवत्। आपतन्तं च तं बलात् दोर्भ्यां तुण्डयोः गृहीत्वा श्रीकृष्णः, पश्यत्सु गोपबालकेषु, वीरण-वत्स-लीलं विददार। श्रीकृष्णस्य तद्-अद्भुतं कर्म दृष्ट्वा सविस्मयाः सरामाः गोपबालकाः मृत्युमुखात् विमुक्तम् इव तं परिरभ्य, निर्वृताः सवत्साः व्रजम् उपेत्य तत् निवेदयामासुः। गोपाः गोप्यश्च अतिविस्मिताः प्रेत्य आगतम् इव एनं सस्पृहम् ऐक्षन्त। नन्दादयः अपि भगवाता गर्गेण यदुक्तं ‘ नारायणसमो गुणैः’ इति, तत् अवितथम् एव इति मुदम् अवापुः।

**(विवरणम्)** अयं वाक्यसमुदायः गोपालकृष्णेन अनुष्ठितं बकस्य संहरणम्-नन्दादीनाम् आश्चर्यगमनं च वर्णयति। बलराम-कृष्णौ अवतारपुरुषौ भवतः खलु। तौ समस्तान् अपि लेकान् पालयतः। तादृशौ इमौ , इदानीम् , गवां,वत्सानां च पालकौ भवतः। प्रातराशनं स्वीकुरुतः। समानवयस्कैः सह वत्सान् पालयतः च। प्रतिदिनम् एवं प्रचलति । कदाचित् गोपबालकाः दाहं शमयितुं वत्सान् जलाशयं नयन्ति। जलं पातुं वत्सान् जलाशयं प्रवेशयन्ति। वत्सान् जलं पाययन्ति। स्वयम् अपि जलं पिबन्ति। तस्मिन् एव समये, जलस्य समीपे कश्चन बकः विद्यते। गोपबालकाः बकं पश्यन्ति। विकृतेन बकदर्शनेन भयं यान्ति। उच्चैः क्रोशन्ति। श्रीकृष्णः गोपबालकानाम् आक्रोशं शृणोति। सत्वरं (शीघ्रम्) तत् जलाशयम् आगच्छति। तत्र बकः श्रीकृष्णं तुण्डेन ग्रसतिउ भक्षयति। श्रीकृष्णः तालुमूलं प्रविशति। श्रीकृष्णः अग्निवत्

बकस्य तालुभागं दहति। बकः श्रीकृष्णं ग्रसितुम् अशक्तः भवति। श्रीकृष्णं बहिः उद्वमति। अतिरुषा तुण्डेन श्रीकृष्णं हन्तुम् अभिगच्छति। श्रीकृष्णः बाहुभ्यां बकस्य तुण्डौ गृह्णाति। श्रीकृष्णः बलात् बकं विदारयति। गोपबालकाः श्रीकृष्णस्य तद्-अद्भुतं कर्म पश्यन्ति। विस्मिताः भवन्ति। बलरामः अन्ये च गोपबालकाः श्रीकृष्णं मृत्युमुखात् विमुक्तम् इव चिन्तयन्ति। निर्वृताःउ आन्दोलनरहिताः, भवन्ति। वत्सैः साकं व्रजं गच्छन्ति। श्रीकृष्णस्य साहसकथां व्रजवासिनां कथयन्ति। गोपाः गोप्यश्च विस्मिताः भवन्ति। साहसिकं श्रीकृष्णं सस्पृहं पश्यन्ति। नन्दादयः अपि भगवाता गर्गेण उक्तं ' नारायणसमो गुणैः' इति, वचः स्मरन्ति। (गुणैः =अनुग्रह,आग्रह,पराक्रम,सत्रुसूदनादिगुणैः तोलने अयं बालकृष्णः, नारायणेन = विष्णुना, समः= समानः भवति इति तस्य वाक्यस्य अर्थः) सन्तोषम् आप्नुवन्ति।

**स्वावलोकनप्रश्नाः**

१.गोपबालकाः किमर्थम् उच्चैः आचुक्रुशुः ?

२.'अग्निवत् प्रदहन्तम् एनं ग्रसितुम् अशक्नुवन्' अत्र 'एनम्' कं परामृशति ?

३.श्रीकृष्णः बकासुरं कथं विददार ?

४.श्रीकृष्णस्य तद्-अद्भुतं कर्म दृष्ट्वा सरामाः गोपबालकाः कीदृशाः अभवन् ?

५.गोपाः गोप्यश्च तद्-अद्भुतं कर्म श्रुत्वा श्रीकृष्णं कथं ऐक्षन्त ?

### ५.३.५.गोपालकैः सह क्रीडनम् :-

**(मूलम्)**४०. एकस्मिन् दिने वनाशने कृतमतिः श्रीकृष्णः प्रातः एव समुत्थाय सुमधुरेण शृङ्गरवेण गोपालान् गोवत्सान् च प्रबोध्य, सहस्राधिकान् गोवत्सान् पुरस्कृत्य, सरामः वनं प्रतस्थे। तेन प्रतिबोधिता अन्ये अपि गोपाः सस्निग्ध-अन्न-भाण्ड-शिक्यः गृहीतवेत्राः असङ्ख्येयानि स्वानि स्वानि गोधनानि तम् अन्वयुः। कृष्ण -वत्सैः सह सर्वान् अपि वत्सान् एकीकृत्य चारयन्तः यदि श्रीकृष्णः दूरगतः भवेत् तदा तं स्प्रष्टुम् अहमह- मिकया अधावन्। तेषु केचन कोकिलकूजितानि, अपरे भेकरुतानि, अन्ये च अन्येषां पतत्रिणां रुतानि च अनुचक्रुः। इतरे नृत्यतः बर्हिणः अनुसृत्य ननृतुः। एवं गोपाः नानाविधाः बालक्रीडाः क्रीडन्तः वत्सान् चारयन्ति स्म। प्राक्तन-पुण्यवशेन योगिनाम् अपि दुर्लभदर्शनं मायार्भकं गोविन्दम् अनुक्षणं साक्षात् कुर्वन्तः तेन सह क्रीडन्तः वने सानन्दं विचेरुः।

**(विवरणम्)** अयं वाक्यसमुदायः बृन्दावने गोपबालकैः सह गोपालकृष्णस्य विचरणम्,विनोदनम्, विहरणं च वर्णयति। प्रतिदिनं मित्रैः साकं गाः पालयतः श्रीकृष्णस्य, कदाचित् सर्वैः मिलित्वा वने भोजनं कर्तव्यम् इति बुद्धिः भवति। श्रीकृष्णः प्रातः एव उत्तिष्ठति। (शृङ्गः नाम जनपदीयः कश्चन वाद्यविशेषः। तस्य रवः श्रवणपेयं भवति) सुमधुरेण शृङ्गरवेण गोपालान् गोवत्सान् च प्रबोधयति। सहस्राधिकान् गोवत्सान् पुरतः करोति। बल -रामेण साकं वनं गच्छति। श्रीकृष्णेन आहूताः अन्ये अपि गोपाः रुचिकरान् पाकपदार्थान् कुर्वन्ति।शिक्येषु पाक -पदार्थानां भाण्डानि स्थापयन्ति। बाहुभ्यां वहन्ति। कटान् च नयन्ति। सहस्रशः गावः गोपान् अनुयान्ति। तत्रसर्वे वत्साः मिलिताः चरन्ति। कृष्णः अन्यैः गोपबालकैः क्रीडति। गोपबालकाश्च श्रीकृष्णेण क्रीडितुम् अहमहमिकया धावन्ति। सर्वे एकत्र मिलन्ति। तेषु केचन कोकिलाः इव कूजन्ति,अपरे भेकाः इव रुवन्ति। अपरे केचन अन्येषां पक्षिणां रुतानि अनुकुर्वन्ति। इतरे मयूराः इव नृत्यन्ति। एवं गोपाः नानाविधं क्रीडन्ति। वत्सान् चारयन्ति। स्वयं वने सानन्दं विचरन्ति च। योगिनाम् अपि दुर्लभः भगवान् विष्णुः, गोपबालकानां सुलभदर्शनः भवति। अहो ! गोपबालकानां भाग्यम् । गोपबालकाः धन्याः भवन्ति खलु।

**स्वावलोकनप्रश्नाः**

१.श्रीकृष्णः केन वाद्यविशेषेण गोपालान् गोवत्सान् च प्रबोधितवान् ?

२.'गृहीतवेत्राः ... स्वानि स्वानि गोधनानि च,तम् अन्वयुः' अत्र 'तम्' कं परामृशति ?

३. योगिनाम् अपि दुर्लभदर्शनः कः ?

### ५.३.६.बकासुरस्य संहरणम् :-

**(मूलम्)** ४१. अथ तेषां सुख-क्रीडन-वीक्षण-अक्षमः पूतना-बक-अनुजः कंसानुशिष्टः बकः नाम राक्षसः सरामं श्रीकृष्णं गोपबालकान् च हन्तुमुद्युक्तः तत्र आजगाम।उपेत्य च सर्वेषाम् अपि तेषां ग्रसन-इच्छया योजन- आयतं महाद्रिपीवरं महाद्भुतम् आजगरं रूपम् आस्थाय,धरायाम् अधरोष्टम् अभ्रमण्डले उत्तरोष्ठं च व्यादाय रथ्यायाम् अनजिह्वः,गुहायाम् अनास्यः पथि अशेत। तत् दृष्टवा गोपालाः साक्षात् बृन्दावनश्रियम् अद्रिकन्दरं मन्यमानाः तत्रैव अजगरतुण्ड-साम्यम् उत्प्रेक्षमाणाः निर्भयं प्रवेष्टुमैच्छन्। यावद् भगवान् कन्दरभ्रान्त्या वस्तुतः अजगर-आस्ये प्रविविक्षून् आत्मीयान् निषेध्दुं मनः दधे, तावत् एव सर्वे एते तत्र प्रविविशुः। परं तु बकारेः प्रवेशं निरीक्षमाणेन तेन नैव व्यगीर्यन्त। तत् अवलोक्य श्रीकृष्णः

अस्य विशसनम्, आत्मीयानां च रक्षणं, कथं स्यात् इति विचिन्त्य स्वयम् अपि तत्र प्राविशत्। तत् दृष्टवा घनान्तरिताः देवा 'हा हा' इति चुक्रुशुः। अघसुहृदः कंसादयश्च नितरां जहृषुः। ततः यावत् असौ खलः वासुदेवेन सह सर्वान् अपि एतान् संवृत्य , मुखं चूर्णीकर्तुम् इयेष तावत् एव सर्वज्ञः सः भगवान् तस्य गले ववृधे। प्रमाणाधिकेन तद्वपुषा निरूद्धवायुप्रसरो बहिर्गतलोचनः सः खलः क्षणम् इतस्ततः भ्रमन् गतासुः अभवत्। मुकुन्दः अपि परेतान् स्वसुहृदः समुत्थाप्य तैः सह बहिः निर्जगाम।

**(विवरणम्)** अयं वाक्यसमुदायः गोपालकृष्णेन अनुष्ठितं बकासुरसंहारं वर्णयति। राम–कृष्णौ गोवत्सपाल– नव्याजेन सहचरैः गोपबालकैः सोत्साहं सोल्लासं सविनोदं क्रीडतः। गोपबालकैः सह,बलराम–कृष्णयोः क्रीडनं कंसचोदिताः राक्षसाः न सहन्ते। तेषु बकनामकः अन्यतमः अस्ति। बकः पूतनायाः अनुजः। बकः प्रभावपूर्णान्, महिमान्वितान् हन्तुं कंसेन आदिष्टः कश्चन क्रूरः राक्षसः। बलरामं श्रीकृष्णं गोपबालकान् च हन्तुम् इच्छति। श्रीकृष्णः गोपबालकैः सह यत्र गाः चारयति तत्र आगच्छति। योजन–आयतं= दीर्घं,महापर्वताकारं भयङ्करम् आजगररूपं धरति। गोपबालकानां मार्गं विस्तीर्य तिष्ठति। सर्वान् अपि तान् ग्रसितुम् इच्छति। भूमौ अधरोष्टं ,आकाशे उत्तरोष्ठं च यथा भवति तथा मुखं व्याददाति। गोपबालकानां, वदने प्रवेशन भ्रान्ति–अपनोदनाय, रथ्यायाम् आवृते स्वस्मिन्, बकः कपटेन जिह्वां वा आस्यं वा वहति। गोपबालकाः बकं पश्यन्ति। बकं साक्षात् बृन्दावनश्रियम् अद्रिकन्दरं मन्यन्ते। अजगरतुण्ड इव वर्तते इति साम्यं कथयन्ति। वस्तुतः अजगरतुण्डः इति न अवगच्छन्ति। अजगरतुण्डे एव निर्भयं प्रवेष्टुम् इच्छन्ति। यावद् भगवान् आत्मीयान् निषेध्दुं इच्छति, तावत् एव सर्वे गोपबालकाः अजगररूपधारिणि बके प्रविशन्ति। श्रीकृष्णस्य प्रवेशं प्रतीक्षमाणः बकः प्रविष्टान् नैव ग्रसति। श्रीकृष्णः सर्वं परिशीलति। बकं हन्तुम्, सहचरान् रक्षितुं च चिन्तयति। स्वयम् अपि अजगररूपधारिणि बके प्रविशति।अजगररूपधारिणि बके श्रीकृष्णस्य प्रविशेन सर्वत्र अन्धकारम् आवृतम्। देवाः श्रीकृष्णस्य प्रमादं चिन्तयन्ति। 'हा हा' इति क्रोशन्ति। पापकर्माणः कंसादयस्तु भृशं हर्षन्ति। ततः यावत् बकः श्रीकृष्णेन सह सर्वान् चूर्णीकर्तुम् इच्छति तावत् श्रीकृष्णः,बकस्य कण्ठे, बकात् अधिकप्रमाणेन, विपरीततया आत्मानं वर्धयति। अधिकप्रमाणेन वपुषा बकस्य श्वासः निरुद्धः भवति। किञ्चित् कालं क्षोभाम् अनुभवति। लोचने बहिः आयातः। पीडाम् असहमानः बकः अन्ततः असून् च त्यजति। श्रीकृष्णः अपि बकस्य ग्रसनेन मृतान् सहचरान् सञ्जीवयति। सर्वैः बहिः निर्गच्छति।

**स्वावलोकनप्रश्नाः**

१.बकः नाम कः ?

२.सः किमर्थं तत्र आजगाम ?

३. बकः पथि कथम् अशेत ?

४.पथि आवृतं बकं गोपालाः कं मेनिरे ? किं चक्रुः ?

५.बकासुरः कथं गतासुः अभवत् ?

### ५.३.६.१.बकासुरसंहरणाय श्रीकृष्णस्य अभिनन्दनम् :-

**(मूलम्)** ४२.निर्गते तस्मिन् तत्प्रतीक्षया अन्तरिक्षे अवस्थितम् अहिशरीरोत्थितं शुद्धसत्वमयं ज्योतिः पश्यत्सु त्रिदिवेषु तस्मिन् अविशत्। यस्य प्रतिकृतिं हृदन्तरे निरन्तरं ध्यायन्तः प्रह्लादादयः उत्तमां गतिं प्रापुः सः एव स्वयं यस्य हृदयं प्रविष्टः, तस्य भाग्यं किमु वक्तव्यम् ? गोपबालकस्य तत् अद्भुतं कर्म दृष्ट्वा, पुष्पवृष्टिभिः सुराः, नर्तनैः अप्सरसः, गीतैः गायकाः, वाद्यधराश्च वाद्यकैः, विप्राश्च स्तवैः, मरुद्गणाश्च जयनिस्वनैः तम् अभिननन्दुः। अजः अपि इमान् मङ्गल-वाद्य-गीतिका-स्वनान् आकर्ण्य, समागतः दृष्ट्वा तत् अद्भुतं कर्म, विस्मयं प्रपेदे। शुष्कं तत् आजगरं चर्म बृन्दावने व्रजवासिनां बहुकालं क्रीडागह्वरम् आसीत्।

**(विवरणम्)** अयं वाक्यसमुदायः बकासुरसंहराय गोपालकृष्णं देवगणाः अभिनन्दन्ति इति अंशं वर्णयति। बकः प्राणान् त्यजति। मरणानन्तरं बकात् आत्मज्योतिः अन्तरिक्षं प्रविशति। भगवति (श्रीकृष्णे) विलीनाय तत्र प्रतीक्षते। श्रीकृष्णः सहचरैः बकात् बहिः निर्गच्छति खलु। बकस्य आत्मज्योतिः, बकात् बहिः आगते श्रीकृष्णे विलीनं भवति। एतत् सर्वम् आकाशे स्थित्वा देवाः पश्यन्ति। हन्तुम् आगतस्य विरोधिनः हि ईदृशं भाग्यम्,सदा मनस्सु अर्चामूर्तिं ध्यायतां प्रह्लादप्रभृतीनां भाग्यं किमु वक्तव्यं भवति ? अन्तरिक्षे सुरगणाः श्रीकृष्णस्य बकसंह- रणम् अद्भुतं कर्म पश्यन्ति। तम् अभिनन्दन्ति। सुराः पुष्पाणि किरन्ति। अप्सरसः नृत्यन्ति। गायकाः गीतानि आलपन्ति। वाद्यधराश्च श्रवणसुभगं वादयन्ति। विप्राश्च वेदसूक्तैः स्तुवन्ति। मरुद्गणाश्च जय जय इति ध्वानानि उच्चैः कुर्वन्ति। ब्रह्मा अपि इमान् मङ्गल-वाद्य-गीतिका-स्वनान् स्वयं शृणोति। तत्र आगच्छति। श्रीकृष्णेन निर्वर्तितं अद्भुतं कर्म पश्यति। विस्मयं प्राप्नोति। शुष्कं तत् आजगरं चर्म बृन्दावने व्रजवासिनां बहुकालं क्रीडाप्राङ्गणं भवति ।

**स्वावलोकनप्रश्नाः**

१.पश्यत्सु त्रिदिवेषु, तस्मिन्उ श्रीकृष्णे, किम् अविशत् ?

२.गोपबालकस्य तत् अद्भुतं कर्म दृष्ट्वा,सुराः कैः अभिननन्दुः ?

३. नर्तनैः के अभिननन्दुः ?

४.शुष्कं तत् आजगरं चर्म किम् आसीत् ?

### ५.३.७.गोपबालकैः श्रीकृष्णः :-

**(मूलम्)** ४३.एवं मृत्योः अघवदनात् स्वान् अर्भकान् मोचयित्वा, मृदुल-अच्छ-वालुकं स्फुटत्-सरोगन्ध- हृतालि-पत्रि-ध्वनि-प्रतिध्वान-लसत् द्रुमाकुलं सरसः पुलिनम् आसाद्य श्रीकृष्णः वत्सपान् इदम् उवाच -' भोः वयस्याः अतीतः भोजनकालः, क्षुधार्ताः वयम्, अतिरमणीयः अयं देशः, अतः अत्र वत्सान् अपः पाययित्वा, भोक्तव्यम् अस्माभिः, उपसरः तीरं वत्साः चरन्तु ' इति। तथा इति प्रतिगृह्य तत् वाक्यं, परितः पद्मकर्णिकां दलानि इव, श्रीकृष्णं परितः मण्डलाकारेण तदभिमुखाः प्रफुल्लदृशः निषेदुः। पत्र-पुष्प-शिलाफलकादिभिः कृतभाजनाः ते व्रजार्भकाः स्वां स्वां भोज्यरुचिं मिथः दर्शयन्तः हसन्तश्च बुभुजुः। बालकेलिः यज्ञभोक्ता भगवान् अपि मध्ये जठरवसनम्, वेणुं कक्षे च शृङ्गवेत्रे, वामपाणौ दध्यन्नम्, अङ्गुलीषु उपदंशान् च बिभ्रत्, मध्ये तिष्ठन् नर्मवचोभिः परितः समावृतान् अर्भकान् हासयन्, सविस्मयं पश्यति स्वर्-लोक-वासिनि जने,दध्योदनम् अभुङ्क्त।

**(विवरणम्)** अयं वाक्यसमुदायः सहचरैः कृतं गोपालकृष्णस्य विनोदभोजनं वर्णयति। श्रीकृष्णः मृत्यु -मुखात् (बकात्) स्वान् अर्भकान् रक्षति। अनन्तरं सुन्दरं सरः किञ्चित् अस्ति। तत् सरः लताभिः विस्तीर्णं विद्यते। लतासु कोमलानि शुभ्राणि नवानि च पत्राणि सन्ति। सुगन्धः वायुः प्रवहति। सुगन्धेन भ्रमराः आकृष्टाः भवन्ति। भ्रमराश्च झुंकारं कुर्वन्तः वृक्षान् परितः भ्रमन्ति। श्रीकृष्णः एतत्-सरसः पुलिनम् प्राप्नोति। श्रीकृष्णः तत्र वत्सपालकान् ' भोः वयस्याः !भोजनाय कालः अतीतः, वयं सर्वे अपि क्षुधा बाधिताः स्मः , अयं प्रदेशः अतिरमणीयः अस्ति। अतः वत्सान् अत्र आनयन्तु। अत्र जलं पाययन्तु। सरसः तीरे वत्साः चरन्ति। वयम् अत्र भोजनं कुर्मः ' इति आह्वयति। सहचराश्च श्रीकृष्णस्य वचः शृण्वन्ति। तद्वचः स्वीकुर्वन्ति। परितःपद्मस्य कर्णिकाम्(मध्यभागम्) दलानि यथा समन्ततः युक्तानि भवन्ति, तथा, श्रीकृष्णं

परितः मण्डलाकारेण सहचराः उपविशन्ति। श्रीकृष्णस्य अभिमुखाः उपविशन्ति। विकसितवदनाः सन्तः उपविशन्ति। तत्र लब्धानि वृक्षाणां पत्राणि पुष्पाणि च एव उपयुज्य भोजनपात्राणि कुर्वन्ति। केचन शिलाफलकानि एव भोजनपात्राणि कुर्वन्ति। ते व्रजार्भकाः स्वां स्वां भोज्यरुचिं मिथः दर्शयन्ति। परस्परं हसन्तः भुजन्ति। बालकेलिप्रियः यज्ञभोक्ता भगवान् अपि मध्ये जठरे = कटिप्रदेशे, वसनं उवस्त्रं धरति। कक्षे वेणुं वहति। वामहस्ते दध्यन्नम्, अङ्गुलीषु उपदंशान् च धरति। मध्ये तिष्ठति। नर्मवचांसि भाषते। परितः समावृतान् अर्भकान् हासयति, विनोदयति च। दध्योदनं खादति। अन्तरिक्षे सुराः,सहचरैस्सह श्रीकृष्णस्य क्रीडाः पश्यन्ति। सहचराः भागयशालिनः धन्याः इति सहचराणां भाग्यं प्रशंसन्ति च।

**स्वावलोकनप्रश्नाः**

१.'अतीतः भोजनकालः ... उपसरस्तीरं चरन्तु' इदं कं प्रति कस्य वचनम् ?

२.श्रीकृष्णः वत्सपान् किम् उवाच ?

३.व्रजार्भकाः कथं बुभुजुः ?

४.बालकेलिः यज्ञभोक्ता भगवान् कथम् अभुङ्क्त ?

### ५.३.८.लीलार्भकस्य भगवतः(श्रीकृष्णस्य) महत्त्वम् :-

**(मूलम्)** ४४. एवं लीलार्भकेण अच्युतेन सह सानन्दं भुञ्जानेषु गोपबालकेषु कृष्णलोभिताः वत्साः सुदूरं वनान्तरं प्राविशन्। तान् अदृष्ट्वा सभयान् संसम्भ्रमान्, विरम्य अशनं, तत्-गवेषणाय जिगमिषतः वत्सपान् निवार्य, श्रीकृष्णः सपाणि-कबलः तत्-गवेषणाय प्रातिष्ठत। अत्रान्तरे पुरा भगवतः अघासुरमोक्षणं वीक्ष्य, सविस्मयः पद्मयोनिः अन्यत् अपि लीलार्भकस्य भगवतः महत्त्वं द्रष्टुकामः इतः अन्यत्र वत्सान् वत्सपान् च नीत्वा अन्तर्दधौ। भगवान् तु शैल-दरी-कुञ्जेषु आत्मवत्सकान् विचित्य, क्वापि वनान्तरे वत्सान् अदृष्ट्वा पुनः सरःपुलिनम् आजगाम। अत्र वत्सपालान् अपि अदृष्ट्वा पुनः उभौ अपि समन्ततः विचिकाय। अथापि क्वापि वनान्तरे तान् अपश्यन् प्रतिनिवृत्य सर्वज्ञः सः सर्वम् इदं विधिकृतम् इति विदित्वा तत्-मातृणां ब्रह्मणश्च प्रमोदाय उभयायितम् आत्मानं चक्रे। वत्सानां वत्सपानान् च यावत् वपुः, यावत्कराङ्घ्र्यादिकम्,यावद्दृष्टि विषाणवेणुदलशिक्यम्,यावत् विभूषणाम्बरम्, यावत् शील-गुण-अभिधाकृतिवयः, यावत् विहारादिकं, तत्सर्वं तथैव विष्णुमयम् आसीत्।

**(विवरणम्)** अयं वाक्यसमुदायः गोपालकृष्णस्य अनन्तशक्तिं महत्त्वं च निरूपयति। गोपबालकाः एवं अर्भकेण, अच्युतेन= श्रीकृष्णेण, सह सोल्लासं क्रीडन्ति। सानन्दं भुजन्ति। एवं श्रीकृष्णस्य पशुपालनविधानेन आकृष्टाः वत्साः अपि श्रीकृष्णम् एव अनुयान्ति। तथा कुर्वन्तः कदाचित्, सुदूरम् अन्यम् अरण्यं प्रविशन्ति। वत्सपाः अन्ये गोपबालकाः वत्सानाम् अदर्शनेन भयं यान्ति। सम्भ्रान्ताः भवन्ति। पानं खादनं च विरमन्ति। वत्सानां गवेषणाय= अन्वेषणाय, गन्तुम् इच्छन्ति। श्रीकृष्णः भगवान्, प्रेमामृतवर्षी च खलु। श्रीकृष्णः जन्मतः एव आपन्नान् उद्धरति। आपदुद्धरणं श्रीकृष्णस्य स्वभावः। प्रकृते अपि गोपबालकान् वत्सानाम् अन्वेषणप्रयत्नात् निवारयति। श्रीकृष्णः, पाणौ कबलं धरन् = अन्नं खादन् एव, वत्सानां गवेषणायउअन्वेषणाय, प्रतिष्ठते। इतः पूर्वं एव खलु श्रीकृष्णः अघासुरम्उबकं निहन्ति। तस्य मोक्षम् अपि अनुगृह्णाति । बकस्य निहननं तस्य मोक्षस्य अनुग्रहणं दृष्ट्वा पद्मयोनिःउ ब्रह्मा, विस्मितः भवति। श्रीकृष्णस्य लीलान्तरं, महत्त्वं च द्रष्टुम् इच्छुः भवति। इच्छापूरणे भागतया ब्रह्मा सुदूरम् आगतान् वत्सान् नयति। अन्तर्दधाति। श्रीकृष्णः शैलानां दरीषु कुञ्जेषु च सर्वत्र वत्सकान् अन्विष्यति। कुत्रापि वत्सान् न लभते। कर्तव्यम् सहचरैः आलोचितुम् पुनः सरः पुलिनम् आगच्छति। अत्र वत्सपालाः अपि अदृश्याः भवन्ति। पुनः बलराम–कृष्णौ उभौ अपि समन्ततः वत्सान् वत्सपान् च अन्विष्यतः। कुत्रापि न लभेते। प्रतिनिवृत्तौ भवतः। श्रीकृष्णः सर्वं जानाति खलु। सर्वम् इदं, विधिकृतम्उ ब्रह्मणा अनुष्ठितम्, इति अवग्च्छति। वत्सानां मातरः यथा खिन्नाः न भवन्ति, ब्रह्मणः विनोदश्च साधितः भवति, तथा, उभयायितम् उवत्सत्वेन ,वत्सपालत्वेन च आत्मानं सृजति। यस्य कस्यापि सन्देहः यथा न भवति, तथा, श्रीकृष्णः वत्सानां वत्सपानां च यादृशः अवयवविन्यासः तादृशेन अवयवविन्यासेनैव द्वितीयान् (□□□□) वत्सान् वत्सपान् च अवतारयति। बृन्दावने गावः, गोवत्साः, गोपबालकाः च एवं व्रजं सर्वं कृष्णमयं भवति।

**स्वावलोकनप्रश्नाः**

१.श्रीकृष्णः कीदृशः सन् वत्सानां गवेषणाय प्रातिष्ठत ?

२.श्रीकृष्णः कीदृशान् वत्सपान् निवारितवान् ?

३.पद्मयोनिः किं कर्तुकामः वत्सान् वत्सपान् च नीतवान् ?

४.सर्वज्ञः श्रीकृष्णः ’सर्वम् इदं विधिकृतम्’ इति विदित्वा किं चकार ?

### ५.३.९.आत्मना आत्मनः पालनम् :-

**(मूलम्)** ४५.एवं सर्वस्वरूपः भगवान् दिनान्ते आत्मरूपान् वत्सान् निवार्य यथापूर्वम् आत्मरूपैः वत्सैः क्रीडन् व्रजं प्राविशत्। प्रविश्य च तत् तत् गोपबालरूपः तत् तत् गेहं प्रविवेश। श्रुतवेणुस्वनाः तत्-मातरः अपि सत्वरं समुत्थिताः स्वस्वसुतायितं परमेश्वरं परिरभ्य, प्रस्नुतं स्तन्यम् अपाययन्। ततः उन्मर्दन-गन्धलेपन -अलङ्करण-रक्षातिलक-अशनादिभिः तत् तत् मातृभिः सुलालितः माधवः स्वचरितैः अतुलं प्रहर्षं जनयन् आस्त। गावः अपि सत्वरं गोष्ठम् उपेत्य हुङ्कारघोषेण आकारितान् स्वान् स्वान् वत्सान् लिहन्त्यः स्नेहप्रस्नुतं पयः अपाययन्। एवं गवां गोपीनाञ्च वत्सेषु वत्सपेषु च यथापूर्वम् उपलालनादिरूपा मातृता आसीत्। परन्तु इदानीं ततः स्नेहाधिक्यम् अतिशयम् आसीत्। इत्थं भगवान् वत्स-गोपबाल-व्याजेन आत्मना आत्मानं पालयन् वने गोष्ठे च वर्षम् एकं चिक्रीडे।

**(विवरणम्)** अयं वाक्यसमुदायः गोपालकृष्णः युगपद्= एककाले एव पालितः पालकश्च भवति इति अंशं निरूपयति। श्रीकृष्णः एक एव सङ्कल्पमात्रेण बहुत्वम् आप्नोति। अनन्तवत्साः भवति। अनन्तवत्सपाश्च भवति। एवं भगवान् सर्वस्वरूपः भवति। सायं भवति। आत्मरूपान् वत्सान् एकत्र समावेशयति। आत्मरूपैः वत्सैः पूर्वम् इव एव क्रीडति। व्रजं प्रविशति। यस्य यस्य यत् यत् गृहं भवति सः सः तत् तत् गृहं निस्संकोचं प्रविशति। वेणुं नादयति। वेणुनादं श्रुत्वा मातरः पूर्वम् इव समुत्तिष्ठन्ति। स्वस्वसुतम् इव प्रवर्तमानं परमेश्वरं अङ्के परिगृह्णन्ति। प्रस्नुतं स्तन्यम् पाययन्ति। ततः स्नापयन्ति। वस्त्राणि धारयन्ति। गन्धं लेपयन्ति। ललाटे रक्षातिलकं स्थापयन्ति। भोजयन्ति च। एवं तत् तत् मातृभिः माधवः लालितः भवति। वत्सपरूपः भगवान् स्वचरितैः अतुलं प्रहर्षं जनयति। गावः अपि सत्वरं गोष्ठम् उपयान्ति। 'अम्ब'इति आहूतान् स्वान् स्वान् वत्सान् लिहन्ति। वात्सल्येन प्रस्नुतं पयः पाययन्ति। एवं गवां वत्सेषु,गोपीनाञ्च वत्सपेषु च यथापूर्वम् उपलालनादिरूपा मातृता भवति। परन्तु इदानीं पूर्वापेक्षया स्नेहम् अधिकं भवति। इत्थं भगवान् वत्सः भवति, गोपबालश्च भवति। आत्मना आत्मानं पालयति। एवं सर्वं कृष्णमयं कुर्वन् वने गोष्ठे च वर्षम् एकं क्रीडति।

**स्वावलोकनप्रश्नाः**

१.भगवान् कथं व्रजं प्राविशत् ?

२.भगवान् कथं गेहं प्रविवेश ?

३.(भगवता सृष्टाः) वत्सपानां मातरः कथं स्तन्यम् अपाययन् ?

४.गावः कथं स्तन्यम् अपाययन् ?

५.गवां गोपीनाञ्च मातृता कीदृशी ?

### ५.३.१०.बलरामस्य निरहङ्कारः :-

**(मूलम्)** ४६. एकदा पञ्चषड्भिः दिवसैः आपूरयिष्यमाणे वत्सरे, सरामः देवकीसुतः वत्सान् चारयन् वनम् आविशत्।तदा गोवर्धनाद्रिशिखरे तृणं चरन्त्यः गावः उपव्रजमतिदूरे तृणं चरतः वत्सान् प्रेक्ष्य, स्नेहपरवशाः अस्मृतात्मानः बलात् निरुन्धतः गोपालान् अतिलङ्घ्य, उन्नमितकन्धराः, उत्पुच्छयानाः, अतिदुर्गम मार्गेण व्रजम् उपेत्य मुक्तस्तनैः वत्सैः सङ्गताः, अङ्गानि लिहन्त्यः, सत्स्वपि गोवर्धनस्य अधस्तात् नवेषु वत्सेषु, प्रस्नुतं पयः अपाययन्। तासां पृष्टतः अनुधावन्तः गोपालाः अनुधावनक्लेशेन निरर्थक-प्रयास-लज्जया च अतीव क्रुध्यन्तः व्रजम् आगत्य सवत्साः ताः दृष्ट्वा, गतमन्यवः जातानुरागाः वत्सान् परिरभ्य परमां मुदम् अवापुः। रामस्तु आत्मना सह सर्वस्यापि व्रजस्य वत्सेषु वत्सपेषु च श्रीकृष्णः एव प्रेमर्द्धेः कारणम् अविजानन् - ' किम् इयं दैवी आसुरी मानुषी वा माया इति विकल्प्य, ननु इयं मम भ्रातुः अच्युतस्य एव माया, यतः मम अपि विमोहिनी इति निश्चित्य, ज्ञानचक्षुषा वत्सान् सर्वान् सवयसः अपि श्रीकृष्णम् अपश्यत्। ततः पुरा वत्साः ऋषीणाम् अंशाः इति वत्सपालास्तु देवानाम् अंशाः इति च अजानम्। इदानीं तु सर्वं त्वम् एव इति अज्ञासिषम्' इति कृष्णम् अवोचत्।

**(विवरणम्)** अयं वाक्यसमुदायः बलरामस्य गोपालकृष्णमहिमावगमनं, अहङ्कारअपनोदनं च वर्णयति। संवत्सरस्य कृते पञ्च वा षट् वा दिनानि न्यूनानि भवन्ति। तदा बलरामेण सह श्रीकृष्णः वनं प्रविशति। वत्सान् चारयति। तत्र कश्चन सन्निवेशः एवं प्रचलति। गावः गोवर्धनपर्वतस्य शिखरेषु तृणार्थं चरन्ति। तदैव , बृन्दावने व्रजस्य सुदूरे वत्साश्च

तृणार्थं विचरन्ति। गोवर्धनपर्वतस्थाः ताः गावः,व्रजस्य सुदूरे तृणार्थं विचरतः वत्सान् पश्यन्ति। स्नेहेन परवशाः भवन्ति। निरुन्धतः गोपालान् न गणयन्ति। कन्धरम् उन्नमन्ति। पुच्छम् उच्चैः चालयन्ति, दुर्गमान् अपि मार्गान् अतीत्य वत्सान् प्रति धावन्ति। वत्सैः सङ्गताः भवन्ति। स्तन्यं त्यजन्ति। अङ्गानि लिहन्ति। प्रस्नुतं पयः पाययन्ति। गवां पृष्टतः गोपालाः किञ्चित् दूरम् अनुधावन्ति। अनुसर्तुम् न शक्नुवन्ति। गावः कुत्र गताः इति गोपालाः गवां गमनं न जानन्ति। लज्जया कोपेन च व्रजम् आगच्छन्ति। तत्र गावः वत्सैः सङ्गताः भवन्ति। गोपबालाः सवत्साः ताः पश्यन्ति। कोपम् अपनुदन्ति। वत्सेषु जातानुरागाः भवन्ति। वत्सान् अङ्के स्वीकुर्वन्ति। परमां मुदं प्राप्नुवन्ति। सर्वस्यापि व्रजस्य, वत्सेषु वत्सपेषु च स्निग्धतायाः प्रेम्णश्च कारणं श्रीकृष्णः एव, इति अमुं विषयं बलरामः न जानाति। एतत् सर्वं बलरामस्य भ्रमं जनयति। किम् इयं देवमाया वा, राक्षसमाया वा, मानवमाया वा, इति सन्दिह्यति। अन्ततः भ्रातुः श्रीकृष्णस्य माया इति निश्चिनोति। श्रीकृष्णस्य माया माम् (बलरामम् ) अपि विमोहयति इति अवगच्छति। विवेकेन दिव्यज्ञानेन च  वत्सान्, सर्वान् सवयसः अपि, श्रीकृष्णम् अवगच्छति। इतः पूर्वं वत्साः ऋषीणाम् अंशाः इति, वत्सपालास्तु देवानाम् अंशाः इति च जानामि । इदानीं तु सर्वं त्वम्= श्रीकृष्णः एव इति जानामि इति श्रीकृष्णं वदति।

**स्वावलोकनप्रश्नाः**

१.वत्सेषु वत्सपेषु च प्रेमर्द्धेः कारणम्  कः ?

२.बलरामः किं निश्चितवान् ?

३.वत्सान् ,सवयसश्च कम् इव अपश्यत् ?

४.ऋषीणाम् अंशाः के?

५.वत्सपालास्तु कस्य  अंशाः ?

६.बलरामः श्रीकृषणं किम्  अवोचत् ?

५.३.११.ब्रह्मणः निश्चेष्टता :-

**(मूलम्)** ४७. अथ स्वयम्भूः स्वमानेन तृटिमात्रकालेन पुनः आगत्य मनुष्यमानेन यथापूर्वं आब्दं क्रीडन्तं श्रीकृष्णं प्रेक्ष्य स्वमनसि इत्थम् अतर्कयत्–यावन्तः गोकुले बालाः सवत्साः,ते सर्वेऽपि मत्–मायामोहिताः सन्तः न अद्यापि पुनः उत्थिताः। तेभ्यः इतरे,यावत् अब्दं कृष्णेन सह क्रीडन्तः एते, कुत्रत्याः ? इति। चिरम् एवं ध्यात्वा अपि मायामोहिताः सर्वे एते सदाश्रयाः इति ज्ञातुं न शशाक। वस्तुतः अविमोहं जगन्मोहनं भगवन्तं विमोहयन् अजः स्वमायया स्वयमेव विमोहितः आसीत्। एवं सविस्मयं पश्यता अजेन तावत् एव सर्वे वत्सपालाः घनश्यामाः पीतकौशेयवाससः चतुर्भुजाः शङ्ख–चक्र–गदा–राजीवपाणयः, वनमालिनः श्रीवत्साङ्कित–वक्षसः, सत्यज्ञान–आनन्दैकरसमूर्तयः अदृश्यन्त। ततः अत्या श्चर्येण हंसपृष्ठे दृष्टिं परावृत्य तत् तेजसा निश्चल– एकादशेन्द्रियः कनकमयी प्रतिमा इव तूर्ष्णीं बभूव।

**(विवरणम्)** अयं वाक्यसमुदायः ब्रह्मा अपि गोपालकृष्णस्य महिमातिशयम् अवगन्तुम् न पारयति इति अंशं निरूपयति। ब्रह्मणः कालमानम् अन्यत्। मानवस्य कालमानम् अन्यत्। ब्रह्मणः तृटि(क्षण)मात्रकालः मानव कालमाने संवत्सरः भवति। ब्रह्मा तृटिकालं निरीक्षते। नाम मानवानां कालमानेन संवत्सरं प्रतीक्षते इत्यर्थः। यथापूर्वं, संवत्सरं यावत्, श्रीकृष्णः स्वयं सृष्टैः वत्सैः वत्सपैश्च क्रीडन् एव, ब्रह्मणः प्रभावं ज्ञातुं प्रतीक्षते। वत्सैः वत्सपैश्च क्रीडन्तं श्रीकृष्णं ब्रह्मा पश्यति। स्वमनसि गोकुले विद्यमानाः गोपबालाः गोवत्साः च सर्वे मम मायया मोहिताः सन्ति। ते अद्य यावत् मम मायामोहात् न उत्थिताः। न बहिः आगताः। तेभ्यः भिन्नाः, कृष्णेन सह संवत्सरं यावत् कीडन्तः एते गोपबालाः गोवत्साः च कुतः आगताः ? इति तर्कयति। चिरम् एवं विचारयति। स्व अधीने मोहिताः सर्वे अपि, कृष्णमायया एव एवं प्रवर्तन्ते इति ब्रह्मा न जानाति। एवं, वस्तुतः कदापि मोहम् अप्रतिपद्यन्तं जगन्मोहनं श्रीकृष्णं विमोहयन्, ब्रह्मा एव,स्वमायया स्वयमेव विमोहितः भवति। अन्ततः ब्रह्मा आश्चर्यम् एति। तत्र विद्यमानाः गोपबालाः विष्णुरूपिणः इव तस्य आभान्ति। सर्वे वत्सपालाः घनश्यामाः भवन्ति। पीतम् अम्बरं धरन्ति। चतुरान् भुजान् वहन्ति। चतुर्षु भुजेषु शङ्खं–चक्रं–गदां–राजीवं च धरन्ति, वनमालाम् कण्ठे अलङ्कुर्वन्ति। श्रीवत्साङ्कितवक्षसः भवन्ति। सर्वे च सत्यस्वरूपाः इव, ज्ञानमूर्तयः इव, आनन्दैकरसमूर्तयः इव ब्रह्मणः दृश्यन्ते। अत्यन्तं आश्चर्यम् अनुभवति। हंसवाहनम् अवतरति। विष्णुमये तत्प्रदेशे सकलानि एकादश इन्द्रियाणि(ज्ञानेन्द्रियाणि पञ्च,कर्मेन्द्रियाणि पञ्च,मनः,आहत्य एकादश इन्द्रियाणि) निश्चलानि करेति। निश्चेष्टितः भवति। सुवर्णप्रतिमा इव तूर्ष्णीं तिष्ठति।

**स्वावलोकनप्रश्नाः**

१.स्वयम्भूः स्वमनसि किम् अतर्कयत् ?

२.स्वयम्भूः किं ज्ञातुं न शशाक ?

३.जगन्मोहनः भगवान् वस्तुतः कीदृशः ?

४.अजः कथं विमोहितः आसीत् ?

५.अजेन काः अदृश्यन्त ?

**(मूलम्)** ४८.एवम् अतर्क्य-स्वमहिमानं द्रष्टुम् अपि अनीशे ब्रह्मणि मुह्यति सति, भगवान् नन्दनन्दनः स्वमायारूपां तिरस्कारिणीम् अपससार। अथवा लोकाभिमानी अयं ममैश्वर्यं द्रष्टुम् अयोग्यः इति ज्ञात्वा पुनः मायां प्रसारितवान्। ततः ब्रह्मा बहिः प्रतिलब्धाक्षः मरणं प्राप्य पुनः उत्थितः इव दिशः दश विलोकयन् पुरस्तात् अतिमनोहरं बृन्दावनम् अद्राक्षीत्। यत्र भगवत्-आवासात् नैसर्गिकशत्रवः अपि सिंहमृगादयः निरस्तक्रोधलोभाः मित्राणि इव आसन्। तत्र च पुरे वत्सान् वत्सपालांश्च विचिन्वन्तं सपाणिकबलं पशुपवंशशिशुत्वनाट्यम् उद्वहन्तम् अगाधबोधं शिखिपिञ्छलसत्-कचम् एकम् अर्भकम् ऐक्षिष्ट। दृष्ट्वा च तं सत्वरं निजाधारणात् अवतीर्य कनकदण्डवत् भूमौ निपत्य चतुर्-मकुट-कोटिभिः तदङ्घ्रियुग्मं स्पृष्ट्वा आनन्दजैः बाष्पसलिलैः तदङ्घ्रियुग्मम् अभिषिषेच। चिरम् उत्थाय, पुनः पुनः श्रीकृष्णस्य पादयोः प्राक् दृष्टं तत् महत्त्वं स्मारं स्मारम् उत्थाय, लोचने प्रमृज्य, लीलागोपार्भकम् अच्युतम् उद्वीक्ष्य, विनम्रकन्धरः कृताञ्जलिः सवेपथुः समाहितः गद्गदया गिरा स्तोतुम् एवम् उपाक्रमत।

**(विवरणम्)** ब्रह्मा गोपालकृष्णस्य महिमानम् अवगच्छति इत्यंशम् अयं वाक्यसमुदायः निरूपयति। ब्रह्मा, ऊहितुम् अपि अशक्यं स्वस्यउ भगवतः,महिमानम्उ प्रभावं, ज्ञातुम् असमर्थः भवति। गाढमोहे पतति। भगवान् श्रीकृष्णः ब्रह्मणः मोहबुद्धिं जानाति एव। श्रीकृष्णः स्वमायाम् उपसंहरति। ततः ब्रह्मा पुनः लौकिकीं दृष्टिं प्राप्नोति। मरणं प्राप्य पुनः उत्थितः इव दश दिशः पश्यति । पुरतः, मनसः आह्लादकरं बृन्दावनं पश्यति। बृन्दावने भगवान् श्रीकृष्णः सान्निहितः अस्ति खलु। तस्मात् सिंह-मृगादयः जन्मवैरम् अपि परित्यजन्ति। काम-क्रोध-लोभ -मोह-मद-मात्सर्येभ्यः मुक्तानि मित्राणि इव स्नेहेन प्रवर्तन्ते। अपि च तत्र एव बृन्दावने ब्रह्मा एकम्

अर्भकं पश्यति। सः च अर्भकः वत्सान् वत्सपालान् च तत्र पालयति। एकतः पाणौ कबलं वहति। अपरतः नृत्यति। सः अगाधबोधः, यस्य कस्यापि न अवगतः भवति। शिरसः कचेषु पिञ्छं च लसति। मनेहरं तम् अर्भकं दृष्ट्वा ब्रह्मा वाहनात् अवतरति। कनकदण्डवत् भूमौ निपतति। ब्रह्मणः चत्वारि मुखानि वर्तन्ते। एकैकस्य मुखस्य एकैकं किरीटम्। एवं चतुर्णां किरीटानां कोटिभिः(□□□□□) अर्भकस्य पादयुग्मं स्पृशति। आनन्देन नेत्रेषु सलिलम् आविर्भवति। तत् जलेन अर्भकस्य चरणारविन्दम् अभिषिञ्चति। चिरम् उत्तिष्ठति। पुनः श्रीकृष्णस्य पादयोः निपतति। पूर्वं दृष्टं तत् महत्त्वं पुनः पुनः स्मरति। नेत्रे प्रमार्जति। अर्भकम्, अच्युतं निश्चिनोति। कन्धरं नमयति। अञ्जलिं बध्नाति। भयेन लज्जया च ब्रह्मणि वेपथुः जायते। तथैव गद्गदया गिरा मनसा स्तोतुम् आरभते।

**स्वावलोकनप्रश्नाः**

१.'अथवा लोकाभिमानी अयं ममैश्वर्यं द्रष्टुम् अयोग्यः'अत्र 'अयम्' कः ?

२.ब्रह्मा बृन्दावनं कथम् अद्राक्षीत् ?

३.ब्रह्मा बृन्दावने कम् ऐक्षिष्ट ?

४.ब्रह्मा बृन्दावने अर्भकं कथम् अभिषिषेच ?

**(मूलम्)**४९. 'नौमीड्य ! ते अभ्रवपुषे तटिदम्बराय गुञ्जावतंसशिखिपिञ्छलसत्कचाय।
वन्यस्रजे कबलवेत्रविषाणवेणुलक्ष्मश्रिये मृदुपदे व्रजपाङ्गजाय' इत्यादिना।।

**(विवरणम्)** अयं श्लोकः ब्रह्मणा कृतां गोपालकृष्णस्य स्तुतिं वर्णयति। भगवन्!त्वम् ईड्यः= स्तुत्यः, त्वाम् अहं वन्दे। भवान् अभ्रवपुः,नीलमेघश्यामः सन् मनांसि हरसि। तटित्= विद्युत् इव, पीतं अम्बरं धरसि। कर्णयोः अवतंसौ लम्बमानौ स्तः। शिरसः केशेषु शिखिनः= मयूरस्य पिञ्छं लसति। कण्ठे वनमालाम् अलङ्करोति। हस्तयोः एकतः कबलम्, अपरतः वेणुं च धरति। अधिकं श्रियं पुष्णाति। तव च पादौ मृदुलौ वर्तेते। व्रजं पाति इति व्रजपः नन्दः, तस्य अङ्गात् जातः श्रीकृष्णः असि । ते= तुभ्यम्, नमः ' इति एवं प्रकारेण ब्रह्मा लीलार्भकं स्तौति।

**स्वावलोकनप्रश्नाः**

१.अभ्रवपुषे इत्यस्य अर्थः कः ?

२.वन्यस्रजे इत्यस्य पर्यायपदं किम् ?

३.व्रजपाङ्गजाय (इत्यस्य)= कृष्णाय, इत्यर्थः कथं भवति ?

५.३.११.१ब्रह्मणः निरहङ्कारः :-

**(मूलम्)** ५०. 'हे भगवन्! अजितज्ञाने प्रयासम् अपास्य स्वस्थाने एव स्थिताः सन्तः सद्भिः उदीरितां श्रवणगोचरां भवदीयवार्तां श्रुत्वा मनो-वाक्-कायैः भवन्तं नमस्यन्तः ये जीवन्ति, त्रिलोक्याम् अन्यैः अजितः अपि त्वम्, तैः जितः असि। हे प्रभो! श्रेयः साधनं त्वत् भक्तिम् उदस्य ज्ञानोपलब्धये ये क्लिश्नन्ति,तेषां तुषावघातिनाम् इव क्लेशः एव परं शिष्यते, नान्यत्। हे अच्युत! पुराऽपि बहवो योगिनः योगेन अनवाप्यं ज्ञानं त्वदर्पितसकलव्यापाराः निजकर्मलब्धया भक्त्या एव ते परां गतिं प्रपेदिरे। आत्मनि देहादिकं देहादौ आत्मानं च अध्यास्य, यथा गृहे नष्टं वने मृग्यते, एवं बहिः मृगयन्ति अज्ञाः। अहो! तेषाम् अज्ञता। यासां स्तन्यामृतं भवता मुदा पीतम्, यासां च तृप्तये त्वं वत्सवत्सपालरूपेण अद्यापि असि, ताः व्रजगोरमण्यः अतीव धन्याः। अहो ! व्रजौकसां भाग्यम् , येषां पूर्णं परमानन्दं सनातनं ब्रह्म त्वं मित्रम् असि ' इति एवम् अनेकधा श्रीकृष्णम् अभिष्टूय त्रिः परिक्रम्य दण्डवत् प्रणम्य पादयोः तेन अनुज्ञातः पितामहः स्वधाम जगाम।

**(विवरणम्)** अयं वाक्यसमुदायः ब्रह्मा अहङ्कारात् मुक्तः भवति इत्यंशं वर्णयति। 'हे भगवन्! केषाञ्चन ज्ञानस्य आर्जने अभिनिवेशः न भवति। ते जन्मतः प्राप्तेन ज्ञानेनैव मनो-वाक् -कायैः भवन्तम् आराधयन्ति। सद्भिः= योगिभिः, उदीरितं शृण्वन्ति। भवन्तं स्मरन्ति, नमन्ति जीवन्ति। तादृशैः निरहङ्कारिभिः सात्विकैः त्वं जितः असि। तदितरे भवतः आलोचनाम् अपि कर्तुं न प्रभवन्ति। हे प्रभो! त्वयि भक्तिः श्रेयसः साधिका भवति। भक्तिम् अनभ्यस्य ज्ञानस्य आर्जनाय केचन क्लिश्नन्ति, तुषेषु मुसलेन निहननं यथा केवलं प्रयोजन -शून्यम्, प्रयासहेतुकं एव च भवति, तथा तेषां क्लेशः एव परं शिष्यते, नान्यत्। अच्युत! बहवो योगिनः योगेन ज्ञानम् अवाप्तुं बहून् ग्रन्थान् पठन्ति। परं ते त्वयि भक्तिं न प्राप्नुवन्ति। ये स्वं स्वं सकलं व्यापारं त्वदधीनं कुर्वन्ति, ते एव आत्मनः कर्मणा उपलब्धया भक्त्या परां गतिं प्रप्ताः सन्ति। आत्मनि देहबुद्धिम्, देहे च आत्मनः बुद्धिं च विपर्यस्तभावनाम् अधिगच्छन्ति। दुःखानि

अनुभवन्ति। यथा गृहे नष्टं वस्तु गृहे एव अन्वेष्टव्यम् अस्ति। परम् अरण्ये अन्विष्यते। तथैव अज्ञाः त्वां आत्मनः बहिः, देह-इन्द्रिय-मनसु मृगयन्ति । अहो! तेषाम् अज्ञता। अहो! बालकृष्ण! भवते याः स्तन्यं ददति ताः धन्याः, तासां स्तन्यामृतं भवता मुदा पीतम्। यासां च तृप्तये त्वं वत्सरूपेण वत्सपालरूपेण च वत्सरात् प्रभृति अद्यपर्यन्तम् असि, ताः व्रजगोपस्त्रियः अतीव धन्याः। भवतः सुन्दरं रूपं ते पदे पदे पश्यन्ति। अहो ! व्रजौकसाः भाग्यशालिनः, पूर्णस्वरूपः परमानन्दस्वरूपः सनातनरूपश्च भवान् तेषां मित्रम् असि ' इति एवं ब्रह्मा अनेकधा श्रीकृष्णं स्तौति। त्रिः परिक्रमति, प्रदक्षिणम् आचरति। पादयोः दण्डवत् प्रणमति। ब्रह्मा बालकृष्णात् अनुमतिम् आप्नोति। स्वस्य आवासं गच्छति।

**स्वावलोकनप्रश्नाः**

१.'श्रेयः साधनं त्वत् भक्तिः' अत्र 'त्वत्' पदेन परामृष्टः कः ?

२. अज्ञाः कथं मृगयन्ति ?

३.व्रजौकसां भाग्यं कीदृशम् ?

## ५.३.१२.कृत्रिमगोपालानां विस्मयः :-

**(मूलम्)** ५१.भगवान् नन्दनन्दनः अपि प्राक् एव स्थितान् वत्सान् स्वमित्रैः यथावत् अधिष्ठितं स्वकं पुलिनम् आनिन्ये। एवम् अतीतम् अपि एकं हायनं कृष्णमाया-विमोहिताः ते अर्भकाः क्षणार्धं मेनिरे। क्षुत्पिपासादिकम् अपि व्यस्मार्षुः। न एतत् चित्रम्, यतः यत् मायामोहितं सर्वं जगत् आत्मानम् एव अभीक्ष्णं विस्मरति। अथ वत्सैः सह सुखागतं श्रीकृष्णं वीक्ष्य सर्वे गोपबालकाः 'एहि एहि, अभ्यवहर,त्वत् आगमनं प्रतीक्षमाणाः वयं न एकम् अपि कबलम् अभुञ्जमहि' इति ऊचुः। भगवान् अपि विहसन् तैः सह अभ्यवहृत्य तेषाम् आजगरं चर्म दर्शयन् वनात् उपावर्तत। बर्ह-प्रसून-नव-धातु-विचित्राङ्गः सः मधुरमधुरेण वेणुरवेण वत्सान् गोष्ठं प्रापयत्। सर्वें च वत्सपालाः 'अनेन यशोदानन्दवर्धनेन अस्मिन् अहनि महान् व्यालः व्यापादितः। सर्वे वयम् अस्मात् रक्षिताः' इति व्रजे सविस्मयम् ऊचुः। एवं निलयन-सेतुबन्ध-मर्कट-प्लवनादिभिः कौमारैः विहारैः तौ रामकृष्णौ कौमारं तत्र जहतुः।

**(विवरणम्)** कृत्रिमगोपबालकानां विस्मयनं वर्णयति अयं वाक्यसमुदायः। श्रीकृष्णः भगवत्स्वरूपः भवति। श्रीकृष्णः, प्रतिदिनम् इव,स्वमित्रैः सह वत्सान् वनम् आनयति। प्रतिदिनं यत्र उपविशन्ति तत् पुलिनप्रदेशं चारयति। एवम् कृष्णस्य मायया गाढं मोहिताः ते गोपबालकाः, अतीतं संवत्सरकालं अर्धक्षणम् इव यापयन्ति। क्षुधाम्, पिपासां च विस्मरन्ति। सर्वं श्रीकृष्णमयं पश्यन्ति। कियत् चित्रम् एतत्, भगवतः सान्निध्ये ते सर्वं विस्मरन्ति। सत्यं ते धन्यजीविनः भवन्ति। यत् मायया मोहितः सर्वः अपि लोकः, आत्मानम्= स्वम्, एव पदे पदे विस्मरति। सर्वे गोपबालकाः, वत्सैः सह पुलिनम् आगतं श्रीकृष्णं सस्निग्धं पश्यन्ति। सादरं आह्वयन्ति। सविनोदं सल्लपन्ति। अभ्यवहरायउ भोजनाय, प्रतीक्षन्ते। श्रीकृष्णं विना न खादन्ति। श्रीकृष्णः अपि विहसति। तैः सह अभ्यवहरति्= आहारं स्वीकरोति। गोपालकानाम् अजगरस्य (□□□□□□) चर्म दर्शयति। वनात् निवर्तन्ते। श्रीकृष्णः मधुरेण वेणुनादेन वत्सान् गोष्ठं प्रापयति। सर्वे च वत्सपालाः, श्रीकृष्णेन अद्य महान् व्यालः व्यापादितः। सर्वे वयम् अस्मात् रक्षिताः इति व्रजे सविस्मयं कथयन्ति। एवं मातॄणाम्, निलयनैः, मित्राणां सेतुबन्धनैः मर्कटप्लवनादिभिः च बलराम-कृष्णयोः कौमारविहाराः विनोदभरिताः उल्लासकराश्च विद्यन्ते। एवं बलराम-कृष्णौ कौमारं यापयतः।

**स्वावलोकनप्रश्नाः**

१.व्रजानाम् अर्भकाः कथम् एकं हायनं क्षणार्धं मेनिरे ?

२.गोपबालकाः श्रीकृष्णं वीक्ष्य किम् ऊचुः ?

३.श्रीकृष्णं वत्सान् गोष्ठं कथम् प्रापयत् ?

४.श्रीकृष्णं वत्सान् गोष्ठं कथम् प्रापयत् ?

५.'रामकृष्णौ कौमारं तत्र जहतुः' ? अत्र 'तत्र' कं प्रदेशं परामृशति ?

### ५.३.१३.नन्दसूनोः अद्रिकन्दरेषु विहरणम् :-

**(मूलम्)** ५२. अथ षष्ठम् अब्दं पौगण्डकनामानं वयः समाश्रितौ राम-कृष्णौ सहसखिभिः गाः चारयन्तौ बृन्दावनम् अतीव पुण्यतमं चक्रतुः। परस्मिन् अहनि वेणुरवम् उदीरयन् सरामः नन्दनन्दनः स्वयशः गायद्भिः गोपबालकैः परिवृतः वत्सान् पुरस्कृत्य विहर्तुकामः कुसुमाकरं

बृन्दावनं प्रविवेश।मञ्जु –घोषा–अलि– मृग– द्विजा कुलम् आकम्पितपद्मगन्धि अतिमनोहरं तद्वनं वीक्ष्य भगवान् आदिपुरुषः स्मयमानः अग्रजम् एवम् उवाच 'हे देववर! अरुणपल्लव श्रिया फलप्रसूनोरुभरेण च नमत्–शिखाः अमी तरवः आत्मतनोहत्यै देववरार्चितं त्वत् पादयुगलं नमन्ति। एते मधुकराः तव यशः गायन्तः अनुपदं भजन्ते। मन्ये अहं प्रायः मुनिगणाः वने गूढम् अपि चरन्तम् आत्मदैवं त्वां न त्यजन्ति इति। नृत्यन्ति मुदा शिखिनः। अमूः हरिण्यः अपि गोप्यः इव ईक्षणेन तव प्रियं कुर्वन्ति। अमी च कोकिलगणाः सूक्तैः गृहम् आगताय भवते प्रियम् आदधति' इति एवम् आदिभिः मधुरालापैः सानुगः नन्दसूनुः अद्रिकन्दरेषु सरस्तीरेषु च गाः चारयन् रेमे ।

**(विवरणम्)** पर्वतप्रान्तेषु गोपालकृष्णस्य विहरणं वर्णयति अयं वाक्यसमुदायः। बलराम–कृष्णौ षष्ठे संवत्सरे प्रविशतः। (पोगण्डस्तु वलिभिः व्याप्तदेह उदाहृतः। शिशुर्दशसमा यावत् पोगण्डस्तु स्मृतो बुधैः) षष्ठ –वर्षात् आरभ्य विद्यमानस्य वयसः पौगण्डकम् इति व्यवहारः अस्ति। बलराम–कृष्णौ सखिभिः सह गाः चारयतः। बृन्दावनम् अतीव पवित्रं कुरुतः। एकस्मिन् दिने श्रीकृष्णः बलरामेण सह बृन्दावनं प्रविशति। वेणुरवम् उदीरयति। गोपबालकाश्च तम् अनुसृत्य गायन्ति। अनुसृत्य गायद्भिः गोपबालकैः नन्दनन्दनः परिवृतः भवति। वत्सान् पुरतः चारयन्ति। बलराम–कृष्णौ, गोपबालकाश्च विहर्तुम् इच्छन्ति। नानाविधपुष्पैः शोभितं कुसुमानाम् आकरं बृन्दावनं ग्च्छन्ति। तत्र मृगाःउ हरिणाः सन्ति। भ्रमराः श्रवणसुभगं झुङ्कारनादं कुर्वन्ति। द्विजाः वेदान् पठन्ति। वायुश्च मन्दं प्रसरति। वृक्षाश्च ईषत् चलन्ति। तेन पुष्पाणाम् अतिमनोहरः गन्धः तद्वनं व्याप्नोति। श्रीकृष्णः बृन्दावनस्य एतत् शोभां पश्यति। भगवान् मन्दं हसति। अग्रजम् –' हे भ्रातः इमान् तरून् पश्यतु! तरवः पल्लवानाम् अरुणकान्त्या शोभां वहन्ति। फलानां प्रसूनानां ऊरुभरेण च शाखाः नमन्ति। अमी तरवः स्वेषां तनोः समर्पणाय देववरैः अर्चितं तव पादयुगलं नमन्ति। एते मधुकराः तव यशः गायन्ति। अनुपदं त्वां भजन्ते। प्रायः मुनिगणाः वने गूढम् अपि चरन्तम् आत्मदैवं त्वां (बलरामम्) न त्यजन्ति इति अहं (श्रीकृष्णः) मन्ये। शिखिनः मुदा नृत्यन्ति। अमूः हरिण्यः अपि ईक्षणेन तव प्रियं कुर्वन्ति। अमी च कोकिलगणाः सूक्तैः गृहम् आगताय भवते प्रियम् आदधति' इति एवमादि मधुरम् आलपति। नन्दसूनुः अद्रि – कन्दरेषु सरस्तीरेषु च गाः चारयति। सानुषु गच्छति।

स्वावलोकनप्रश्नाः

१.पौगण्डकम् नाम किम् ? तत् कदा प्ररभ्यते ?

२.राम–कृष्णौ बृन्दावनं कथं पुण्यतमं चक्रतुः ?

३.नन्दनन्दनः किं कर्तुकामः बृन्दावनं प्रविवेश ?

४.के यशः गायन्तः अनुपदं भजन्ते ?

५.शिखिनः किं कुर्वन्ति ?

६.हरिण्यः कथं प्रियम् आचरन्ति ?

७.कोकिलाः कथं प्रियम् आदधति ?

**५.३.१४.श्रीकृष्णस्य गोपबालकत्वम् :–**

**(मूलम्)** ५३.क्वचित् क्रीडापरिश्रान्तं गोपोत्सङ्गशायिनम् अग्रजं स्वयं पादसंवाहनादिना विश्रामयति। क्वचित् नृत्यतः गायतः वल्गतः योयुध्यतः गोपबालकान् हस्ते गृहीत्वा प्रशंसति। क्वचित् क्रीडापरिश्रान्तः वृक्षमूले पल्लवतल्पे शेते। केचित् तस्य महात्मानः पादसंवहनं चक्रुः। अपरे व्यजनैः वीजयन्ति स्म। अन्ये च शनैः तत् चरितानि गायन्ति स्म। एवं स्वमायया गोपबालकत्वं विडम्बयन् रमालालितपादपल्लवो महाविष्णुः ग्राम्यवत् रेमे।

**(विवरणम्)** अयं वाक्यसमुदायः गोपालकृष्णस्य भ्रातरि बलरामे भक्तिम्, अनुयायिषु स्नेहं च वर्णयति। महाविष्णुस्वरूपः श्रीकृष्णः ग्राम्यवत् रमते। तथा हि– अग्रजः बलरामः गोपबालकानाम् उत्सङ्गेषु शिरः निक्षिप्य कदाचित् शेते। तदा श्रीकृष्णः अग्रजस्य बलरामस्य पादौ स्वयं संवाहयति । क्वचित् नृत्यतः गोपबालकान् कीर्तयति। कदाचित् गायतः गोपबालकान् उल्लासयति। कुत्रचित् वल्गतः गोपबालकान् उत्साहयति। क्वचित् योयुध्यतः गोपबालकान् हस्ते गृहीत्वा प्रशंसति। क्वचित् क्रीडापरिश्रान्तः स्वयम् अनाथवत् वृक्षमूले पल्लवतल्पे शेते। केचित् तस्य महात्मानः पादसंवहनं कुर्वन्ति। अपरे व्यजनैः वीजयन्ति । अन्ये च शनैः तत् चरितानि गायन्ति। एवं श्रीकृष्णः अनुचरान् सेवते, अनुचरैः सेव्यते च। एवं लक्ष्म्या संसेवितचरणः महाविष्णुः साधारणगोप –बालकः भूत्वा, गोकुले ,बृन्दावने च विहरति।

**स्वावलोकनप्रश्नाः**

१.श्रीकृष्णः अग्रजं कथं स्वयं विश्रामयति ?

२.गोपबालकाः किं किं कुर्वन्ति ?

३.क्रीडापरिश्रान्तः सन् श्रीकृष्णः किं कुरुते ?

४.महाविष्णुः कथं रेमे ?

### ५.३.१५.धेनुकासुरवधः :-

**(मूलम्)** ५४. ततः श्रीदामनामा राम-कृष्णयोः सखा, अन्ये च गोपालाः नातिदूरे वर्तमानं रासभरूपधारिणा धेनुकासुरेण तद्बन्धुभिः च परिपाल्यमानं फलापूर्णं तालवनम् अनयोः दर्शयन्तः तत् फलबुभुक्षाम् आविश्चक्रुः। तदाकर्ण्य सुहृत्-प्रियचिकीर्षया प्रहसन्तौ राम-कृष्णौ तैः सह तद्वनं प्राविशताम्। ततः बलरामः दोर्भ्यां मतङ्गजः इव तालवृक्षान् प्रकम्प्य फलानि अपातयत्। तत् ध्वनिश्रवणेन प्रकुपितः धेनुकः सरभसम् उपसृत्य प्रत्यङ्मुखः पश्चिमाभ्यां पद्भ्यां बलरामम् उरसि निहत्य कीशब्दं कुर्वन् अपससाद। पुनः अपि यावत् असौ अच्युताग्रजं निहन्तुं पराङ्मुखः चरणौ उदक्षिपत्, तावत् अयं बलभद्रः एकेन करेण गृहीत्वा, तत्-चरणौ भ्रामयित्वा, तेन एव भ्रमणेन त्यक्तजीवितं तम् असुरं तालवृक्षाग्रे चिक्षेप। तेन आहतः वृक्षः, पार्श्वस्थम् अन्यं कम्पयन् भग्नः बभूव। तेन कम्पितः अन्यं कम्पयामास। सः अपि अन्यम्। एवं तद्वनं सर्वम् अपि महावातेरितम् इव प्राकम्पत। ततः तद्ज्ञातयः अन्ये तद्बन्धुमरणेन संरब्धतराः राम-कृष्णौ अभ्यधावन्। सर्वान् अपि तान् सलीलं परचरणयोः गृहीत्वा राम-कृष्णौ तृषराजाग्रेषु प्राक्षिपताम्। एवं सर्वे अपि तद्ज्ञातयः गतासवः आसन्। ततः प्रभृति हतसज्ञातिधेनुके तद्वने, मनुष्याः यथेष्टं तालफलानि, पशवश्च तृणान्,जक्षुः।

**(विवरणम्)** अयं वाक्यसमुदायः बलरामेण अनुष्ठितं धेनुकासुरवधं वर्णयति। राम-कृष्णयोः मित्रं श्रीदामा अन्ये च गोपालाः कदाचित् एकं तालवनं प्रविशन्ति। तद्वनं धेनुकासुरः बन्धुभिः परिपालयति। राम-कृष्णौ अपि मित्राणां प्रियं कर्तुम् इच्छया धेनुकासुरेण पाल्यमानं तत् तालवनं प्रविशतः। बलरामः, दोर्भ्यां मत्तगजः इव, तालवृक्षान् प्रकम्पति। फलानि पातयति। धेनुकः तत् ध्वनिं शृणोति। धेनुकः प्रकुपितः भवति। सरभसम् उपसरति। पश्चिमाभ्यां पद्भ्यां बलरामम् उरसि निहन्तुं कीशब्दं कुर्वन् उपसीदति। बलरामं निहन्तुं चरणौ उत्क्षिपति। बलभद्रः

एकेन करेण धेनुकस्य चरणौ गृह्णाति, परितः भ्रामयति, हत्वा तालवृक्षस्य अग्रे क्षिपति। तेन सह अन्यः वृक्षः, तेन च अन्यः वृक्षः, इत्येवं रूपेण क्रमेण वनं सर्वं भग्नं भवति। अनन्तरं सर्वान् ज्ञातीन् अपि हन्ति। राक्षसानां संहरणस्य अनन्तरं अनुचराश्च यथेष्टं तालफलानि स्वीकुर्वन्ति। पशवः च निरन्तरायं तृणखादनाय प्रवर्तन्ते ।

**स्वावलोकनप्रश्नाः**

१.श्रीदामा नामा कः ?

२.तालवनं कीदृशम् ? कैः परिपाल्यते ?

३.रामकृष्णौ किमर्थं तालवनं प्राविशताम् ?

४.बलरामः किं कृत्वा फलानि अपातयत् ?

## ५.३.१६.मातुः पर्यङ्कशयनम् :-

**(मूलम्)** ५५.अथ कमलपत्राक्षः साग्रजः नन्दनन्दनः गोपबालकैः अनुगैः तोष्टूयमानः व्रजम् आविशत्। तत् वेणुरव-आकर्णनेन तुषिताः व्रजयोषितः रुचिरेक्षणं चारुहासं गोरजस्-छुरितकुन्तलं तत् मुखं वीक्ष्य दिवसविरहजं तापं तत्यजुः। ततः उन्मर्दन-मज्जनादिभिः अपगत-अध्व-श्रमौ रुचिरवासोवसानौ दिव्यमाल्यधरौ रामकृष्णौ स्वजननी-उपहृतं स्वाभीष्टम् अन्नं यथाकामं प्राश्य जननीभ्याम् उपलालितौ तत्-उपकल्पितायां वरशय्यायां समाविश्य सुखं सुषुपतुः।

**(विवरणम्)** अयं वाक्यसमुदायः मातृभ्यां रोहिणी-यशोदाभ्यां कृतं बलराम-कृष्णयोः उपलालनं वर्णयति। धेनुकासुरस्य संहरणानन्तरं गोपबालकाः पद्म-दल-आयत-अक्षं श्रीकृष्णं बलरामं च स्तुवन्ति। अग्रजेन, अनुचरैः च कीर्त्यमानः सन् श्रीकृष्णः व्रजम् प्रविशति। श्रीकृष्णः वेणुं वादयति। व्रजयोषितः तं च वेणुनादं शृण्वन्ति।प्रमु- दिताः भवन्ति। श्रीकृष्णं पश्यन्ति। श्रीकृष्णः स्मितवदनं सुन्दरदृशः च वहति। केशकुन्तलानि गवां चरणैः उद्धू- -तेन रजसा छुरितानि (Covered) सन्ति। व्रजयोषितः तादृशं श्रीकृष्णस्य सुन्दरं वदनं पश्यन्ति,दिवावियोगजं तापं त्यजन्ति। बलराम-कृष्णौ गृहं प्रविशतः। संवाहनपूर्वकेन स्नानेन अध्वनः श्रमाम् अपगच्छतः। अनुकूलानि वस्त्राणि धरतः। रामकृष्णौ स्वजननी-उपहृतं स्वाभीष्टम् अन्नं यथेच्छं खादतः। रोहिणी-यशोदाभ्याम् उपलालितौ भवतः। रोहिणी-यशोदे पर्यङ्के एव सौकर्यकरीं मृदुलशय्यां कल्पयतः। तत्र वरशय्यायां राम-कृष्णौ सुखं निद्रां गच्छतः च।

**स्वावलोकनप्रश्नाः**

१.गोरजस्-छुरितकुन्तलः कः ?

२.व्रजयोषितः किं कृत्वा दिवसविरहजं तापं तत्यजुः ?

३.उन्मर्दन-मज्जनादिभिः अपगत- अध्व-श्रमौ कौ ?

## ५.३.१७.कालियमर्दनम् :-

५.३.१७.१.मृतानां सञ्जीवनम्

**(मूलम्)** ५६.एवं बृन्दावनचरः सः भगवान् एकदा रामेण विना अन्यैः सखिभिः परिवृतः कालिन्दीं जगाम। अथ निदाघ-आतप-तप्ताः गावः गोपाश्च तृषार्ताः विषदूषितं तत् जलं पपुः। दैवोपहतचेतसः ते सर्वे दुष्टं तत् जलं पीत्वा गतचेतसः मूर्छां प्रापुः। तथाभूतान् स्वसुहृदः वीक्ष्य भगवान् श्रीकृष्णः अमृतवर्षिणा ईक्षणेन समजीवयत्। तदीक्षणेन प्राप्तस्मृतयः ते सर्वे जलान्तिकात् उत्थाय परस्परम् ईक्षमाणाः सविस्मयं दुष्टजलपानेन मृताः अपि वयं गोविन्द-अनुग्रहेण पुनः प्रत्युज्जीविताः इति मेनिरे।

**(विवरणम्)** कालिन्द्याः जलं पीत्वा मृतान् गाः, गोपबालकान् च गोपालकृष्णः सञ्जीवयति इति अंशं अयं वाक्यसमुदायः वर्णयति। श्रीकृष्णः बृन्दावने गोपबालकैः प्रतिदिनं विहरति। कदाचित् सोदरं बलरामं विना एव मित्रैः कालिन्दीं गच्छति। ग्रीष्मस्य आतपेन गावः गोपबालकाश्च पिपासया आकुलाः भवन्ति। दाहम् अधिकं भवति। दाहम् असहमानाः विषदूषितं कालिन्दीसरसः जलं पिबन्ति। दुरदृष्टवशात् ते सर्वे मूर्छां प्राप्नुवन्ति। श्रीकृष्णः मूर्च्छितान् पश्यति। अमृतवर्षिणा प्रसन्नदृशा स्वसुहृदः उज्जीवयति। भगवतः अनुग्रहेण उज्जीविताः गोपबालकाः आनन्दम् आश्चर्यं च प्राप्नुवन्ति।

**स्वावलोकनप्रश्नाः**

१.भगवान् कथं कालिन्दीं जगाम ?

२.'निदाघ-आतप-तप्ताः गावः गोपाश्च विषदूषितं तत् जलं पपुः' अत्र 'तत्' पदं कां परामृशति ?

३.गावः गोपाश्च तत् जलं पीत्वा किं बभूवुः ?

४.श्रीकृष्णः स्वसुहृदः कथम् समजीवयत् ?

५.प्राप्तस्मृतयः ते सुहृदः किम् इति मेनिरे ?

### ५.३.१७.२.कालिन्द्यां (गोप)बालकृष्णस्य विहरणम् :-

**(मूलम्)** ५७.कालिन्द्यां कालियनाम्नः विषसर्पस्य आवासभूतः कश्चन ह्रदः आसीत्, यस्मिन् तत्-विष- अग्नि-पच्यमान-पयसि उपरिगाः तत्-ऊष्मणा आहताः पतत्रिणः निपत्य म्रियन्ते। तीरगाः अपि प्राणिनः द्रुमाश्च तत्-विष-अग्नि-मरुता आहताः म्रियन्ते। प्रचण्ड-विष-दूषितं तादृशं तं ह्रदं वीक्ष्य खल-दमन-अवतारः वासुदेवः तस्मात् तं निष्कासयितुकामः तीरस्थम् अत्युदग्रं कदम्बद्रुमम् अधिरुह्य धृत-परिकरः कृत-भुज-आस्फोटः तस्मिन् अभ्यपतत्। निपत्य च यथेष्टं करिकलभः इव सर्वे ह्रदम् आलोड्य विहर्तुम् आरेभे।

**(विवरणम्)** अयं वाक्यसमुदायः कालिन्द्यां गोपालकृष्णस्य विहरणं वर्णयति। कालिन्दी काचन नदी अस्ति। तया अनुसन्धितम् अन्यतमं सरः कालिन्दीसरः। तत् च कालियनाम्नः विषसर्पस्य आवासः अस्ति। तस्मिन् जलं विषाग्निना पच्यमानं भवति। दुष्परिणामान् जनयति। तस्य ऊष्मणः प्रभावेण उपरि गच्छन्त्यः पक्षिणः आहताः भवन्ति। भूमौ निपतन्ति। म्रियन्ते च। तीरे विद्यमानाः प्राणिनःउजीवराशयः, द्रुमाःउ वृक्षाश्च तत्-विष-अग्नि-मरुता आहताः म्रियन्ते। दुष्टशिक्षकः श्रीकृष्णः प्रमादकारि तत् सरः पश्यति। कालिन्दीसरसः तं कालियं निष्कासयितुम् इच्छति। तीरे स्थितम् महान्तं कदम्बद्रुमं अधिरोहति। भुजौ आस्फालयति। शिरसि अभिपतति। यथा करिकलभः ह्रदं सर्वं कलयति तथा यथेष्टं सर्वं कालिन्दीह्रदम् आलोडति,विहरति च।

**स्वावलोकनप्रश्नाः**

१.कालियः कः ? तस्य प्रभावः कीदृशः ?

२.उपरिगाः पतत्रिणः किमर्थं म्रियन्ते ?

३.तीरगाः कथं म्रियन्ते ?

४.वासुदेवः कीदृशः ?

## ५.३.१७.३.भोगैः कालियस्य आवेष्टनम् – गोपबालकानां रोदनम् :-

**(मूलम्)** ५८.तद्–ध्वनिम् उपश्रुत्य अन्तःस्थितः कालियः तद्–भवनाभिभवम् अमृष्यमाणः बलात् उत्तीर्य पीत– कौशेय–वाससं स्मित–सुन्दर–आस्यं कमल–लोचनम् अतिरुषा मर्मसु संदश्य सर्वम् अङ्गं भोगेन अवेष्टयत्। तादृशम् अदृष्टचेष्टम् आत्मनः प्रियसखम् आलोक्य भृशम् आर्ताः गोपबालकाः शोकभयमूढधियः रुदन्तः भुवि निपेतुः। तत् – उपान्तवर्तिनः गावः वृषावत्सतर्यश्च आक्रन्दन्त्यः तत्–अर्पित–दृशः सुदुःखिताः भीताः रुदन्त्यः इव निवृत्तचेष्टाः तस्थुः।

**(विवरणम्)** अयं वाक्यसमुदायः कालियः भोगैः गोपबालकृष्णं वेष्टते, गोपबालकाश्च रुदन्ति इति अंशं वर्णयति। कालिन्द्यां श्रीकृष्णः अभिपतति खलु। तस्य ध्वनिं कालियः शृणोति। कालिन्दीसरसि श्रीकृष्णस्य अभिपतनम्, कालियः न सहते। प्रत्युत अवमानं भावयति। क्रुद्धः भवति। अकस्मात् जलात् उत्तिष्ठति। श्रीकृष्णं पश्यति। तदा श्रीकृष्णः पीतम् अम्बरं धरति। स्मितपूर्णं सुन्दरम् आस्यं वहति। नेत्रे कमलदले इव आयते भवतः। एवंविधं श्रीकृष्णं कालियः अतिरुषा मर्मसु संदशति। सर्वं शरीरं भोगेनउ फणेन, वेष्टते। गोपबालकाः आत्मनः प्रियसखं कालियेन वेष्टितं पश्यन्ति। भृशं दुःखिताः भवन्ति। शोकेन, भयेन च किमपि कर्तुं न पारयन्ति। मूढधियः भवन्ति, रुदन्ति, भुवि निपतन्ति च। समीपवर्तिनः गावः आक्रन्दन्ति। गोपवृद्धाः, गोप्यः गोपबालकाः, गावश्च तस्मिन् एव दृशः अर्पयन्ति। भृशं दुःखिताः भवन्ति। भीत्या रुदन्त्यः निवृत्तचेष्टाः तिष्ठन्ति।

**स्वावलोकनप्रश्नाः**
१.कालियः सरसः कुतः बलात् उत्तीर्णः ?

२.कालियः बालकृष्णं किं कृतवान् ?

३.गावः कथं तस्थुः ?

५.३.१७.४.गोपवृद्धानां गोपीनां च आन्दोलनम्

**(मूलम्)** ५९.अत्रैवं स्थिते गोकुले आसन्नभयशंसिनः महोत्पाताः ददृशिरे। तान् आलक्ष्य नन्दादयः गोपवृद्धाः रामम् अन्तरेण गोचारणाय गतं श्रीकृष्णं ज्ञात्वा तन्निधनम् आशङ्कमानाः आबाल-वृद्ध-वनिताः शोकभयातुराः दीनाः कृष्णदर्शनलालसाः गोकुलात् निर्जग्मुः। अनुजप्रभावज्ञस्तु रामः किञ्चित् विहस्य न किञ्चित् अपि उवाच। गवां पदेषु अन्तरान्तरे शङ्ख-चक्र-आदि-लाञ्छितानि श्रीकृष्णपदानि पश्यन्तः तेन एव अध्वना क्रमेण तत् तटं प्राप्य तत्र आरात् अन्तर्जले भुजग-भोग-परीत-सकल-अवयवं निश्चेष्टं श्रीकृष्णम्, तीरे च मूढधिषणान् गोपबा- लकान्, संक्रन्दतः पशून् च अवेक्ष्य भृशं दुःखिताः आसन्। भगवति नन्दनन्दने भृशमनुरक्ताः गोप्यः अपि अहि- ग्रस्तं तम् अवलोक्य शोकभर-आक्रान्त-हृदयाः तत् सौहृद-स्मित-विलोकन-गिरः स्मारम् उदश्रवः प्रियविरहितं त्रैलोक्यं शून्यं ददृशुः। तादृश-अपत्यवीक्षणेन शोकप्रदग्धहृदयां कृष्णमातरम् उपसृत्य तुल्यव्यधाः सर्वाः अपि गोप्यः कृष्णकथाः आलपन्त्यः तत् आननार्पित-दृशः नितराम् आचक्रुशुः। कृष्णप्राणेषु नन्दादिषु तद्-ह्रदं प्रविवि-क्षमाणेषु कृष्णानुभाववित् अग्रजः बलभद्रः तान् प्रत्यषेधत्।

**(विवरणम्)** अयं वाक्यसमुदायः कालियस्य भोगैः आवेष्टितं गोपबालकृष्णं दृष्ट्वा वृद्धाः गोप्यश्च भयेन विह्वलाः भवन्ति इति अंशं वर्णयति।भोगैः आवेष्टितं गोपबालकृष्णं दृष्ट्वा गोपबालाः अरण्ये खिन्नाः भवन्ति। गोकुले अपि आसन्नं भयं शंसन्तः महोत्पाताः सम्भवन्ति। उत्पातान् दृष्ट्वा नन्दादयः गोपवृद्धाः भयेन भ्रान्ताः भवन्ति। श्रीकृष्णः बलरामं विना एव गवां चारणाय गतः इति जानन्ति। आबालगोपालं शोकेन भयेन आतुराः भवन्ति। तस्य निधनम् आशङ्कन्ते। दीनाः भवन्ति। श्रीकृष्णं द्रष्टुम् अभिलषन्ति। श्रीकृष्णम् अन्वेष्टुं गोकुलात् निर्गच्छन्ति। बलरामः अनुजस्य श्रीकृष्णस्य प्रभावं जानाति एव। बलरामः स्मितं करोति। परं किमपि न भाषते। गोकुलवासिनः शोकेन भयेन आतुराः भवन्ति। गवां पदेषु शङ्ख-चक्र-आदि-लाञ्छितानि श्रीकृष्णस्य पदानि (Foot-steps) पश्यन्ति। तेन एव अध्वना

क्रमेण कालिन्दीतटं प्राप्नुवन्ति। सरसि जले महासर्पस्य,विषसर्पस्य च कालियस्य भोगैः वेष्टितं श्रीकृष्णं पश्यन्ति। तीरे च गोपबालकान्, बुद्ध्या मूर्च्छितान् अवगच्छन्ति। पशून्, आन्दोलनेन आक्रन्दतः अवेक्षन्ते। भृशं दुःखिताः भवन्ति। नन्दनन्दने भृशम् अनुरक्ताः गोप्यः अपि कालियसर्पेण वेष्टितं श्रीकृष्णम् पश्यन्ति। शोकेन आकुलाः भवन्ति। पुनः पुनः श्रीकृष्णस्य सौहार्दं स्मितविलोकनानि स्मरन्ति। प्रीतिपात्रेण श्रीकृष्णेण विरहितं त्रैलोक्यं शून्यं पश्यन्ति। यशोदा कालियस्य भोगैः वेष्टितं पुत्रं पश्यति। शोकेन तस्याः हृदयं प्रदहति। शोकेन आकुलाः अन्याश्च गोपस्त्रियः यशोदाम् उपसर्पन्ति। कृष्णस्य कथाः कीर्तयन्ति। कालियेन पीड्यमानम् इव स्थितं श्रीकृष्णं द्रष्टुम् आन्दोलितमनस्काः भवन्ति। नितराम् आक्रोशन्ति। नन्दादयः कालियह्रदं प्रवेष्टुम् इच्छन्ति। अग्रजः बलभद्रः कृष्णस्य महिमानं जानाति खलु। अतः नन्दादीन् प्रतिषेधति।

**स्वावलोकनप्रश्नाः**

१.नन्दादयः कीदृशाः सन्तः गोकुलात् निर्जग्मुः ?

२.बलरामः किञ्चित् अपि किमर्थं न उवाच ?

३.नन्दादयः किमर्थं भृशं दुःखिताः आसन् ?

### ५.३.१७.५.कालियस्य शरणागतिः :-

**(मूलम्)** ६०.एवम् आत्महेतोः अतिदुःखितं सस्त्रीकुमारम् अनन्यगतिकं गोकुलम् अवेक्ष्य मनुष्यपदवीम् अनुवर्तमानः मुहूर्तं स्थित्वा ततः वर्धितकायः उरगबन्धात् उदतिष्ठत्। प्रवृद्धकायेन भगवता प्रव्यथित-आत्मभोगः सः भुजङ्गेशः अतिरुषा समुन्नमय्य फणान्,श्वसनरन्ध्रविषः दिदङ्क्षया हरिम् ईक्षमाणः तस्थौ। हरिरपि अन्तर्जले तम् अतिक्रम्य क्रीडन् बभ्राम। सः अपि अवसरं प्रतीक्षमाणः तदनुसारेण अभ्रमत्। एवं परिभ्रमणेन अतिपरिश्रान्तं हतौजसं तमाज्ञाय लास्यकलागुरुः तत्फणानि अधिरूढः यथाकामं ननर्द। देव-गन्धर्वाङ्गनाश्च लास्यानुसारेण स्तुतिगीतीः गायन्त्यः मृदङ्ग-पण-वादिभिः उपनेदुः। एवं शतैकशीर्षः सः नागः रुषा यत् यत् शिरः न नमते तत् तत् खलदण्डधरः असौ जगदीश्वरः ममर्द। एवं तत् चित्रताण्डवेन भग्नगात्रः सः फणिराजः मुखैः अक्षिभिः नासारन्ध्रैश्च रुधिरम् उद्वमन् आदिपुरुषं नारायणं मनसा शरणं जगाम।

**(विवरणम्)** अयं वाक्यसमुदायः, कालियः (गोप)बालकृष्णं शरणं गच्छति इति अंशं वर्णयति।बालकृष्णः अग्रजम् अन्तरेण एकाकी एव गवां चारणाय गतः इति कारणतः

गोकुले स्त्रियः बालाः वृद्धाश्च शोकेन आकुलाः भवन्ति।काननम् आगच्छन्ति। तत्र कालियः बालकृष्णं भोगैः वेष्टते खलु। ते सर्वे कालियेन कबलितं श्रीकृष्णं पश्यन्ति। दुःखिताः भवन्ति। श्रीकृष्णः अपि आत्मनःउस्वस्य कारणतः अतिदुःखितं गोकुलम् अवेक्षते। भगवत्स्वरूपः अपि, मनुष्यः इव किञ्चित्कालं पीड्यमानः इव दृश्यते। ततः कायं वर्धयति। उरगस्य बन्धात् उत्तिष्ठति। भगवान् श्रीकृष्णः प्रवृद्धकायेन कालियं व्यथयति। फणानाम् उपरि नृत्यति।पादाघातैः शिरसि प्रहरति। भुजङ्गेशः कालियः अतिरुषा फणान्, समुन्नयति। विषं निश्वसति। कोपेन श्रीकृष्णं तीक्ष्णं पश्यति। श्रीकृष्णः अपि जलमध्ये कालियम् आक्रमते। कालियेन क्रीडति। तेन सह भ्रमति। कालियः अपि अवसरं प्रतीक्षते। श्रीकृष्णः अपि कालियं शतशः भ्रमति। एवं भूयो भूयो भ्रमणेन कालियः अतिपरिश्रान्तः भवति। नष्टबलः भवति। तत् ज्ञात्वा श्रीकृष्णः तत्फणानि अधिरोहति। यथाकामं नर्दति। देव-गन्धर्वाङ्गनाश्च लास्यानुसारेण स्तुतिगीतीः गायन्ति। मृदङ्ग-पण-वादिभिः उपनदन्ति। एवं शतशीर्षकः कालियः क्रोधेन यत् यत् शिरः न नमते तत् तत् शिरः खलदण्डधरः असौ जगदीश्वरः मर्दति। एवं तत् चित्रताण्डवेन भग्नगात्रः भवति। सः फणिराजः मुखैः अक्षिभिः नासारन्ध्रैश्च रुधिरम् उद्वमति। क्षीणशक्तिः सः किमपि कर्तुम् अक्षमः आदिपुररुषं नारायणं मनसा शरणं गच्छति।

स्वावलोकनप्रश्नाः

१.आत्महेतोः अतिदुःखितं किम् ?

२.श्रीकृष्णः कस्मात् उदतिष्टत् ?

३.प्रव्यथित-आत्मभोगः भुजङ्गेशः कथं तस्थौ ?

४.'परिभ्रमणेन अतिपरिश्रान्तं हतौजसं तम् आज्ञाय ...' अत्र 'तम्' पदं कं परामृशति ?

५.खलदण्डधरः जगदीश्वरः कालियं कथं ममर्द ?

### ५.३.१७.६.कालियस्य पत्नीभिः क्षमायाः याचनम् :-

**(मूलम्)** ६१.एवम् अच्युत-चरण-घात-परिभुग्न-फण-आतपत्रं स्वं पतिं निरीक्ष्य तत्पत्नयः अपि शोकार्ताः विस्रसत्-वसन-भूषण-केशबन्धाः ससम्भ्रमम् उपेत्य भगवन्तं दण्डवत् प्रणम्य कृताञ्जलयः शरणं प्रपन्नाः, तम् आदिपुरुषं सकलजगत्-अन्तर्यामिनं सृष्टि-स्थिति-

लयकारिणं, शान्त–अशान्ताखिलरूपधारिणम् अभिष्टूय 'भगवन् ! त्वाम् अजानतः मूढस्य अयं सकृत् कृतः अपराधः सोढव्यः। पत्युः नः प्राणदानं विधेहि ' इति ययाचिरे। एवं नागपत्नीभिः सम्प्रार्थितो यशोदानन्दनः मूर्छितं भग्नशिरसं तम् अङ्घ्रिकुट्टनैः विससर्ज। तदनु प्रतिलब्धेन्द्रियप्राणः कालियः कृच्छ्रात् उछ्वसन् कृताञ्जलिपुटः भगवन्तम् एवम् उवाच 'भगवान्! विलासार्थम् अखिलं जगत् उत्पादयन्, औत्पत्तिकक्रूरभावाम् अतितामसां दीर्घमन्युम् इमाम् अस्मदीयां सर्पजातिं सृष्टवतः भगवतः एव अत्र दोषः, यत् अहं त्वत्–मायामोहितः दुष्टजाति–स्वभावेन जगत्कारणं भगवन्तमपि दिदङ्क्षुः आसम्। क्षन्तव्यः अयम् अपराधः। प्रसीद! निग्रहम् अनुग्रहं वा विधेहि!' इति।

**(विवरणम्)** अयं वाक्यसमुदायः, कालियस्य पत्न्यः (गोप)बालकृष्णं क्षमां याचन्ते इति अंशं वर्णयति। एवं श्रीकृष्णस्य–चरण–घातैः कालियः अवनतशिरस्कः भवति। फणाश्च विगतपराक्रमाः भवन्ति। पत्न्यः क्षीणशक्तिं कालियं पश्यन्ति। शोकेन आर्ताः भवन्ति। तासां वसनानि भूषणाणि, केशबन्धनानि च सर्वाणि विस्रंसयन्ति। भगवन्तं श्रीकृष्णं ससम्भ्रमम् उपयान्ति। तं बहुधा स्तुवन्ति। दण्डवत् प्रणमन्ति। कृताञ्जलयः शरणं प्राप्नुवन्ति। एवं प्रार्थयन्ति च । 'भगवन् ! एषः कालियः तव प्रभावं नैव जानाति। अतः अयं मूढः भवति। अस्य अयं प्रधमः अपराधः, सोढव्यः। अस्माकं भर्तुः प्राणदानं करोतु ' इति अभ्यर्थयन्ति। एवं नागपत्नीभिः सम्प्रार्थितः यशोदानन्दनः मूर्छितं भग्नशिरसं कालियं पदलाञ्छनैः विसृजति। अनन्तरं कालियः इन्द्रियाणि प्राणान् चलभते। कालियः कृच्छ्रात् उछ्वसति। अञ्जलिं बध्नाति। भगवन्तम्– 'भगवान्! विलासार्थम् अखिलं जगत् उत्पादयसि, इयं सर्पजातिः भवता एव सृष्टा। सर्पेषु क्रूरता, तामसिकता, भवतैव सन्निधापिता। एवम् इमाम् अस्मदीयां सर्प– जातिं सृष्टवतः भगवतः एव अत्र दोषः, यत् अहं भवतः मायया मोहितः सन्, दुष्टजातिस्वभावेन जगत्कारणं भगवन्तम् अपि दिदङ्क्षुः= दष्टुम् इच्छुः अस्मि। क्षन्तव्यः अयम् अपराधः। प्रसीद, क्षमस्व,अनुग्रहं करोतु 'इति एवं प्रार्थयति।

**स्वावलोकनप्रश्नाः**

१.तत् पत्न्यः अपि शरणं प्रपन्नाः ? अत्र 'तत्' शब्दः कं परामृशति ?

२.तत्पत्न्यः(कालियस्य पत्न्यः) कं शरणं प्रपन्नाः ? कथं शरणं प्रपन्नाः ?

३.कालियः श्रीकृष्णं किम् उवाच ?

## ५.३.१७.७.कालियस्य अब्धिसमाश्रयणम् :-

**(मूलम्)** ६२.एवं कालियोक्तं वचनम् आकर्ण्य, शरणागतवत्सलः भगवान् ' न अत्र स्थेयं भवता, अचिरम् एव स्व-अपत्य-दारैः समुद्रं याहि, गावः नराश्च सलिलम् इदं पिबन्तु ' इति तम् आदिदेश। किञ्च ' यद्भयात् रमणकं द्वीपं विहाय एतद् ह्रदम् उपाश्रितः सः अपि सुपर्णः मत्-पदलाञ्छितं त्वां न अद्यात् ' इति वरं ददौ। किञ्च ' इदं मत्-अनुशासनं सन्ध्ययोः उभयोः संस्मरन् कीर्तयन् मर्त्यः नैव भवद्भ्यः भयम् आप्नुयात्। अस्मिन् ह्रदे स्नात्वा,देवादीः तर्पयित्वा,उपोष्य,अर्चयन् मनुष्यः सर्वपापैः प्रमुच्येत ' इति उवाच। नागराजः अपि पत्नीभिः सह दिव्य-स्रक्-मणिभिः गन्ध-अनुलेपनैः भगवन्तम् अर्चयित्वा,तेन अनुज्ञातः शिरसा प्राणम्य,पुत्रदाराद्यैः सुहृद्भिश्च सह, अब्धेः द्वीपं जगाम।

**(विवरणम्)** अयं वाक्यसमुदायः,कालियस्य अब्धिसमाश्रयणवृत्तान्तं वर्णयति। श्रीकृष्णः कालियस्य विनम्रं वचनं शृणोति। भगवान् शरणागतेषु वत्सलः भवति खलु। कालियम् अन्यं ह्रदम् आवासं कर्तुम् आदिशति।'त्वम् अत्र मा भवतु ,अनुपदम् एव पुत्र-कलत्रादिभिः समुद्रं प्रयातु , गावः नराश्च सलिलम् इदं पिबन्तु ' इति च वदति।

किञ्च ' त्वं गरुडस्य भयात् खलु सुन्दरं द्वीपं त्यक्त्वा अत्र आगच्छसि। तदपि भयम् इदानीं मास्तु। इदानीं त्वं मत्पदलाञ्छितः सम्पन्नः। अतः सुपर्णःउ गरुडः, अपि मत्-पदलाञ्छितं त्वां किमपि न करिष्यति ' इति वरम् अपि अनुगृह्णाति। किञ्च ' सन्ध्ययोः उभयोः यः त्वां (कालियम्) संस्मरति, अथवा कीर्तयति सः मर्त्यः त्वत्तः नैव भयम् आप्नोति। अस्मिन् ह्रदे यः स्नाति, देवादीः तर्पयति, उपवासं च करोति, अर्चयति सः मनुष्यः सर्वपापैः विमुक्तः भवति ' इति श्रीकृष्णः जनान् अनुशास्ति। एवं जनान् आदिश्य, श्रीकृष्णः कालियाय गौरवं कल्पयति। कालियः अपि दिव्य-स्रक्-मणिभिः गन्ध-अनुलेपनैः भगवन्तम् अर्चयति। तेन अनुज्ञातः भवति। शिरसा प्राणमति। बन्धु- मित्र-पुत्र-कलत्रैः सह, द्वीपं गच्छति। अब्धिं समाश्रयति।

**स्वावलोकनप्रश्नाः**

१.भगवान् कालियं किम् आदिशति ?

२.कालियः श्रीकृष्णं किं वदति ?

३.श्रीकृष्णः कालियस्य किम् इति वरं ददौ ?

## ५.३.१७.८.परिवारस्य परितोषणम् :-

**(मूलम्)** ६३.ततः दिव्य–स्रक्–गन्धवासितं महार्ह–मणि–भूषितं जाम्बूनद–परिष्कृतं ह्रदात् निष्क्रामन्तंश्रीकृष्णं समालिङ्ग्य गोपाः लब्धप्राणाः इव आसन्। तत् प्रभावज्ञः रामः परिष्वज्य अनुजं जहास। नन्दादयः गोपवृद्धाः अपि तं मूर्ध्नि उपघ्राय आशिषः प्रायुञ्जन्। यशोदा लब्धनष्टप्रजा सती परिष्वज्य अश्रुकणान् मुमोच। सापत्य कलत्राः ब्राह्मणाः नन्दम् उपसृत्य ' दिष्ट्या कालियात् मुक्तः तव आत्मजः ' इति अभिननन्दुः। गावः वत्साः वृषाश्च परमां मुदं प्रापुः। ततः हस्तम् उपगते रवौ, श्रीकृष्णः मातापितृभ्यां, रामेण, गोपालैः गोधनैश्च सह उपयमुनं वासम् अकल्पयत्। तस्यां रात्रौ क्षुधार्ताः अध्वश्रमकर्शिताः सर्वे तत्र एव ऊषुः।

**(विवरणम्)** अयं वाक्यसमुदायः, कालियं मर्दयित्वा, कालिन्द्याः बहिः आयान्तं (गोप)बालकृष्णं वृद्धाः, गोपाङ्गनाश्च अभिनन्दन्ति इति अंशं वर्णयति। कालियः श्रीकृष्णं दिव्यस्रजा भूषयति। दिव्यगन्धेन लेपयति। महार्ह–मणिभिः जाम्बूनदं परिष्करोति। तेन जम्बूनदेन अलङ्करोति। एवम् एतैः विलसन् श्रीकृष्णः ह्रदात् बहिः निर्गच्छति। गोपाः निष्क्रामन्तं श्रीकृष्णं समालिङ्गन्ति, लब्धप्राणाः इव भवन्ति। बलरामः श्रीकृष्णस्य अपरिमितं प्रभावं जानाति खलु। परिष्वजति। अनुजाय विजयहासं समर्पयति। नन्दादयः गोपवृद्धाः अपि श्रीकृष्णं मूर्ध्नि उपजिघ्रन्ति। आशिषः प्रयच्छन्ति। यशोदा कालियेन कबलितं श्रीकृष्णं नष्टम् एव चिन्तयति। तादृशी यशोदा कालियह्रदात् बहिरायान्तं श्रीकृष्णं परिष्वजति। अश्रुपातं रुदति। ब्राह्मणाः नन्दम् उपसृत्य 'दिष्ट्या कालियात् मुक्तः तव आत्मजः' इति अभिनन्दन्ति। गावः वत्साः वृषाश्च परमम् आनन्दम् आप्नुवन्ति। अत्रान्तरे सूर्यः अस्तम् एति। श्रीकृष्णः मातापितृभ्यां, बलरामेण, गोपालैः गोधनैश्च सह यमुनायाः तटे वासं कल्पयति। क्षुधार्ताः अध्वश्रमकर्शिताः सर्वे अपि रात्रौ तत्र एव वसन्ति।

**स्वावलोकनप्रश्नाः**

१.ह्रदात् निष्क्रामन्तं श्रीकृष्णं दृष्ट्वा गोपाः कीदृशाः अभवन् ?

२.ह्रदात् निष्क्रामन्तं श्रीकृष्णं दृष्ट्वा नन्दादयः किम् अकुर्वन् ?

३.ह्रदात् निष्क्रामन्तं श्रीकृष्णं दृष्ट्वा यशोदा किं चकार ?

४.ब्राह्मणाः नन्दम् उपसृत्य किम् अभिननन्दुः ?

५.ह्रदात् निष्क्रामन्तं श्रीकृष्णं दृष्ट्वा के परमां मुदं प्रापुः ?

### ५.३.१८.अग्नेः पानम् :-

**(मूलम्)** ६४.अथ निशीथे निद्राणेषु सर्वेषु सुप्तान् व्रजौकसः समावृत्य काननोद्भूतः दवाग्निः परितः प्रदग्धुम् उपचक्रमे। प्रचण्ड-रव-श्रवणेन समुत्थिताः सम्भ्रान्ताः ते व्रजौकसः 'हे महाभाग ! दावाग्निना दह्यमानाः तावकान् अस्मान् पाहि' इति सरामं श्रीकृष्णं शरणं ययुः। एवं स्वजनवैक्लब्यं निरीक्ष्य जगदीश्वरः अनन्तशक्तिः तीव्रं तम् अग्निम् अपिबत्।

**(विवरणम्)** अयं वाक्यसमुदायः, गोपालकृष्णः दावानलं पिबति-आत्मीयान् रक्षति इति अंशं वर्णयति। कालियम् अर्दयित्वा बहिः आगतं बालकृष्णं सर्वे अभिनन्दन्ति। तदा गोकुलवासिनः सर्वे यमुनायाः तटे एव रात्रिं यापयन्ति। सर्वे निद्रां गच्छन्ति। तस्मिन् एव समये अकस्मात् कानने अग्निः जायते। तत् च काननं दहति। तमेव दवाग्निं कथयन्ति। सः दवाग्निः काननं परितः प्रसरति। प्रदग्धुम् उपक्रमति। निद्राम् उपगताः दवाग्नेः प्रचण्डरवं शृण्वन्ति। अकस्मात् समुत्थिताः भवन्ति। सम्भ्रान्ताः च भवन्ति। मार्गान्तरशून्याः ते व्रजौकसः बलरामस्य आध्वर्ये श्रीकृष्णं शरणं प्राप्नुवन्ति। श्रीकृष्णम् ' हे महाभाग ! दावाग्निना दह्यमानान् तावकान् अस्मान् पातु ' इति विज्ञापयन्ति। श्रीकृष्णः स्वजनानां कष्टम् अवगच्छति। बालकृष्णः भगवत्-स्वरूपः, सः अमेयात्मा= अपरिमितशक्तिसम्पन्नः, भयङ्करं तीव्रं तं दवाग्निं जलम् इव पिबति। हृदये क्षिपति। गोकुलवासिनः आत्मीयान् परिरक्षति।

**स्वावलोकनप्रश्नाः**

१.दवाग्निः कः ?

२.व्रजौकसः किम् इति शरणं ययुः ?

३.श्रीकृष्णः कीदृशः ?

४.श्रीकृष्णः स्वजनवैक्लब्यं दृष्ट्वा किम् अकरोत् ?

### ५.३.१९.श्रीकृष्णस्य विहरणम् :-

**(मूलम्)** ६५.अथ प्रभाते प्रस्थाय यमुनातटात् सज्ञातिबन्धुः सगोधनः नन्दनन्दनः व्रजम् उपागमत्। एवं गोकुले गोपालव्याजेन क्रीडति भगवति नारायणे, सर्वप्राणिप्रियंकरः ग्रीष्मर्तुः उपावर्तत। सः अपि साक्षात् भगवत् आवासेन वसन्तः इव लक्षितः आसीत्। तदा प्रफुल्लकुसुमम्,गायन्-मयूरभ्रमरं, कूजत्-कोकिल-सारसम्, नदत्- चित्रमृग-द्विजं बृन्दावनं

गोपालैः सह विहर्तुकामः सरामः यशोदानन्दनः गोधनं पुरस्कृत्य प्राविशत्। प्रवाल- बर्हपुष्प-स्तबकादिभिः अलङ्कृताः सर्वे गोपलाः सरामं श्रीकृष्णं प्रशंसन्तः वेणुवादनैः श्रृङ्गरवैः नर्तनैः करतलास्फोटनैः च सानन्दं विजहुः।

**(विवरणम्)** अयं वाक्यसमुदायः, बृन्दावने गोपालकृष्णस्य विनोदनं विहरणं च वर्णयति। ततः श्रीकृष्णः उदये एव ज्ञातीन् बन्धून् गाः च मिलति। यमुनातटात् व्रजं गच्छति। गोकुले गोपालकैः सह सानन्दं सविनोदं क्रीडति। तत्र कालं यापयति। तदैव ग्रीष्मर्तुः प्रविशति। ग्रीष्मर्तुः सर्वेषां प्राणिनां प्रियम् आदधाति। सः ग्रीष्मर्तुः अपि साक्षात् भगवतः श्रीकृष्णस्य आवासेन= सान्निध्येन, वसन्तर्तुः इव दृश्यते। ग्रीष्मर्तौ अपि वृक्षेषु पुष्पाणि म्लानतां विहाय विकसितानि भवन्ति। मयूराः भ्रमराः च उष्णपरितापम् अमत्वा मधुरं गायन्ति। कोकिलाः निदाघपीडां (ग्रीष्मबाधाम्) निराकत्य कूजन्ति। चित्रमृगाः नदन्ति। एवं ग्रीष्मकाले अपि वसन्तशोभया इव बृन्दावनं विराजते। एवं ग्रीष्मर्तुः मनसः उल्लासं ददाति। तस्मिन् श्रीकृष्णः विहर्तुम् इच्छति। गाः पुरतः कृत्वा बलरामेण गोपालैः सह बृन्दावनं प्रविशति। तत्र केचन प्रवालालान्,अपरे केचन बर्हपुष्पस्तबकादीनि च कर्णयोः धरन्ति। सर्वे गोपलाः बलरामं श्रीकृष्णं च प्रशंसन्ति। वेणुवादनैः श्रृङ्गरवैः नर्तनैः करतलास्फोटनैः च सानन्दं
विहरन्ति।

**स्वावलोकनप्रश्नाः**

१. भगवान् नारायणः केन व्याजेन क्रीडति ?

२.सर्वप्राणिप्रियङ्करः ऋतुः कः ?

३.ग्रीष्मर्तुः कुतः वसन्तः इव लक्षितः ?

४.यशोदानन्दनः कीदृशं बृन्दावनं प्राविशत् ?

## ५.३.२०.बलरामकृतः प्रलम्बासुरवधः :-

**(मूलम्)** ६६.एवं गोपबालकैः सह लोकसिद्धाभिः नैकाभिः क्रीडाभिः क्रीडन्तौ कालिन्दीतटे सरस्तीरेषु अद्रिकन्दरेषु च गाः चारयन्तौ रामकृष्णौ हर्तुकामः प्रलम्बनामा असुरः गोपरूपम् आस्थाय तत्सङ्घे प्राविशत्। सर्वज्ञः भगवान् तं जानन् अपि, तत् जिघांसया तत्सख्यम् अन्वमोदत। तदा क्रीडनाय सर्वे गोपालाः द्विधा विभक्ताः बभूवुः। तत्र एकस्य सङ्घस्य बलरामः, अन्यस्य श्रीकृष्णश्च परिवृढौ आस्ताम्। तत्र रामपक्षीयः एकः कृष्णपक्षीयः अन्यश्च वयोबल-अनुरूपेण द्वन्द्वीभूय वाह्य-वाहकलक्षणाः नानाविधाः क्रीडाः आचेरुः। जेतारं पराजितः वहति। विजेता तम् आरोहति। एवं वहन्तः वाह्यमानाश्च, गाः चारयन्तः भाण्डारं नाम वटं श्रीकृष्ण - पुरोगमाः आजग्मुः। पराजितः भगवान् श्रीकृष्णः श्रीदामानम् उवाह। वृषभं भद्रसेनः गोपरूपी प्रलम्बः रोहिणीसुतं च उवाह। एवं हलधरम् उद्वहन् दृततरम् अवरोहणावधिम् अतिक्रम्य सुदूरं गत्वा सः भारातिरेकेण निहतरयः अतिकरालं निजं रूपं प्रपेदे। उग्रदंष्ट्रं पिङ्गलशिखम् अतिभीषणं तद्वपुः अवेक्ष्य किञ्चित् भीतः हलधरः प्रत्यागतस्मृतिः अभयः व्रजसार्थम् अपहाय आत्मानं हरन्तं तम् असुरं वज्ररंहसा मुष्टिना शिरसि अभिजघान। अशनितुल्येन तत् मुष्टिघातेन विदीर्णमस्तकः मुखात् रुधिरम् उद्वमन् अपगत-असुः महारवेण निपपात। एवं बलेन निहते तस्मिन् असुरे सुविस्मिताः गोपाः तम् आलिङ्ग्य प्रशशंसुः।

**(विवरणम्)** अयं वाक्यसमुदायः, बलरामः प्रलम्बासुरं संहरति इति अंशं वर्णयति। बलराम-कृष्णौ कालिन्दीतीरे गोपबालकैः सह क्रीडतः । गाः चारयतः । एवं स्थिते प्रलम्बनामा असुरः कश्चित् राम-कृष्णौ हन्तुम् इच्छति। सः गोरूपं धरति। गोसङ्घे प्राविशति। सर्वज्ञः कृष्णः प्रसम्बस्य प्रवेशं जानाति। तथापि तं हन्तुं तत्सख्यम्उ तस्य प्रवेशम्, अनुमोदते। क्रीडनाय सर्वे गोपालाः द्विधा विभक्ताः भवन्ति। एकस्य सङ्घस्य बलरामः नायकः भवति। अन्यस्य सङ्घस्य श्रीकृष्णः नायकः भवति। उभौ अपि पक्षौ वाह्य-वाहकलक्षणाः नानाविधाः क्रीडाः खेलन्ति। जेतारं पराजितः वहति। विजेता तम् आरोहति। पराजितः श्रीकृष्णः श्रीदामानं वहति। गोरूपधरः प्रलम्बः बलरामं वहति। सुदुरं गत्वा सः भारातिरेकेण अतिकरालं निजं रूपं प्राप्नोति। अतिभीषणं तस्य शरीराकृतिं दृष्ट्वा हलधरः आदौ किञ्चित् भीतः भवति। आत्मानं हरन्तं तम् असुरं मुष्टिना शिरसि प्रहरति। अशनितुल्येन तेन घातेन विदीर्ण-मस्तकः सन् प्रलम्बः रक्तं उद्वमति। असून् त्यजति। अधः पतति। एवं गोपाः बलरामेण निहतं प्रलम्बकासुरं पश्यन्ति। सुविस्मिताः भवन्ति। बलरामम् आलिङ्गन्ति, प्रशंसन्ति च।

**स्वावलोकनप्रश्नाः**

१.प्रलम्बनामा असुरः किमर्थं गोपसङ्घे प्राविशत् ?

२.भगवान् केन आशयेन तत् सख्यम् अन्वमोदत ?

३.कीदृशाः क्रीडाः आचेरुः ?

४.पराजितः कं वहति ?

५.विजेता किं करोति ?

६.प्रलम्बः कम् उवाह ?

७.प्रलम्बः कथम् निजरूपं प्रपेदे ?

८.हलधरः(बलरामः) प्रलम्बं कथम् अभिजघान ?

## ५.३.२१.गवां, गोपालकानां च रक्षणम् :-

**(मूलम्)** ६७.क्रीडाव्यतिकरेण गोपालैः अनवेक्षमाणः पशुव्रातः तृणलोभेन वनात् वनम् अटन् क्रमेण मुञ्जाटवीं प्राविशत्। ततः रामकृष्णादयः गोपाः पशून् अपश्यन्तः भीताः तत् खुरक्षुण्णमार्गेण मुञ्जवनं गत्वा,ततः नष्टमार्गम् आक्रन्दन्तं गोधनम् अप्राप्य निर्विण्णाः बभूवुः। ततः श्रीकृष्णः प्रोत्तुङ्गवृक्षम् आरुह्य आत्मानं दर्शयन् स्व-स्व-नामभिः गाः समाह्वयत्। मेघगम्भीरया गिरा भगवता समाहूताः स्व-नाम-निनदम् आकर्ण्य प्रहर्षिताः प्रतिनेदुः। तदनु मरुत्-समीरितः दवाग्निः समन्तात् शिखाभिः वनं लेलेहानः गोपान् गोधनं च पर्यवेष्टयत्। ततः नितराम् उद्विग्नाः गोपबालकाः सबलं शरणागतवत्सलं वासुदेवं शरणं प्रपेदिरे। ततः सुहृदां कृपणं वचः निशम्य तेषाम् अभयं प्रदाय चक्षूंषि निमीलयत इति तान् अन्वशात्। तेन निमीलितलोचनेषु तेषु, भगवान् मुखेन दवानलं निरवशेषं पीत्वा, ततः बन्धून् अमोचयत्। ततः समुन्मीलितलोचनान् तान्, गोधनानि च क्षणेन एव भाण्डीरं प्रापयामास। साक्षात् तन्महिमानम्

अवेक्षमाणाः गोपाः तम् अमरं मेनिरे। ततः सायह्णे निवर्त्य, गोधनानि गोपैः अभिष्टुतः, वेणुं वादयन्, तेन विना क्षणं युगशतं मन्यमानाः गोपीः आत्मदर्शनेन आनन्दयन् गोष्ठं प्राविशत्। प्रलम्बवधम्, आत्मनः दवानलात् मोक्षणञ्च गोपाः तत् तत् मातृभ्यः सविस्मयम् आचख्युः। तदाकर्ण्य गोंपवृद्धाः राम-कृष्णौ भाग्यवशात् व्रजे अवतीर्णौ देवप्रवरौ इति अमंस्त।

**(विवरणम्)** अयं वाक्यसमुदायः, गोपालकृष्णः दावानलात् गाः गोपबालकान् च परिरक्षति इति अंशं वर्णयति। गोपालाः उत्साहेन क्रीडातत्पराः भवन्ति। गोपालाः गोसमुदायं न तथा सम्यक् पर्यवेक्षन्ते। अतः तृणखादने इच्छया गोसमुदायः वनात् वनम् अटति। क्रमेण मुञ्जाटवीं प्रविशन्ति। ततः बलराम-कृष्णादयः गोपाः गाः न पश्यन्ति। भीताः भवन्ति। तत् खुरक्षुण्णमार्गेण मुञ्जवनं गच्छन्ति। तत्र गावः अपि आगतं मार्गं न स्मरन्ति। ततः आक्रन्दन्ति। गोपाश्च गाः अप्राप्य निर्विण्णाः भवन्ति। श्रीकृष्णः गवाम्, गोपानां च निर्विण्णतां पश्यति। उन्नतं वृक्षम् आरोहति। गवाम् आत्मानं दर्शयति। गोषु एकैकं स्व-स्व-नामभिः समाह्वयति। भगवतः मेघगम्भीरम् स्व-नाम-निनदनपूर्वकम् आह्वानं शृण्वन्ति। हर्षम् आप्नुवन्ति। प्रतिनदन्ति च। तदनन्तरम् अकस्मात् वने दवाग्निः जायते। वायुः च तम् इतोऽधिकं विस्तारयति। दवाग्निः समन्तात् शिखाभिः आवृतः भवति। वने गोपान् गोसमहदायं च परितः वेष्टते। तं दृष्ट्वा गोपबालकाः नितरामुद्विग्नाः भवन्ति। बलरामेण सह चरन्तं , शरणागतवत्सलं वासुदेवं शरणं प्राप्नुवन्ति। श्रीकृष्णः सहचराणां सुहृदां गोपालकानाम् आर्तिं शृणोति। तेषाम् अभयं ददाति। चक्षूंषि निमीलयत इति तान् आदिशति। भगवान् मुखेन दवानलं निरवशेषं पिबति। श्रीकृष्णः सहचरान् मोचयति। ततः सहचराः समुन्मीलित-लोचनाः भवन्ति। तान्, गोधनानि च क्षणेन एव कालिन्दीतीरं प्रापयति। गोपबालकाः साक्षात् श्रीकृष्णस्य महिमानं जानन्ति। श्रीकृष्णं प्रशंसन्ति। गोपाः तम् अमरं भावयन्ति। अनन्तरं सायंकाले श्रीकृष्णः,गोभिः गोपैः च गोकुलं निवर्तते।वेणुं वादयति। गोप्यः,तेन विना क्षणं युगशतं मन्यन्ते। श्रीकृष्णः आत्मदर्शनेन गोपीः आनन्दयति। गोष्ठं प्राविशति। गोपबालकाः प्रलम्बवधम्, आत्मनः दवानलात् मोक्षणञ्च तत् तत् मातृभ्यः सविस्मयम् कथयन्ति। तदाकर्ण्य गोंपवृद्धाः तत् शृण्वन्ति। बलराम-कृष्णौ भाग्यवशात् व्रजे अवतीर्णौ देवप्रवरौ इति भावयन्ति।

**स्वावलोकनप्रश्नाः**

१. पशुव्रातः कुत्र प्राविशत् ?

२.रामकृष्णादयः किमर्थं निर्विण्णाः बभूवुः ?

३.गोपालकृष्णः गाः आप्तुं किम् अकरोत् ?

४.गोपान् गोधनं च कः पर्यवेष्टयत् ?

५.गोपालकाः कम् शरणं प्रपेदिरे ?

६.गोपालकृष्णः गोपान् किं कर्तुम् अन्वशात् ?

७.भगवान् किं कृत्वा बन्धून् अमोचयत् ?

## ५.३.२२.बृन्दावने प्रावृट्-श्रियः वीक्षणम् :-

**(मूलम्)** ६८.अथ प्रवृत्तायां प्रावृषि,नील-जलधरैः समन्तात् आकीर्णे अम्बरतले, प्रमोदनिर्भरेषु जानपदेषु, विस्तारित-बर्हेषु मयूरेषु नृत्यत्सु, कालान्तराकृष्टम् अम्भः द्विगुणतरम् अधमर्णः इव प्रत्यर्पयति भुवः पर्जन्ये, क्षुद्रनदीषु महानदीषु च जलेन परिप्लुतासु, निर्भिन्नसेतुषु कासारेषु, प्रवृद्ध-शालि-नीलिमा-क्रान्तायां वसुन्धरायां कालवशात् द्विजैः अनभ्यस्त-आम्नायेषु इव तृणछन्नेषु अध्वसु संदिग्धेषु, इन्द्रगोपैः परितः सुपुष्पितायाम् इव परिदृश्यमानायां विश्वम्भरायां कुटज-कदम्बक-केतकी-कुसुमैः जम्बू-खर्जूर-कानन-आम्रफलैः च समन्तात् आकीर्णम् अतिमनोहरं बृन्दावनं रन्तुकामः भगवान् साग्रजः गोपैः सह पुरस्कृत्य गोधनं प्राविशत्। निरन्तरासु सवातवृष्टिषु गिरिगुहासु तरुकोटरेषु च वसन् प्रकम्पितगात्रयष्टिः गोपलीलां विडम्बयामास। सलिल-अन्तिके शिलायाम् उपविश्य समानीतं दध्योदनं गोपैः सह परिवृतः बुभुजे। शाद्वलोपरि संविश्य वर्तितरोमन्थान् मीलित- ईक्षणान् दृप्तवृषान् वत्सतरान् ऊधोभरश्रमाः गाः तादृशीं स्वोपबृंहितां प्रावृट्-श्रियञ्च वीक्ष्य नितरां रेमे।

**(विवरणम्)** अयं वाक्यसमुदायः बृन्दावने समन्ततः व्याप्तां प्रावृषः (वर्ष-ऋतोः) शोभां= सौन्दर्यं वर्णयति। अथ च वर्षर्तुः प्रविशति। समन्तात् आकाशतलं जलपूर्णैः नीलमेघैः

व्याप्तं वर्तते। जानपदाः प्रमोदेन प्रसन्नाः सन्ति। मयूराः बर्हान् विस्तारयन्ति। सोल्लासं नृत्यन्ति। ऋणस्वीकर्ता स्वीकृतं धनं पुनः वृद्ध्या यथा अर्पयति , तथा पर्जन्यः द्विगुणतरम् अम्भः भुवः प्रत्यर्पयति । कुल्यानि महानद्यश्च च जलेन पूर्णाः प्रवहन्ति। कासारेषु सेतुवः निर्भिन्नाः भवन्ति। वसुन्धरा च सस्येन श्यामला वर्तते। वर्षकाले अध्वानः, कालप्रभावात् अनधीतवेदविद्याः ब्राह्मणाः इव, तृणैः छन्नाः सन्तः संशयास्पदाः तिष्ठन्ति। बृन्दावनम् कदम्बवृक्षैः,केतकी कुसुमैः,जम्बूफलैः खर्जूर- फलैः आम्रफलैः च समन्तात् आकीर्णम् अतिमनोहरं विद्यते। भगवान् श्रीकृष्णः बलरामेण गौपैः सह वर्षकालस्य, शोभां रन्तुम् अभिलषति। गोसमुदायं प्रविशति। निरन्तरं वृष्टिः पतति। वातः च उग्रं प्रसरति। सः श्रीकृष्णः निरन्तरासु वातवृष्टिषु आत्मानं सेचयति। गिरि-गुहासु तरु-कोटरेषु च वसति। श्रीकृष्णस्य गात्रयष्टिः प्रकम्पितः भवति। तथापि सामान्यगोपबालकः इव प्रवर्तते। शिलायाम् उपविश्य समानीतं दध्योदनं गोपैः सह खादति। गावः शाद्वलोपरि संविशन्ति। रोमन्थं वर्तयन्ति। ऊधसः भारेण श्रमाम् आप्नुवन्ति। नेत्राणि निमीलन्ति। दृप्तवृषान् वत्सतरान् स्मरन्ति। श्रीकृष्णः एतादृशैः उपबृंहितां प्रावृषःउवर्षकालस्य,शोभां पश्यति। अतीव आनन्दितः भवति।

**स्वावलोकनप्रश्नाः**

१.प्रावृट् शोभा कीदृशी ?

२.अम्बरतलं कथम् अस्ति ?

३.मयूराः किं कुर्वन्ति ?

४.पर्जन्यः कथं वर्षं प्रत्यर्पयति ?

५.नद्यः कीदृशाः सन्ति ?

६.वसुन्धरा कीदृशी अस्ति ?

७.कुत्र उपविश्य दध्योदनं बुभुजे ?

## ५.४.उपसंहारः

एवम् अत्र बृन्दावनगमनाय सन्नाहकरणम्,रामकृष्णयोः गोवत्सपालनम्,दैत्यस्य संहरणम्,गुणैः नारायणसमत्वम्, गोपालकैः सह क्रीडनम्, लीलार्भकस्य भगवतः (श्रीकृष्णस्य) महत्त्वम्, बलरामस्य अहङ्कारापनयनम्, ब्रह्मणः गर्वस्य भञ्जनम्, राम-कृष्णयोः कौमारम्,नन्दसूनोः अद्रिकन्दरेषु विहरणम्, धेनुकासुर-वधः, मातुः पर्यङ्कशयनम्, कालियमर्दनम्, दवाग्नेः पानम्, श्रीकृष्णस्य विहरणम्, बलरामकृतः प्रलम्बासुरवधः, गवां, गोपालकानां च रक्षणम्, बृन्दावने प्रावृट्-श्रियः वीक्षणम् इति एते अंशाः कथिताः। एते च अंशाः कौमार-अवस्थायां श्रीकृष्णस्य दिव्यत्वं ज्ञातुं प्रभवन्ति।

## ५.५.अभ्यासः

अ).कालियमर्दनवृत्तान्तं सविस्तरं वर्णयत ?

इ).श्रीकृष्णः ब्रह्मणः दुरहङ्कारं कथं निर्मूलितवान् ,वर्णयत ?

उ).श्रीकृष्णस्य कौमारदशायाः विलासविशेषान् लिखत ?

# UNIT-VI
# गोपाङ्गनाभिः सह श्रीकृष्णः

**संरचना**

६.१.परिचयः
६.२.लक्ष्याणि
६.३.गोपाङ्गनाभिः सह श्रीकृष्णः
- ६.३.१.बृन्दावने शरदः शोभा
  - ६.३.१.१.बृन्दावने वेणुगानम्
- ६.३.२.गोपाङ्गनाभिः कात्यायन्याः व्रताचरणम्
  - ६.३.२.१.गोपिकावस्त्रापहरणम्
- ६.३.३.विप्रभार्याणाम् अनुग्रहणम्
  - ६.३.३.१.विप्रभार्याणां श्रीकृष्णस्य सन्देशनम्
  - ६.३.३.२.अच्युतस्य रमणम्
  - ६.३.३.३.विप्राणां पश्चात् तपनम्
- ६.३.४.इन्द्रस्य गर्वभञ्जनाय सङ्कल्पनम्
  - ६.३.४.१.गोवर्धनपर्वतस्य उद्धरणम्
  - ६.३.४.२.व्रजौकसाम् आनन्दातिरेकः – तेषां श्रीकृष्णाभिनन्दनम्
  - ६.३.४.३.इन्द्रस्य व्रीडनम् – तस्य प्रार्थनं च
  - ६.३.४.४.इन्द्रस्य क्षमा याचनम् – श्रीकृष्णस्य अनुग्रहणम्
- ६.३.५.व्रजौकसां वरुणलोकदर्शनम्
- ६.३.६.गोपाङ्गनानां मुक्तिप्रदानम्
- ६.३.६.१.गोपाङ्गनाभिः सह श्रीकृष्णस्य नर्तनम्
- ६.३.६.२.गोपाङ्गनानां उन्मत्तभाषणम्
- ६.३.६.३.गोपाङ्गनायाः सौन्दर्याभिमानम्
- ६.३.६.४.नन्दनन्दनस्य दर्शनम्
- ६.३.६.५.व्रजसुन्दरीणां विदेहकैवल्यप्रदानम्

६.४.उपसंहारः
६.५.अभ्यासः

## ६.१.परिचयः

अयं च षष्ठः पाठ्यांशः (UNIT-VI)। एषः कृष्णचरितस्य प्रथमखण्डे ६९-९१ (para graphs) पर्यन्तं प्रचलति। गते पञ्चमे पाठ्यांशे (UNIT-V) बृन्दावने राम-कृष्णयोः विहरणं वर्णितम्। तत्र गोपालकैः सह क्रीडनम्, बकासुरस्य संहरणम्, लीलार्भकस्य भगवतः श्रीकृष्णस्य महत्त्वम्, बलरामस्य अहङ्कारनिरसनम्, ब्रह्मणः गर्वभङ्गः, नन्दसूनोः अद्रिकन्दरेषु विहरणम्, धेनुकासुरस्य वधः, कालियस्य मर्दनम्, बलरामकृतः प्रलम्बासुरस्य वधः इति एते अंशाः निरूपिताः सन्ति। परम् अत्र षष्ठे पाठ्यांशे (UNIT-VI) बृन्दावने शरदः शोभायाः वीक्षणम्, तत्र श्रीकृष्णस्य वेणुगानम्, गोपाङ्गनाभिः सह श्रीकृष्णस्य विरहणम्, नन्दव्रजकुमारिकाणां कात्यायन्याः अर्चनम्, गोपिकावस्त्रापहरणम्, विप्रभार्याः उद्दिश्य श्रीकृष्णस्य अनुग्रहभाषणम्, विप्राणांपश्चात्तापः, इन्द्रस्य गर्वभङ्गाय सङ्कल्पनम्, गोवर्धनपर्वतस्य उद्धरणम्, इन्द्रस्य व्रीडनम्, श्रीकृष्णेन इन्द्रस्य अनुग्रहणम्, व्रजौकसां वरुणलोकदर्शनम्, गोपाङ्गनाभिः सह श्रीकृष्णस्य नर्तनम्, गोपाङ्गनानां प्रलपनम्, गोपाङ्गनायाः सौन्दर्यदर्पः, गोपाङ्गनानां विलपनम्, व्रजसुन्दरीणां विदेहकैवल्यप्रदानम् इति एते अंशाः बोधयितुम् उद्दिष्टाः। एते गोपाङ्गनाभिः श्रीकृष्णस्य सरसतायाः नेपथ्ये विद्यमानं तात्त्विकं चिन्तनं प्रकटयन्ति। अत्र गद्यम् सरलं विद्यते। सुलभव्यक्तीकरणाय समर्थं सत् पठने आसक्तिं जनयति। हृद्यं सत् कथाकथने कुतूहलं वर्धयति च।

## ६.२.लक्ष्याणि

**श्रवणम्, कीर्तनम्, विष्णोः, स्मरणम्,पादसेवनम्।**

**अर्चनम्, वन्दनम्, दास्यम्, सख्यम्, आत्मनिवेदनम् ।।** ' अयं श्लोकः १.श्रवण, २.कीर्तन, ३.स्मरण, ४.पादसेवन ५.अर्चन ६.वन्दन ७.दास्य ८.सख्य ९.आत्मनिवेदन रूपान् नव विधान् भक्तिमार्गान् सूचयति। तत्र श्रीकृष्णं प्रति गोपानां भक्तिः सख्यभक्तिः भवति, तथैव गोपिकानां भक्तिः आत्मनिवेदनात्मिका भवति। बृन्दावने श्रीकृष्णस्य मनोहरं मुरलीरवं श्रुत्वा गोपाङ्गनाः पारवश्येन नृत्यन्ति, गायन्ति, प्रलपन्ति, तदधीनाः भवन्ति। एवं श्रीकृष्णाय आत्मानं समर्पयन्ति च। एवम् श्रीकृष्णस्य कृते आत्मानम् अर्पितवतीनां गोपाङ्गनानां सरसाः चेष्टाः कीदृशाः ? तासाम्,श्रीकृष्णस्य स्पन्दनं कीदृशम् ? गोपाङ्गनानां सरससल्लापादिकं विदेहकैवल्यप्राप्तये कथम् उपकृतम् भवति इति एतादृशानां विषयाणां बोधनम् अत्र प्रधानतया उद्दिष्टम्। एतत् पाठ्यांशस्य अध्ययनेन -

- आधुनिकसंस्कृतगद्यस्य परिचयः सम्पादितः भवति।
- संस्कृतगद्यस्य माध्यमेन पौराणिककथायाः श्रवणे पठने च समर्थः भवति।

- आधुनिकसंस्कृतगद्यस्य माध्यमेन सरलवाक्यरचनायाः निर्माणे,प्रवीणः भवति।
- बृन्दावने वेणुगानमाधुर्यस्य प्रभावं जानाति।
- व्रजकुमारीणां कात्ययनीव्रताचरणं पठितुं पारयति।
- गोपिकावस्त्रापहरणवृत्तान्तस्य तात्त्विकं चिन्तनं कर्तुं प्रभवति।
- इन्द्रस्य गर्वभङ्गवृत्तान्तं लिखितुं समर्थः भवति।
- गोपिकानां परवशतां प्रति अवगाहनापरः भवति।

## ६.३.गोपाङ्गनाभिः सह श्रीकृष्णः

### ६.३.१.बृन्दावने शरदः शोभा :-

**(मूलम्)** ६९.एवं प्रावृषि,प्रत्यहं गोपगणैः अग्रजेन सह बृन्दावने गाः चारयति गोविन्दे क्रमेण अतिचक्राम प्रावृट्। प्रवृ त्तायां शरदि नद्यः शनैः कार्श्यं प्रापुः। अनाविलम् अम्भः समजनि। आश्यानकर्दमाः पन्थानः सुगमाः आसन्।निर्मेघं नभस्थलं निर्मलम् आसीत्। सरोजश्रिया कासाराः नितरां विरेजिरे। कमलगन्धिना समशीतोष्ण- वायुना लोकः शरद्-अर्कजं तापं जहौ। कृषीवलाः दृढसेतुबन्धैः केदारेषु जलम् अगृह्णन्। शालयः फलभारेण विनम्राः बभूवुः। एवं सकललोकप्रमोदकरे काले वेणुरवेण सर्वं जगत् विमोहयन्,नन्दसूनुः अग्रजेन पशुपालैः च सह बृन्दावने गाः चारयामास।

**(विवरणम्)** अयं वाक्यसमुदायः बृन्दावनगतां शरदः शोभां वर्णयति। श्रीकृष्णः गोपगणैः अग्रजेन बलरामेण सह बृन्दावने विहरति। गाः चारयति च। एवं विनोदेन विलासेन च श्रीकृष्णः प्रावृषं यापयति। शरदृतुश्च प्रविशति। शरदि नद्यः प्रवाहस्य उद्धृतिं त्यजन्ति। शनैः कार्श्यं प्राप्नुवन्ति। अम्भः धूलिदूसरादिकं अधःकृत्य निर्मलं भवति। मार्गाः पङ्केन शुष्काः भवन्ति। सुलभेन गन्तुं योग्याः भवन्ति। नभस्थलं निर्मलं भवति। मेघाः न भवन्ति। तटाकेषु पद्मानि विकसितानि भवन्ति। सरोजश्रिया कासाराः नितरां विराजन्ते। वायुः शीतेन उष्णेण च समः वर्तते। कमलानां गन्धेन च वायुः पृक्तः भवति। सः च वायुः लोकस्य सूर्यातपम् अपनुदन् वर्तते। कृषीवलाः कुल्याभिः केदारेषु जलम् गृह्णन्ति। शालयः फलभारेण विनम्राः भवन्ति। एवं शरदृतुः सकललोकस्य प्रमोदं करोति। तस्मिन् काले श्रीकृष्णः वेणुरवेण सर्वं जगत् विमोहयति। बृन्दावने गाः चारयति। अग्रजेन पशुपालैः च सह बृन्दावने सानन्दं विहरति च ।

**स्वावलोकनप्रश्नाः**

१.प्रवृत्तायां शरदि , नद्यः कीदृशाः बभूवुः ?

२.अम्भः कथं समजनि ?

३.पन्थानः कीदृशाः अभवन् ?

४.निर्मलं किम् आसीत् ?

५.लोकः केन तापं जहौ ?

६.कृषीवलाःकेषु जलम् अगृह्णन् ?

७.शालयः कथं बभूवुः ?

८.नन्दसूनुः केन जगत् विमोहयति ?

### ६.३.१.१.बृन्दावने वेणुगानम् :-

**(मूलम्)** ७०.पीतकौशेयवाससं कर्णिकारकृत-कर्णावतंसं वनमालालंकृत-उरस्स्थलम् अतिमनोहरं वेणुम् उद्गायन्तं तं समुद्वीक्ष्य बृन्दावनचारिण्यः व्रजकुमार्यः अनङ्ग-ताप-सन्तप्त-हृदयाः तम् अनेकधा अवर्णयन्। अत्र काचन अन्याम् एवम् उवाच- 'मृदु-कराङ्गुलि-स्पृष्ट-रन्ध्रभागेन वेणुना जुष्टम् एतयोः वक्त्रं ये पश्यन्ति तेषाम् एव अक्षिसाफल्यं न अन्येषाम्। किं वा तपः आचरितम् अनेन वेणुना। यत् अयं गोपिभोग्यां दामोदराधरसुधां भुङ्क्ते। धन्याः ते तरवः, येषां कुले वेणुः अयं जातः। धन्याश्च ताः ह्रदिन्यः,यासां पयसा अयं पुष्टः' इति। अपरा 'सखि! बृन्दावनम् इदं स्वर्गात् अपि अधिकां कीर्तिं भुवे वितोनोति, यतः इदं देवकी-सुत-पदाम्बुज- अङ्कितम्, यतः अत्र वेणुरवम् आकर्ण्य, मन्द्र -गर्जितं नीलमेघं भगवन्तं मत्वा,नृत्यत्सु बर्हिषु, सर्वे अपि अत्रत्याः जन्तवः उपरत-अन्य-व्यापाराः आसन् ' इति। अन्या काचन ' सखि ! धन्याः एताः मूढधियः अपि हरिण्यः यत् एताः उपात्तचित्रवेषं गोविन्दं निरीक्ष्य , वेणुरवं च आकर्ण्य, नन्दसूनोः अधीर-प्रेक्षितैः पतिभिः सह पूजां कुर्वते ' इति। इतरा ' सखि !

वनितोत्सवरूपशीलम् अरविन्दलोचनं कृष्णं निरीक्ष्य, तत् वेणुरवं च आकर्ण्य, विमानगतयः देवाङ्गनाः अपि मुमुहुः। यतः तासां केशभरः भ्रश्यत् प्रसूनः आसीत्। नीवीबन्धः अपि विस्रंसितः ' इति। अन्या ' सखि! एते तरुशाखा-अवलम्बिनः विहगाः प्रायशः मुनयः भवेयुः, यतः एते नन्द- नन्दनस्य कलवेणुगीतम् आकर्ण्य निमीलितलोचनाः विगत-अन्यवाचः बभूवुः ' इति। एवं बृन्दावनचारिणः भगवतः क्रीडाः वर्णयन्त्यः गोपकुमार्यः तन्मयतां प्रापुः। एवम् अहर्दिवं शरदि विचित्रवेषैः कलमधुरैः वेणुगीतैश्च स्मरतापम् उपबृंहयन् बृन्दावने गाः चारयति नन्दनन्दने हेमन्तः प्रावर्तत।

**(विवरणम्)** अयं वाक्यसमुदायः बृन्दावने श्रीकृष्णस्य वेणुगानम्, गोपाङ्गनानां मधुरानुभूतिं च वर्णयति। श्रीकृष्णः पीतं दुकूलवस्त्रं धरति। कर्णयोः अवतंसके अलङ्करोति। कण्ठे वनमालां धरति। वनमालया उरसं भूषयति। वेणुं उच्चैः मधुरं गायति। बृन्दावने चारिण्यः तादृशं श्रीकृष्णं पश्यन्ति। व्रजकुमार्यः श्रीकृष्णस्य रूपसौन्दर्येण आकृष्टमनस्काः भवन्ति। अनङ्गस्य तापेन सन्तप्तहृदयाः भवन्ति। तम् एव मनसि अनेकधा वर्णयन्ति। व्रजाङ्गनाः तं मनसि चिन्तयन्तः परस्परम् एवं सल्लपन्ति।

अत्र काचन अन्याम् - ' श्रीकृष्णस्य ओष्टयोः भाग्यम् , अहो, अतिमहत् ,तत् अनिर्वर्णनीयं भवति। मृदुभिः कराङ्गुलिभिः स्पृष्ट-रन्ध्र-भागः एषः वेणुः श्रीकृष्णस्य ओष्टौ एव सततं चुम्बन् वर्तते। तत् वक्त्रं पश्यन्तः जनाः कियन्तः धन्याः स्युः वा। वेणुः सततं श्रीकृष्णस्य अधरं चुम्बति। किं वा तपः तेन आचरितं स्यात् । येषां कुले वेणुः अयं जातः, ते तरवः धन्याः। यासां पयसा अयं पुष्टः वर्धितः च ते जलाशयाश्च धन्याः खलु ' इति वदति।

अपरा ' सखि! बृन्दावनं महिमोपेतम्, प्रभावपूर्णं च वर्तते। स्वर्गात् अपि बृन्दावनम् एव अधिकां कीर्तिं भुवः वितोनोति। इदं बृन्दावनं श्रीकृष्णस्य चरणारविन्देन लाञ्छितम् अस्ति। मयूराः श्रीकृष्णं पश्यन्ति। श्रीकृष्णस्य वेणुरवं च शृण्वन्ति। भगवन्तं श्रीकृष्णं मन्द्रगर्जितं नीलमेघं चिन्तयन्ति। सोल्लासं नृत्यन्ति। तत्रत्याः अन्ये सर्वे अपि जन्तवः इतरकार्यकलापान् विहाय मयूराणां नृत्यं पश्यन्ति ' इति बृन्दावनस्य महनीयतां कीर्तयति।

अन्या काचन ' सखि ! धन्याः एताः मूढधियः अपि हरिण्यः यत् एताः उपात्तचित्रवेषं गोविन्दं निरीक्ष्य , वेणुरवं च आकर्ण्य, नन्दसूनोः अधीर-प्रेक्षितैः पतिभिः सह पूजां कुर्वते ' इति। इतरा ' सखि ! वनितोत्सवरूपशीलम् अरविन्दलोचनं कृष्णं निरीक्ष्य,तत् वेणुरवं च आकर्ण्य,विमानगतयः देवाङ्गनाः अपि मुमुहुः। यतः तासां केशभरः भ्रश्यत् प्रसूनः आसीत्। नीवीबन्धः अपि विस्रंसितः ' इति। अन्या 'सखि! एते तरुशाखावलम्बिनः विहगाः प्रायशः मुनयः भवेयुः, यतः एते नन्दनन्दनस्य कलवेणुगीतम् आकर्ण्य निमीलितलोचनाः विगत-अन्यवाचः

बभूवुः ' इति। एवं बृन्दावनचारिणः भगवतः क्रीडाः वर्णयन्त्यः गोपकुमार्यः तन्मयतां प्रापुः। एवम् अहर्दिवं शरदि विचित्रवेषैः कलमधुरैः वेणुगीतैश्च स्मरतापम् उपबृंहयन् बृन्दावने गाः चारयति नन्दनन्दने हेमन्तः प्रावर्तत।

**स्वावलोकनप्रश्नाः**

१.व्रजकुमार्यः कीदृशाः ?

२.केषाम् एव अक्षिसाफल्यं भवति ?

३.दामोदर-अधरसुधां भुङ्क्ते - कः ?

४.तरवः किमर्थं धन्याः?

### ६.३.२.नन्दव्रजकुमारिकाणां कात्यायन्याः अर्चनम् :-

**(मूलम्)** ७१.तत्र प्रथमे मासि नन्दव्रजकुमारिकाः हविष्यं भुञ्जानाः कत्यायनीव्रतं चेरुः। प्रत्यहम् उषसि समुत्थाय अन्योन्य- आबद्ध-बाहवः कृष्णचरितम् उच्चैः गायन्त्यः कालिन्दीं स्नातुं ययुः। निर्वर्तित-स्नान-कृत्याः जलान्तिके सैकतीं कात्यायनी-प्रतिकृतिं कृत्वा अरूणोदये-

**कात्यायनि! महामाये! महायोगिनि! अधीश्वरि! ।**
**नन्दगोपसुतं देवि! पतिं मे कुरु ते नमः।।इति**

मन्त्रं जपन्त्यः उच्चावचैः धूप-दीप-नैवेद्यैः भगवतीं कात्यायनीम् आनर्चुः।

**(विवरणम्)**अयं वाक्यसमुदायः श्रीकृष्णं पतिं प्राप्तुं गोपाङ्गनानां व्रताचरणं वर्णयति।तत्र हेमन्ततौ प्रथमः मासः प्रवर्तते। नन्दव्रजे विद्यमानाः कुमारिकाः भगवतः निवेदितं खादन्तः कत्यायनीव्रतं आचरन्ति। प्रतिदिनम् उषःकाले समुत्तिष्ठन्ति। अन्योन्यं बाहून् आबध्नन्ति। कृष्णचरितम् उच्चैः गायन्ति। कालिन्दीं स्नातुं यान्ति। स्नानं समापयन्ति। अनन्तरं जलस्य अन्तः एव ते सैकतीं कात्यायनी देव्याः प्रतिकृतिं कुर्वन्ति। सूर्यस्य उदयकाले अञ्जलिं बध्वा -'महामायारूपिणि,महायोगप्रदायिनि महामातः हे कात्यायनी देवि, नन्दसुतं मम पतिं कुरु । अहम् आजीवितान्तं कृतज्ञः भवेयम् ,तुभ्यं नमः'इत्येवमर्थकं मन्त्रं जपन्ति। धूप-दीप-नैवेद्यानि समर्पयन्ति। श्रद्धया कात्यायिन्याः पूजाम् आचरन्ति।

**स्वावलोकनप्रश्नाः**

१.नन्दव्रजकुमारिकाः किं चेरुः ?

२.नन्दव्रजकुमारिकाः कालिन्दीं स्नातुं कथं ययुः ?

३.नन्दव्रजकुमारिकाःकिं मन्त्रं जपन्ति ?

## ६.३.२.१.गोपिकावस्त्रापहरणम् :-

**(मूलम्)** ७२.एवम् अन्वहं व्रतम् आचरन्त्यः ताः कदाचित् यथापूर्वं वासांसि तीरे निक्षिप्य,कृष्णं गायन्त्यः कालिन्दी- जले विजह्रः।महायोगीश्वर-ईश्वरो भगवान् तत् विज्ञाय तत् कर्मफलदानाय वयस्यैः परिवृतः तत्र गत्वा,गृहीत - तद्वसनः सत्वरं नीपम् आरुह्य गोपबालैः सह प्रहसन् ' हे अबलाः ! एकैकशः मिलित्वा वा, अत्र आगत्य,स्व-स्व- वसनानि गृह्णीत। न अयं परिहासः यतः यूयं व्रतकर्शिताः,सत्यम् अहं ब्रवीमि। न अहं कदा अपि अनृतम् अवदम्। तत् एते बालकाः विदुः'इति अवोचत्।तत् परिहासवचः निशम्य स्नेहपरिप्लुताः सव्रीडाः अन्योन्यम् अवलोकयन्त्यः जातहासाः व्रजकुमारिकाः आकण्ठजलमग्नाः प्रवेपमानगात्रयष्टयः भगवन्तम् एवम् ऊचुः-'श्यामसुन्दर !अनयं मा कुरु।जानीमः वयं त्वाव्रजश्लाघ्यं नन्दराजसुतम्,वयं ते दास्यः।त्वत् नियोगं करवाम।प्रकम्पिताः वयं शीतलेन।देहि नः वासांसि। नो चेत् राज्ञे निवेदयिष्यामः' इति।ततः नन्दनन्दनः 'यदि सत्यं यूयं मे दास्यः मदुक्तं च करिष्यथ, इह आगत्य स्वस्ववसनानि गृह्णीत। नो चेत् अहं न दास्यामि। निवेदितः अपि वृद्धः राजा किं करिष्यति' इति उवाच। ततः सर्वाः अपि व्रजदारिकाः पाणिभ्यां योनीः आच्छाद्य शीताधिक्येन प्रकम्पमानाः जलाशयात् उत्तेरुः।ताः वीक्ष्य भगवान् 'धृतव्रताः यूयं विवसनाः मज्जनम् अकार्षुः।अतः तत् अंहसः निवृत्तये शिरो-निहित-अञ्जलिपुटाः नमस्कृत्य वसनानि गृह्णीत'इति अब्रवीत्। अथ धर्मयुक्तं भगवतः वचनम् आकर्ण्य गुह्याङ्गम् एकेन पाणिना आच्छाद्य अन्येन प्रणेमुः। भूयः भगवान् एवम् उवाच-'यः एकेन पाणिना अच्युतं प्रणमेत् तस्य करच्छेदः दण्डः इति धर्मविदः वदन्ति। अतः पापद्वयम् इदम् अपमार्जयितुं यदि इच्छथ,तदा पाणियुगलेन प्रणम्य,वासांसि गृह्णीत' इति। एवम् अच्युतेन अभिहितम् आकर्ण्य व्रजाङ्गनाः विवस्त्रप्लवनं व्रतच्युतिहेतुं मत्वा, व्रतपूर्तिकामाः सर्वपापहरं सर्वकर्मफलप्रदं, भगवन्तं यथाविधि नमश्चक्रुः। ततः गृहीतवसनाः ताः तदा भगवता दृढविप्रलब्धाः हापितत्रपाः अपि क्रीड नवत् कारिताः अपि तत्-सङ्गनिर्वृताःसत्यः तं न अभ्यसूयन्।परिधायापि वासांसि तेन गृहीतचित्ता लज्जायत-

ईक्षणाः ततः न उच्चेलुः। स्व-पाद-स्पर्शकाम्यया धृतव्रतानां तासाम् आशयं विज्ञाय भगवान् एवम् अवादीत् -'हे साध्व्यः !भवतीनां सङ्कल्पः त्रपया अकथितः अपि मया विदितः। यम् उद्दिश्य इदं कात्यायनी-व्रतम् आचेरुः तत् फलं प्राप्स्यथ। मया अनुमोदितः असौ सत्यं भवितुम् अर्हति। यथा भर्जिताः अपक्वाः वा यवादयः अङ्कुरोत्पादनाय न प्रभवन्ति,एवं मयि आवेशितचेतसां कामः पुनः कामप्ररोहाय न प्रभवति। सिद्धव्रतफलाः व्रजं याथ। काश्चित् क्षपाः मया रंस्येथे' इति। एवं भगवता आदिष्टाः लब्धकामाः व्रजकुमारिकाः तत् पदाम्भोजं ध्यायन्त्यः कथञ्चित् व्रजं विविशुः।

**(विवरणम्)** अयं वाक्यसमुदायः श्रीकृष्णः गोपाङ्गनानां व्रताचरणस्य फलप्रदानं वर्णयति। एकस्मिन् दिने व्रजवासिनः गोपिकाः वस्त्राणि तीरे निक्षिपन्ति। कृष्णस्य चरितं गायन्ति। स्नानं कुर्वन्ति। भगवान् श्रीकृष्णः एतत् विजानाति। कात्यायनीव्रतस्य फलप्रदानाय अनुचरैः सह कालिन्दीतीरं गच्छति। गोपिकानां वस्त्राणि गृह्णाति। नीपवृक्षम् आरोहति। गोपबालैः सह प्रहसन्'हे अवलाः! एकैकशः वा, मिलित्वा वा अत्र आगत्य स्व-स्व-वस्त्राणि गृह्णन्तु। अयं न परिहासः। यूयं व्रतेन कर्शिताः भवथ। अतः सत्यम् अहं ब्रवीमि'इति वदति। श्रीकृष्णस्य परिहासवचांसि शृण्वन्ति। भगवन्तम् 'हे श्याम सुन्दर! एवं मा कुरू। तव महत्तां वयं जानीमः।वयं ते दास्यः। वयं शीतेन प्रकम्पिताः स्मः। अस्माकं वासांसि ददातु।नो चेत् राज्ञे निवेदयिष्यामः' इति विज्ञापयन्ति।श्रीकृष्णः'यदि यूयं मे दास्यः मदुक्तं करिष्यथ। इह आगत्य स्ववस्त्राणि गृह्णन्तु। नो चेत् अहं न दास्यामि । निवेदितः अपि वृद्धः राजा किं करोति'इति गोपिकानां मनस्सु आन्दोलनम् अधिकं करोति।

ततः सर्वाः गोपदारिकाः पाणिभ्यां योनीः आच्छादयन्ति । शीताधिक्येन प्रकम्पन्ते। जलाशयात् तीरम् आगच्छन्ति। श्रीकृष्णः गोपिकाः पश्यति ,ताः - ' यूयं कात्यायनीव्रतं कुर्वन्ति।तदनादृत्य, अपि वस्त्ररहिताः स्नानं कुर्वन्ति। अतः तत्-पापनिवारणाय कराभ्यां नमस्कुर्वन्तु, वस्त्राणि स्वीकुर्वन्तु' इति विज्ञापयति।

गोपिकाः श्रीकृष्णस्य वचः शृण्वन्ति। नग्नस्नानाचरणम् अपराध इव भावयन्ति। श्रीकृष्णस्य वचः धर्मेण युक्तम् इव इति गोपिकानां भासते। भगवतः वाक्यं स्वीकुर्वन्ति। गोपिकाः एकेन हस्तेन गुह्याङ्गम् आच्छादयन्ति।अन्येन हस्तेन भगवन्तं प्रणमन्ति। तेनापि असन्तृप्तः श्रीकृष्णः पुनः गोपिकाः 'यः एकेन पाणिना अच्युतं नमेत् तंस्य करच्छेदो दण्डः इति धर्मविदो वदन्ति। अतः पापद्वयं सम्भवति। अतः पाणियुगलेन प्रणमन्तु वस्त्राणि स्वीकरोतु' इति बोधयति।

श्रीकृष्णस्य वचांसि शृण्वन्ति। व्रजाङ्गनाः नग्नस्नानाचरणम् अपराध इव भावयन्ति। व्रतस्य सम्पूर्णफलम् आप्तुम् इच्छन्त्यः गोपिकाः सर्वपापहरं सर्वकर्मफलप्रदं भगवन्तं यथाविधि श्रीकृष्णं नमस्कुर्वन्ति।ततः वस्त्राणि गृह्णन्ति।वासांसि आच्छादयन्ति। तथापि श्रीकृष्णेण आकृष्टाः ते लज्जया तत्प्रदेशात् न चलन्ति।श्रीकृष्णश्च गोपिकानाम् आशयं विजानाति।भगवान् 'हे साध्व्यः! भवतीनां सङ्कल्पः मया विदितः।यम् उद्दिश्य इदं कात्याय नीव्रतम् आरब्धं तत्फलं प्राप्स्यथ। मयि आवेशितचेतसां कामः पुनः कामप्ररोहाय न प्रभवति। सिद्ध-व्रतफलाः व्रजं याथ । काश्चित् रात्र्यः मया रंस्यथ' इति व्रतफलं प्रकटयति।एवं भगवता समादिष्टाः लब्धकामाः व्रजकुमारिकाः श्रीकृष्णं ध्यायन्त्यः व्रजं गच्छन्ति।

**स्वावलोकनप्रश्नाः**

१.भगवान् किमर्थंगोपिकानां वासांसि गृहीतवान् ?

२.भगवान् गोपिकाः किम् अवोचत् ?

३.व्रजकुमारिकाः भगवन्तम् किम् ऊचुः ?

४.नन्दनन्दनः किम् उवाच ?

५.जलाशयात् उत्तीर्णान् गोपिकाः वीक्ष्य भगवान् किम् अब्रवीत् ?

६.कस्य 'करच्छेदः दण्डः' इति धर्मविदः वदन्ति ?

७.धृतव्रतानाम् आशयं विज्ञाय भगवान् किम् अवादीत् ?

८.लब्धकामाः व्रजकुमारिकाः कथं व्रजं विविशुः ?

## ६.३.३.विप्रभार्याणाम् अनुग्रहणम् :-

**(मूलम्)** ७३.ततः देवकीसूनुः अग्रजेन गोपालैः सह गाः चारयन् एकदा बृन्दावनात् सुदूरं जगाम। निदाघ-आतप - तप्ताः पिपासिताः गाः पाययितुं फलभर-नम्र-शाखानां शाखिनाम् अन्तरतः कालिन्दीं गत्वा, तत्र स्वादुतरं शीतलं जलं पाययित्वा स्वयं च अपः पीत्वा तदुपवने

गोपकुमारैः सह गाः अचारयत्।ततः यमुनातटे समुपविष्टौ रामकृष्णौ उपेत्य, क्षुधार्ताः गोपबालकाःक्षुत्-शान्तिं ययाचिरे।स्वभक्तां विप्रभार्याम् अनुजिघृक्षुः भगवान् एवम् आह- 'अत्र अनतिदूरे ब्रह्मवादिनः ब्राह्मणाः अङ्गिरसं सत्रम् अनुतिष्ठन्ति।तत्र गत्वा भगवतः अग्रजस्य मम च आख्याम् आख्याय ओदनं याचध्वम् ' इति। तदा भगवता आज्ञाप्ताः गोपालाः देवयजनम् उपगम्य, ब्रह्मवादिनः विप्रान् दण्डवत् प्रणम्य,कृत-अञ्जलयः 'हे विप्राः! संकर्षण-वासुदेवौ अनतिदूरे गाः चारयन्तौ बुभुक्षितौ आस्ताम्। तयोः आदेशात् वयम् इह प्राप्ताः। ओदन-अर्थिनोः तयोः ओदनं दत्त। अग्नीषोमीय-पश्वालम्भन-अनन्दरं दीक्षितस्य अपि अन्नं न दुष्यति' इति अब्रुवन्। तद् आकर्ण्य वृद्धमानिनः बालिशाः साक्षात् यज्ञमयं वासुदेवं मर्त्यदृष्ट्या मानुषं गोपालकं मत्वा परस्परमुखानि आलोकयन्तः'आम्'इति वा'न वा' इति वा न ऊचुः।अतः निराशाः गोपाः प्रतिनिवृत्य भगवन्तं व्यजिज्ञिपन्। अथ नन्दनन्दनः प्रहस्य पुनः गत्वा आवयोःनाम विश्राव्य तत्पत्नीः ओदनं याचध्वम्।मत्-आवेशित-चित्त-वृत्तयः ताः पर्याप्तं स्वादु अन्नं प्रयच्छन्ति इति व्याजहार। एवम् आदिष्टाः ते भूयः पर्णशालां गत्वा तत्र उपविष्टाः स्वलंकृताः ताः प्रणम्य,कृताञ्जलयः सविनयं भगवत् आदेशं न्यवेदयन्।तत् श्रुत्वा तत् -कथा-आक्षिप्त-मनसः तत्-दर्शन- उत्सुःका द्विजपत्न्यः चतुर्विधं स्वादुतरं प्रभूतम् अन्नं भाजनैः गृहीत्वा कृष्ण-दिदृक्षया पतिभिः पितृपुत्रादिभिः प्रतिषिध्यमानाः अपि अविगणय्य, प्रस्थित- अशोक-नव-पल्लव-मण्डिते, यमुनोपवने विचरन्तं गोपपरिवृतं साग्रजं वनमाला -विभूषितं घनश्यामं पीताम्बरं देवकीनन्दनम् अद्राक्षुः। विश्रुतचारित्रे भगवति आवेशित-अन्तःकरणाः ताः भगवन्तं साक्षात्कृत्य, तत्-अदर्शनजं तापं विजहुः।

**(विवरणम्)** अयं वाक्यसमुदायः श्रीकृष्णः विप्राणां भार्याः अनुगृह्णाति इति अंशं वर्णयति। एकदा सरामः श्रीकृष्णः गोपालैः सह गाः चारयन् बृन्दावनात् सुदूरं गच्छति। गाः पाययितुम् इच्छति। श्रीकृष्णः कालिन्दीं गच्छति।तत्र गाः पाययति। स्वयं जलं पिबति। गोपकुमारैः सह विहरन् , गाः चारयति। राम-कृष्णौ यमुनातटे उपविशतः। क्षुधार्ताः गोपबालकाः खादितुं यत्किमपि आहारं याचन्ति।श्रीकृष्णः'अत्र समीपे ब्रह्मवादिनः ब्राह्मणाः आङ्गिरसं सत्रं कुर्वन्ति। तत्र भवन्तः गच्छन्तु मम नाम ,बलरामस्य नाम च कथयन्तु, आहारं याचन्तु' इति सूचयति। गोपबालकाः यागशालां गच्छन्ति। विप्रान् प्रणमन्ति। अञ्जलिं बद्ध्वा 'हे विप्राः! अनति दूरे एव राम-कृष्णौ गाः चारयन्तौ स्तः। तौ बुभुक्षितौ वर्तेते। तयोः वचनात् वयम् इह आगताः। तयोः आहारं ददातु 'इति याचन्ति। वृद्धमानिनः गोपबालकानां याचनां शृण्वन्ति। यज्ञमयं वासुदेवं, मानुषं गोपबालकं मत्वा परस्परं मुखानि अवलोक यन्ति,आम् इति वा,न इति वा, प्रत्युत्तरं न दास्यन्ति। निराशाः गोपाः प्रतिनिवर्तन्ते। ते ब्रह्मविदां तूष्णीभावंकृष्णाय आवेदयन्ति

च। श्रीकृष्णः प्रहस्य पुनः गत्वा ' आवयोः नाम स्पष्टं श्रावयतु, मुनिपत्नीःआहारं याचध्वम्। ताः पर्याप्तं स्वाद्वन्नं दास्यन्ति 'इति गोपान् सन्त्वयति।

एवं सान्त्विताः गोपाः यागशालां गच्छन्ति। ऋषिपत्नीः नमस्कुर्वन्ति। भगवतः आहाराय, ऋषिपत्निभ्यः निवेदयन्ति।तत् आकर्ण्य ऋषिपत्न्यः चतुर्विधं भोजनं भाजनैः गृह्णन्ति। कृष्णदिदृक्षया पितृ-पति-पुत्रादिभिः प्रतिषिद्ध्यमानाः अपि यमुनाप्रदेशं गच्छन्ति। साग्रजं पीताम्बरं देवकीनन्दम् पश्यन्ति।

**स्वावलोकनप्रश्नाः**

१.यमुनातटे रामकृष्णौ उपेत्य, गोपबालकाः किं ययाचिरे ?

२.भगवान् स्वभक्तां विप्रभार्याम् अनुजिघृक्षुः किम् आह ?

३.गोपालाः देवयजनम् उपगम्य, ब्रह्मवादिनः विप्रान् किम् अब्रुवन्?

४.वृद्धमानिनः किं चक्रुः?

५.नन्दनन्दनः प्रहस्य पुनः किं व्याजहार ?

६.द्विजपत्न्यः किम् अकार्षुः ?

७.ताः(द्विजपत्न्यः) कीदृशाः ? ताः किम् विजहुः?

## ६.३.३.१.विप्रभार्याणां श्रीकृष्णस्य सन्देशनम् :-

**(मूलम्)** ७४.तथा त्यक्तसर्वाशाःआत्मदिदृक्षया प्राप्ताः ताः विज्ञाय अखिलदृक् भगवान् ईषत् प्रसित-आननाः ताः एवम् उवाच -'हे महाभागाः ! स्वागतं वः, इतः आस्यताम्। यत् अस्मत् दिदृक्षया समागताः,तत् एतत् उपपन्नम्। स्व- अर्थ-दर्शिनः विवेकिनःफलाभिसन्धि-रहिताम् आत्मनि प्रिये मयि परां भक्तिं कुर्वते हि।न खलु आत्मनः अन्यः प्रेष्ठः लोके अस्ति। आत्मनः सम्पर्कात् एव हि दारा-पुत्र-धनादयः प्रियतमाः भवन्ति। कृतार्थाः भवत्यः। देवयजनं यात। यतः वः पतयः गृहमेधिनः द्विजातयः युष्माभिः आरब्धं सत्रं समापयिष्यन्ति' इति। ततः द्विजपत्न्यः 'भगवन्! मा एवं वक्तुम् अर्हसि।मद्भक्तः न एव नश्यति इति भवदीयं वचः, अत्मदर्शिनः

न पुनः आवर्तन्ते इति नैगमं वा वचनंसत्यं कुरु।पितृ–पति–पुत्रादीनां वचांसि समुल्लङ्घ्य त्वत्–पादमूलम् उपागताः अस्मान् न भूयः ते गृह्णीयुः' इतिअब्रुवन्।तदा भगवान् एवम् आह––'मया अनुज्ञाताः भवदीयाः पतयः पितृ–भ्रातृ– सुतादयः लोकः वा न अभ्य सूयेरन्। नृणाम् इव मद्भक्तानां सन्निकर्षः सुखाय स्नेहवृद्धये वा न भवति। ततः मनः मयि निधाय, अचिरात् मां प्रप्स्यथ। यथा श्रवण–घ्यान–अनुकीर्तनैः मयि भावः निबध्येत न तथा सन्निकर्षेण।अतः प्रतियात' इति।

**(विवरणम्)** अयं वाक्यसमुदायः श्रीकृष्णः अपवादतः विप्रस्त्रीणाम् अभयं उपदिशति इति अंशं वर्णयति।विप्रवनिताः,सर्वाः आशाः परित्यजन्ति। आत्म(श्रीकृष्ण)दिदृक्षया समागच्छन्ति। भगवान् ताः पश्यति। ईषत् विहसति। 'हे महाभागाः! वः स्वागतम्। इतः उपविशन्तु। मां द्रष्टुं आगताः। विवेकिनः फल–अभिसन्धि–रहितां मयि परां भक्तिं कुर्वते हि। कृतार्थाः भवत्यः। देवयजनं गच्छन्तु। युष्माकं पतयः युष्माभिः आरब्धं सत्रं समापयिष्यन्ति' इति वदति।

विप्राणां पत्न्यः 'भगवन्! मद्भक्तः नैव नश्यति इति वदसि खलु।आत्मदर्शिनः न पुनः आवर्तन्ते इति वेद वचनं सत्यं कुरु।पितृ–पति–पुत्रादीनां वचांसि समुल्लङ्घ्य वयं त्वत्–पादमूलम् उपगताः। ते अस्मान् न गृह्णीयुः' इति श्रीकृष्णं विज्ञापयन्ति। 'मया अनुज्ञाताः भवदीयाः पतयः पितृ–भ्रातृ–सुतादयः, लोकाः, वा न अभ्यसूयन्ते । मनः मयि निधाय अचिरात् एव मां प्राप्स्यन्ति ' इति भगवान् सान्त्वयति।

**स्वावलोकनप्रश्नाः**

१.आत्मदिदृक्षया प्राप्ताः ताः द्विजपत्नीः भगवान् किम् उवाच ?

२.द्विजपत्न्यः भगवन्तं किम् अब्रुवन् ?

३.भगवान् पुनः द्विजपत्नीः किम् आह ?

## ६.३.३.२.अच्युतस्य रमणम् :-

**(मूलम्)** ७५.एवं भगवता प्रतिबोधिताः ताः पुनः देवयजनम् अगुः। द्विजाः अपि तासु अदोषदृष्टयः ताभिः सत्रं परि समापयामासुः। तासु एका भर्त्रा विदृता सती मनसा देवकीसुतं ध्यात्वा,कर्मानुबद्धं देहं विसृज्य भगवत्–सन्निधिं प्राप। भगवान् अपि देवकीसुतः तदानीं तं चतुर्विधम् अन्नं गोपालान् आशयित्वा स्वयम् अपि साग्रजः बुभुजे। एवं लीलावपुः अच्युतः रूप–वाक्–कर्मभिः मर्त्यलोकम् अनुकुर्वन् गो–गोप–गोपीभिः रेमे।

**(विवरणम्)** श्रीकृष्णः विप्रस्त्रीभिः आनीतं यज्ञ-अन्नं गोप-गोपीभिः सविनोदं भुङ्क्ते इति अंशं वर्णयति अयं वाक्यसमुदायः। एवं भगवता प्रतिबोधिताः विप्रवनिताः पुनः देवयजनं गच्छन्ति। द्विजाः अपि तासु अकुपिताः सत्रं परिसमापयन्ति। तासु एका भर्त्रा विदृता भवति। मनसा देवकीसुतं ध्यायति। कर्मानुबद्धं देहं विसृजति। भगवत्-सन्निधिं प्राप्नोति। एवं श्रीकृष्णः, संपादितम् अन्नं गोपालान् आशयित्वा, स्वयम् अपि साग्रजः खादति।

| |
|---|
| **स्वावलोकनप्रश्नाः** |
| १.द्विजाः कीदृशाः सन्तः सत्रं पत्नीभिः परिसमापयामासुः ? |
| २.देवकीसुतः गोपालान् कतिविधम् अन्नम् आशितवान् ? |
| ३.लीलावपुः अच्युतः कथं रेमे ? |

**६.३.३.३.विप्राणां पश्चात्तपनम् :-**

**(मूलम्)** ७६.तदनु द्विजातयः स्व-अपराधं स्त्रीणाम् अलौकिकीं भगवद्भक्तिं च अनुस्मृत्य नितराम् अनुतापं सम्प्रापुः। नूनं भगवत्-माया योगिनाम् अपि मोहिनी।यतः वयं बहुश्रुताः अपि नृणां गुरवः अपि विमूढाः अभवाम। असंस्कृता नाम् अनभ्यस्त-विद्यानाम् आत्म-मीमांसा-रहितानाम् अशौचानाम् अपि नारीणां जगद्गुरौ श्रीकृष्णे दृढा भक्तिः आसीत्। बहुश्रुताम् अपि न अस्माकम्। स्व-अर्थ-विमूढान् प्रमत्तान् अस्मान् भगवान् गोपवाक्यैः प्राबोधयत्। अन्यथा पूर्णकामस्य सर्वेश्वरस्य श्रियः पतेः किम् अस्माभिः प्रयोजनम्?विडम्बना एव केवलम् इयं याचना। यद्यपि वयं साक्षात् योगीश्वरः भगवान् विष्णुः यदुषु अवततार इति शृण्मः,अथापि अन्तिक-आगतं यदुनन्दनम् अज्ञानिनः पण्डितम्मन्याः वयं न विद्मः इति एवं बहुधा अनुतप्य-

**'नमः तुभ्यं भगवते कृष्णाय अकुण्ठमेधसे ।**
**यत् मायामोहितधियः भ्रमामः कर्मवर्त्मसु ।।**

सः वै न आद्यः पुरुषः स्व-माया-मोहित-आत्मनाम् ।अविज्ञात-अनुभावानां क्षन्तुम् अर्हसि अतिक्रमम्।। 'इति स्व-अपराधस्य क्षमाम् अर्पयित्वा,तत्-दर्शन-काङ्क्षिणः अपि, कंसभयात् चलितुं न प्राभवन्। किन्तु स्व-आश्रमस्थाः एव भगवन्तं मनसा अभजन्त।

**(विवरणम्)** अयं वाक्यसमुदायः आचरणात्मकभक्तेः अभावाय विप्राः पश्चत्तापम् अनुभवन्ति इति अंशं वर्णयति। विप्राः स्व-अपराधम्, स्त्रीणां अलौकिकीं भक्तिं च जानन्ति। नितरां पश्चात्तप्ताः भवन्ति। 'भगवन्माया योगिनाम् अपि मोहिनी। वयं बहुश्रुताः, नृणां गुरवः,

तथापि विमूढाः भवामः। असंस्कृतानां, अनभ्यस्तविद्यानां, आत्ममीमांसारहितानां नारीणाम् अपि जगद्गुरौ कृष्णे दृढा भक्तिः वर्तते। बहुश्रुतानाम् अपि अस्माकं न सञ्जातम्। वयं 'योगीश्वरः भगवान् विष्णुः यदुषु अववतार' इति श्रुणुमः ।परं समीपम् आगतं पण्डितम्मन्यमानाः वयं न विद्मः' इति बहुधा अनुतापं प्राप्ताः सन्तः कृष्णम् एवं स्तुवन्ति -भगवन् ,भवान् अवक्रबुद्धि-विक्रमः, सदा वयं भवतः विधेयाः भवामः। बहुप्रतिभासम्पनानाः अपि कर्मसु भ्रमाम् एव प्राप्नुमः। स्व-माया-मोहित-आत्मनः,अविज्ञात-अनुभावान् अस्मान् क्षन्तुम् अर्हसि एवं स्तुवन्ति। स्व-अपराधस्य क्षमाम् प्रार्थयन्ति।

**स्वावलोकनप्रश्नाः**

१.द्विजाः कथम् अनुतापं सम्प्रापुः ?

२.द्विजाः कथं क्षमाम् अर्पितवन्तः ?

३.तत्(भगवत्)दर्शन-काङ्क्षिणः अपि, किमर्थं न प्राभवन् ?

४.द्विजाः भगवन्तं कथम् अभजन्त ?

## ६.३.४.इन्द्रस्य गर्वभङ्गाय सङ्कल्पनम् :-

**(मूलम्)** ७७.भगवान् अपि बलभद्रेण सह तत्र एव वसन् इन्द्र-याग-उद्यतान् आगतान् नन्दादीन् अपश्यत्।सर्वसाक्षी सर्वज्ञः भगवान् तम् उद्यमं विदित्वा अपि अविदितः इव स्वपितरं नन्दम् अपृच्छत् 'हे तात! कः अयं वः सम्भ्रमः? कम् उद्दिश्य अयं यागः निर्वर्त्यते ? कानि तत् साधनानि ? किं तत् फलम् ? यद्यपि ज्ञात्वा अज्ञात्वा वा कर्माणि कुर्वते,तथापि विदुषः यथा कर्मफलसिद्धिः, न तथा अविदुषः। अतः जिज्ञासमानस्य मे निवेदयतु' इति। ततः नन्दः प्राह--'भगवान् इन्द्रः एव पर्जन्यः।तत्- आत्ममूर्तयः मेघाः।ते तु सर्व-प्राणि-सञ्जीवनं पयः अभिवर्षन्ति। अतः तत् सिद्धैःएव द्रव्यैः पयो-दातारम् इन्द्रं यजन्ते नराः।सः अयं पारम्पर्य-आगतः धर्मः। यः परम्परागतम् एवं मोहात् विसृ जेत् सः किल्बिषम् आप्नुयात्।मङ्गलं च न प्राप्नोति इति। तत् आकर्ण्य 'भगवान्! शतक्रतोः मन्युम् उत्पाद्य, तत् -दर्पम् अपजिहीर्षुः स्वभाववादम् अवलम्ब्य आह -'सर्वः अपि जन्तुः कर्मणा एव उत्पत्ति-स्थिति-लयान् अवाप्नोति। सुख-दुःखे, भय-अभये च तेन एव लभते।न कश्चित् ईश्वरः अस्ति।यदि अन्यः कर्मफलप्रदः कर्मलिप्ता ईश्वरःनाम कश्चित् अस्ति, सः अपि कर्तारम् अन्यम् अपेक्षते।सः अपि अन्यम् इति

अनवस्था प्रसक्तिः।यदि ब्रह्मादि–स्तम्बपर्यन्तःजीवराशिः कर्मपरतन्त्रःतदा कर्मणा एव फलसिद्धेः, किम् अजा–गल–स्तन–तुल्येन ईश्वरेण? कर्म अपि अन्तर्यामि –रूपेण न देवताम् अपेक्षते, स्वभावतःएव तत् प्रवृत्तेः। अतः स्वभावविहितं कर्म अन्यथा कर्तुम् अनीशेन इन्द्रेण किं प्रयोजनम्? कर्म एव दैवतम्। गोवृत्तयः वयम्। न अस्माकं ग्रामाः जनपदाः वा सन्ति।नित्यं वन–शैल – निवासिनः वयम्।अतः सम्भृतसम्भारैः गवां ब्राह्मणानाम् अद्रेश्च मखे अनुष्ठीयताम्। ब्रह्मवादिनः ब्राह्मणान् मृष्टान्नदानेन धेनु –दक्षिणादिभिः च अर्चयत।अन्याम् अपि अन्नार्थिनःयथार्हं भोजयत।तृणदानेन गाःपूजयत।अद्रेः बलिं दत्त। तदनु भुक्ताः सर्वे अपि व्रजौकसः शुद्धवसनाः स्वलङ्कृताः स्वनुलिप्ताः च गवां ब्राह्मणानाम् अद्रेः अनलस्य च प्रदक्षिणं कुरुत।स्वभावतः एव रजोगुणसमुत्पादितः जलदःजलम् अभिवर्षति।गो– ब्राह्मणादीनां मम च प्रियतमः अयं मखः। यदि भवते रोचते तर्हि तथा अनुतिष्ठतु तात !'इति। तत् आकर्ण्य नन्दादयः गोपवृद्धाः भगवत् उक्तं साधु गृहीत्वा तत्–उक्तरीत्या एव मखं निर्वर्त्य,गोधनानि पुरस्कृत्य,गोवर्धनाद्रेः प्रदक्षिणं चक्रुः। गोपाङ्गनाःअपि अनडुहत्–शकटान् आरुह्य कृष्णवीर्याणि गायन्तः अनुसस्रुः। कृतप्रदक्षिणाः सर्वे ते गोवर्धनाद्रिं नमस्कृत्य वासुदेवेन सह व्रजं विविशुः।

**(विवरणम्)** अयं वाक्यसमुदायः श्रीकृष्णः इन्द्रस्य दुरभिमानं दूरीकर्तुं सङ्कल्पते, इति अंशं वर्णयति। राम–कृष्णौ बृन्दावने गोपबालकैः सह सविनोदं कालं यापयन्तौ स्तः। एवं स्थिते कदाचित् इन्द्रस्य सन्तृप्त्यै, इन्द्रयागस्य अनुष्ठानाय संनाहः प्रचलति। नन्दादयः वृद्धाः समागच्छन्ति। श्रीकृष्णः इन्द्रयागस्य वैशिष्ट्यं जानाति,तथापि, अविदितः इव श्रीकृष्णः, स्वपितरम् 'तात कोयं संभ्रमः। कमुद्दिश्य यागः क्रियते। कानि साधनानि किं तस्य फलम्' इति पृच्छति। नन्दः अपि बालकृष्णम् 'भगवान् इन्द्रः एव पर्जन्यः। तदात्ममूर्तयः मेघाः। मेघाः सर्वप्राणिभ्यः जलं अभिवर्षन्ति। अतः तत्सिद्धैः एव द्रव्यैः जलदातारम् इन्द्रं नराः पूजयन्ति। अयं परम्परागतः आचारः। यःपरम्परागतम् एनम् अज्ञानात् विसृजेत् सः पापं प्राप्नुयात्। मङ्गलं च न प्राप्नोति' इति कथयति।

तत् आकर्ण्य कृष्णः शतक्रतोः उइन्द्रस्य ,कोपम् उत्पाद्य तस्य अहङ्कारं अपहर्तुम् इच्छति। स्वभाववादम् प्रबोधयति। 'सर्वः अपि जन्तुः कर्मणा एव उत्पत्ति–स्थिति–लयान् प्राप्नोति। कर्मणा एव सुख–दुःखे लभ्येते। भय– अभये च लभ्येते। कर्मातिरिक्ततया ईश्वरः नास्ति। यदि अन्यः कर्मफलप्रदः कर्मलिप्ता वा ईश्वरः अस्ति इति अङ्गीक्रियते सः अपि अन्यं कर्तारं, सः अपि अन्यं कर्तारम् इति अनवस्था दोषः सम्भवति। यदि जीवराशिः कर्मपरतन्त्रः इति अङ्गीक्रियते तदा कर्मणा एव फलसिद्धेः अतिरिक्ततया ईश्वराङ्गीकारः व्यर्थः एव। कर्म एव दैवतम्। वयं गोवृत्तयः। अस्माकं जनपदाः ग्रामाः वा न सन्ति। वयं वनशैलवासिनः। अतः

गवां, ब्राह्मणानां, अद्रेश्च यागः अनुष्ठेयः। मृष्टान्नदानेन दक्षिणाभिः ब्राह्मणान् अर्चयामः। तृणदानेन गाः पूजयामः। बलिना अद्रिं पूजयामः। स्वभावतः एव रजोगुणसमुत्पादितः मेघः जलम् अभिवर्षीति' इति विपुलां चर्चां करोति।तत् आकर्ण्य नन्दादयः गोपवृद्धाः तथैव मखं समापयन्ति। गोधनैः साकं गोवर्धनस्य प्रदक्षिणं कुर्वन्ति।

**स्वावलोकनप्रश्नाः**

१.सर्वज्ञः भगवान् स्वपितरं नन्दं किम् अपृच्छत् ?

२.नन्दः सर्वज्ञं बालकृष्णं किं प्राह ?

३.पार्म्पर्यागतः धर्मः कः ?

४.कः किल्बिषम् आप्नुयात् ?

५.भगवान् स्वपितरं स्वभाववादं किमर्थम् आह ?

६.जन्तुः कर्मणा कान् कान् अवाप्नोति ?

७.कर्मपरतन्तः कः ?

८.ब्राह्मणान् कथम् अर्चयेत् ?

९.गाः कथं पूजयेत् ?

१०.जलदः जलं कथम् अभिवर्षीति ?

११.अयं मखः केषां केषां प्रियतमः ?

### ६.३.४.१.गोवर्धनपर्वतस्य उद्धरणम् :-

**(मूलम्)** ७८.एवं कृष्णाधिष्ठितैः नन्दादिभिः विहतायाम् आत्मनः पूजायां नितरां क्रुद्धःशतक्रतुः संवर्तकाख्यं मेघगणम् आहूय अवदत्-- 'एते व्रजौकसः नन्दादयः श्री-मद-अन्धाः बालिशं,वाचालं,स्तब्धं,पण्डितमानिनम् अज्ञं मर्त्यं कृष्णम्उपाश्रित्य अस्मान् तिरश्चक्रुः। अतः तेषां श्री-मदं पशुगण-क्षयेण हरत। अहम् अपि ऐरावतम् आरुह्य समरुद्गणैः अतिरयैः अनुसरामि' इति। इत्थं मघवता आज्ञप्ताः ते निर्मुक्त-बन्धनाः निरन्तर-आसारैः गोकुलं पीडयामासुः। अविरल-विद्युत्- वातवृष्ट्या जलौघ-परिप्लुतम् अदृष्ट-नत-उन्नत-भूमिभागं परितः समाकुलं गोकुलम् आसीत्। गावः निराहाराःशीत -अनिलेन वेपमानाः आचुक्रुशुः। आसार-पीडिताः गोपाः गोप्यः च शीतार्ताः वेपमानाः गोविन्द-पादमूलम् आगत्य शरणं ययुः। तदा भगवान् श्रीकृष्णः तत् एतत् कुपित-इन्द्रकृतं विज्ञाय आर्तत्राणपरायणः आर्तं गोपालकुलं परिपाल्य लोकेशमानिनः शतक्रतोः दर्पम् अपजिहीर्षुः एकेन करेण
अन्तिकस्थं गोवर्धनाद्रिं शिलीन्ध्रम् इव उत्पाट्य, छत्रम् इव धृत्वा गिरिपतनभयम् अपहाय निश्शङ्कम् इमं गिरगर्तं सगोधनाः प्रविशत' इति नन्दादीन् अवोचत्। तत् अनुभावविदः गोपाः गोप्यः च गोधनैः सह विमुक्तशङ्काः तत्र प्रविश्य यथावकाशं निरुपरोधम् अवात्सुः। सप्तवर्षदेशीयः भगवान् एवं सप्तदिनानि क्षुत्- तृड्-व्यथां सुखापेक्षां च हित्वा सविस्मयम् अनुगवीनैः अन्यैः वीक्ष्यमाणः गोवर्धनाद्रिम् अचलः दधार। विदित- कृष्ण- अनुभावः मघवा अतिविस्मितः विगतदर्पः मेघान् अवारयत्। निर्मेघम् आसीत् अम्बरतलम्। वातवर्षम् उपारतम्। प्रसेदुः दिशः। अंशुमान् उदियाय। गोपाः गोप्यः च तत् आदेशात् विगतत्रासाः स्वं स्वं गेहं सपरिकरा अयासिषुः भगवानपि लीलया तम् अद्रिं स्वस्थाने यथापूर्वं न्यवेशयत्।

**(विवरणम्)** अयं वाक्यसमुदायः श्रीकृष्णः गोवर्धनपर्वतं समुद्धरति, आश्रितान् रक्षति, इन्द्रस्य गर्वं भञ्जयति, इति एतान् अंशान् वर्णयति। इन्द्रः नन्देन सह श्रीकृष्णस्य सम्भाषणं (Discussion) अवगच्छति। नितरां क्रुद्धः भवति। संवर्ताख्यं मेघगणम् आह्वयति। 'नन्दादयः व्रजौकसः लक्ष्मी-मद-अन्धाः बालिशं वाचालं पण्डितम्मन्यं श्रीकृष्णम् उपाश्रित्य मां तिरस्कुर्वन्ति। अतः तेषां श्रीमदं पशुनाशेन हरन्तु।अहम् अपि ऐरावतम् आरुह्य मरुद्गणैः अनुसरामि' इति वदति। मेघगणाः निरन्त रासारैः गोकुलं पीडयन्ति।गावः निराहाराः, शीत-अनिलेन कम्पमानाः आक्रोशन्ति। वर्षेण पीडिताः गोपाः गोप्यश्च शीतार्ताः गोविन्दस्य पादमूलम् आगच्छन्ति। शरणं प्राप्नुवन्ति।

आर्तत्राणपरायणः श्रीकृष्णः गोपालकुलं परिपालयति। इन्द्रस्य अहङ्कारं परिहर्तुम् इच्छति। एकेन करेण समीपस्थं गोवर्धनं गिरिं शीलीन्द्रम् इव उत्पाटयति। तस्य छायायां सर्वेषां

रक्षणं कल्पयति। सप्तवर्षदेशीयः श्रीकृष्णः एवं सप्त दिनानि यावत् आहारनिद्रादिकं हित्वा गोवर्धनपर्वतं अचलः धरति।श्रीकृष्णस्य शक्तिं जानाति।मघवा दर्पं विजहाति। मेघान् वारयति। वर्षाभावात् दिशः प्रसीदन्ति। सूर्यश्च उदेति। गोपाः गोप्यश्च कृष्णस्य आदेशात् भयं त्यजन्ति, सपरिकरं स्व–स्व–गृहाणि गच्छन्ति। श्रीकृष्णः अपि गोवर्धनगिरिं पूर्वस्थाने स्थापयति च।

स्वावलोकनप्रश्नाः

१.शतक्रतुः कुतः क्रुद्धः ?

२.नन्दादयः कथम् अस्मान् तिरश्चक्रुः ?

३.शतक्रतुः संवर्तकाख्यं मेघगणं किम् अवदत् ?

४.गावः कथम् आचुक्रुशुः ?

५.गोपाः गोप्यः च किं चक्रुः ?

६.आर्तत्राण–परायणः किं कृतवान् ?

७.आर्तत्राण–परायणः नन्दादीन् कि अवोचत् ?

८.भगवान् गोवर्धनाद्रिं कथं दधार ?

९.मघवा किम् अकरोत् ?

१०.मेघानां निवारणेन वातावरणं कथं जातम् ?

११.भगवान् कियत् कालं गोवर्धनाद्रिं दधार ?

### ६.३.४.२.व्रजौकसाम् आनन्दातिरेकः - तेषां श्रीकृष्णाभिनन्दनम्

**(मूलम्)** ७९ अमानुषेण अत्यद्भुतेन तत्कर्मणा अतिविस्मिता व्रजौकसः प्राक्तनानि अपि पूतनावधादीनि अतिबाल्यचेष्टितानि संस्मरन्तः नन्दम् उपागम्य कृष्णतत्त्वम् अप्राक्षुः। सः अपि प्राक् गर्गमुखात् श्रुतम् अस्य नारायणसमत्वं तदनुभावं च आचचक्षे। ततः ते साक्षात् अयं नारायणांशसम्भूतः इति विदित्वा आनन्दातिरेकेण नन्दं श्रीकृष्णं च अर्चयित्वा ययुः।

(विवरणम्) अयं वाक्यसमुदायः श्रीकृष्णः गोवर्धनपर्वतं समुद्धरति, आश्रितान् रक्षति, व्रजौकसः अतिशयितम् आनन्दम् अनुभवन्ति, श्रीकृष्णम् अभिनन्दन्ति इति एतान् अंशान् वर्णयति। श्रीकृष्णः गोवर्धनपर्वतम् उद्धरति। सप्ताहं यावत् अनुचराणाम्, आश्रितानां च वासं कल्पयति। इदं मानवानाम् असाध्यम् कर्म। अत्यद्भुतं च, अनेन कर्मणा तत्कर्मणा व्रजौकसः अतिविस्मिताः भवन्ति। अस्मिन् एव सन्दर्भे प्राक्तनानि अपि पूतनायाः वधादीनि अतिबाल्यचेष्टितानि संस्मरन्ति। नन्दम् उपगच्छन्ति। कृष्णतत्त्वं पृच्छन्ति। नन्दः अपि, प्राक् गर्गमुखात् श्रुतम् अस्य नारायणसमत्वं तन्महिमां च कथयति। ततः ते साक्षात् अयं नारायणांशेन सम्भूतः इति जानन्ति। आनन्दातिरेकेण नन्दं श्रीकृष्णं च अर्चयन्ति। वृन्दावनं प्रयान्ति।

**स्वावलोकनप्रश्नाः**

१.'अमानुषेण अत्यद्भुतेन तत्कर्मणा...' किं तत्कर्म ?

२.श्रीकृष्णस्य नारायणसमत्वं कस्मात् श्रुतम् ?

### ६.३.४.३.इन्द्रस्य व्रीडनम् :-

**(मूलम्)** ८०.एवं शैलोद्धरणेन रक्षिते गोकुले सन्तुष्टा सुरभिः, गतदर्पः मघवा च यदुनन्दनं द्रष्टुम् आजग्मतुः। दृष्ट-श्रुत-तदनुभावः मघवा विविक्ते तम् उपागम्य सव्रीडः नष्ट-त्रिलोकेश-मदः शिरसा तं प्रणम्य कृताञ्जलिः एवम् अस्तुत -

**(विवरणम्)** अयं वाक्यसमुदायः श्रीकृष्णस्य गोवर्धन-उद्धरणं इन्द्रः लज्जितः भवति इति अंशं वर्णयति। सुरभिः नाम कामधेनुः। मघवा नाम इन्द्रः। कामधेनुः इन्द्रः च द्वौ अपि इतः पूर्वं श्रीकृष्णस्य महिमानं शृणुतः। इदानीम् अद्भुतं गोवर्धनोद्धरणं पश्यतः। श्रीकृष्णः गोवर्धनगिरिम् उद्धरति। गोकुलं च रक्षति। तदेतत् दृष्ट्वा कामधेनुः तुष्यति। इन्द्रः दर्पं जहाति। इन्द्रः अस्मिन् सन्दर्भे श्रीकृष्णम् अभिनन्दितुं कामधेनुना सह आगाच्छति। शिरसा तं प्रणमति। अञ्जलिं बध्नाति। एवं स्तौति। इन्द्रेण कृतं श्रीकृष्णस्य स्तोत्रम् ।

**(मूलम्)** ८१. नमस्तुभ्यं भगवते पुरुषाय महात्मने ।
वासुदेवाय कृष्णाय सात्वतां पतये नमः।।
स्व-च्छन्द-उपात्त-देहाय विशुद्ध-ज्ञान-मूर्तये ।
सर्वस्मै सर्व-बीजाय सर्वभूतात्मने नमः।।

**(विवरणम्)** अस्मिन् पद्ये इन्द्रः गिरिधारिणं श्रीकृष्णं स्तौति। अस्य अयं भावः। 'हे जगदीश! श्रीकृष्ण! त्वं भगवान् पुरुषोत्तमः असि। वसुदेवस्य पुत्रः, नीलमेघश्यामः कृष्णः, निष्कल्मषः,अनन्तज्ञानसम्पन्नश्च सन् यथेच्छया तनुं धृत्वा लोकमिमम् अवतीर्णः। सर्वेषां कारणभूतः, सर्वेषाम् आत्मस्वरूपः, सर्वस्वरूपश्च भवान्, तादृशाय तुभ्यं नमः' इति इन्द्रः श्रीकृष्णं स्तौति।

**(मूलम्)** ८२. पिता गुरुः त्वम् जगताम् अधीश्वरः दुरत्ययः कालः उपात्तदण्डः ।
हिताय स्वेच्छातनुभिः समीहसे मानं विधुन्वन् जगदीश मानिनाम् ।। इत्यादिना

**(विवरणम्)** अयमपि श्लोकः इन्द्रेण कृतां श्रीकृष्णस्य स्तुतिम् एव वर्णयति। इन्द्रः इतः अपि अधिकं श्रीकृष्णम् श्रीकृष्णम् एवं स्तौति। 'हे जगदीश ! त्वं जगतः रक्षकः, पोषणभारस्य वाहकः, अतः जगतां प्रभुः सम्पन्नः। पापस्य हारकः कालस्वरूपः, दण्डनसमर्थः च भवान्। स्वेच्छया सङ्कल्पानुसारं तनुं धरसि। जगतः हिताय अवतरसि। मानिनां मानं पालयसि। जगतः हितम् आचरसि ' इति एवं इन्द्रः श्रीकृष्णं स्तौति। स्वस्य अविवेकं भगवते निवेदयति।

**स्वावलोकनप्रश्नाः**

१.सात्वतां पतिः कः ?

२.'स्व-च्छन्द-उपात्त-देहाय'अस्य अर्थः कः ?

३.'जगताम् अधीश्वरः कः ?

## ६.३.४.४.इन्द्रस्य क्षमा याचनम् - श्रीकृष्णस्य अनुग्रहणम् :-

**(मूलम्)** ८३. ततः भगवन्तं शरणं प्राप्य यज्ञविघातेन सञ्जातरुषा स्वात्मना गोष्ठनाशाय यत् आचेष्टितं तस्यं क्षमाम् अर्पयामास। भगवान् अपि प्रहसन् मेघगम्भीरया वाचा ' मघवन्। लोकेशमानिनं श्री-मद-अन्धं त्वाम् अनुजि घृक्षुणा मया एव यागः विहतः। यः श्री-मद-अन्धः दण्डपाणिं मा न पश्यति तत्-अनुग्रहाय तस्य सम्पदं हरामि। ते भद्रम् अस्तु। गतदर्पः मत् अनुशासनं पालयन् स्वाधिकारे तिष्ठ'इति उक्त्वा विससर्ज। तदनु सुरभिः भगवन्तम् उपेत्य

तुष्टाव।तुम्बुर-नारदादयः यदुनन्दस्य लोक-मलापहं यशः जगुः।देवाङ्गनाः च ननृतुः।पुष्पाणि अवाकिरन्। नद्यः प्रसन्नसलिलाः आसन्। प्रशान्तमृगकुलं बृन्दावनम् आसीत्।

**(विवरणम्)** अयं वाक्यसमुदायः इन्द्रः आत्मानं क्षन्तुं श्रीकृष्णं प्रार्थयति,श्रीकृष्णः च ब्रह्माणम् अनुगृह्णाति इति अंशद्वयं वर्णयति। भगवान् अपि प्रहसन् 'मघवन्! लोकेशमानिनं श्री-मद-अन्धं त्वाम् अनुग्रहीतुं मया एव यागः विहितः। यः श्री-मद-अन्धः मां न पश्यति तस्य अनुग्रहाय तस्य सम्पदं हरामि। तव भद्रम् अस्तु।मत् अनुशासनं पालयन् स्व-अधिकारे तिष्ठ' इति इन्द्रं वदति, विसृजति च। एवं श्रीकृशणः इन्द्रस्य गर्वं परिहरति।

**स्वावलोकनप्रश्नाः**

१.इन्द्रः कस्य क्षमाम् अर्पयामास ?

२.भगवान् किम् उक्त्वा विससर्ज ?

३.तुम्बुर-नारदादयःकिं चक्रुः ?

४.बृन्दावनमं कथम् आसीत् ?

### ६.३.५.व्रजौकसां वरुणलोकदर्शनम् :-

**(मूलम्)** ८४.कदाचित् एकादश्यां नन्दः उपोष्य जनार्दनम् अर्चयित्वा द्वादश्यां कालिन्दीं स्नातुम् अगात्। यतः अयं विज्ञाय आसुरीं वेलां स्नातुं जलम् आविशत् ततः तं वरुणदूतः अपाहरत्। स्नानार्थं गतम् अनुवृत्तं नन्दं विज्ञाय गोप्यः आक्रोशन्त्यः नन्दनन्दनं शरणं प्रापुः। भगवान् तत् विज्ञाय तम् आनेतुं वरूणलोकम् अगात्। आदिपुरुषं तम् अवलोक्य प्रचेताः बहुधा स्तुत्वा, स्व-अनुचरकृत-अपराधस्य क्षमाम् अर्पयित्वा तत्-पितरं नन्दं प्रादात्। तेन सह वरुणलोकात् प्रतिनिवृत्तः नन्दः व्रजौकसाम् आत्मना साक्षात्कृतं वरूणलोकसौभाग्यं वरुणकृतं भगवत्-अर्चनं च न्यवेदयत्। तत् आकर्ण्य सर्वे व्रजवासिनः श्रीकृष्णं स्वभाग्यवशात् अत्र अवतीर्णं साक्षात् परात्परं नारायणं विदित्वा तत्-लोकदिदृक्षवः आसन्। सर्वभूतान्तर्यामी सः भगवान् तेषां संकल्पं विदित्वा तान् अनुजिघृक्षुः पुरा यत्र देशे कालिन्द्यां निमग्नः अक्रूरः भगवन्तम् अद्राक्षीत्, तं देशं नीत्वा तैः सह तत्र निमग्नः समुत्तस्थौ। निमग्नाः ते अपि तत्र जले योगिगम्यं सत्य-ज्ञान-आनन्दमयम् अनन्तं ब्रह्मलोकं समीक्ष्य सुविस्मिताः आसन्।

**(विवरणम्)** अयं वाक्यसमुदायः श्रीकृष्णः व्रजवासिनां वरुणलोकं प्रदर्शयति, इति अंशं वर्णयति। नन्दः कदाचित् एकादश्यां उपोषति। जनार्दनम् अर्चयति। द्वादश्यां कालिन्दीं स्नातुं गच्छति। यदा नन्दः स्नातुं जलम् प्रविशति तदा ,सा च वेला आसुरी भवति। अतः तं वरुणदूतः अपहरति। स्नानार्थं गतः नन्दः चिरात् अपि न निवृत्तः भवति।नन्दम् अनिवृत्तं जानन्ति। गोप्यः आक्रोशन्ति। नन्दनन्दनं शरणं गच्छन्ति। श्रीकृष्णः तत् जानाति। तम् आनेतुं वरूणलोकं गच्छति। वरुणलोकस्य अधिष्ठानदेवता वरुणः भवति। प्रचेताः आगतम् आदिपुरुषं श्रीमहाविष्णुं (श्रीकृष्णं)जानाति। तम् उपगच्छति। बहुधा स्तौति। वरुणः, स्वस्य अनुचरेण कृतस्य अपराधस्य क्षमाम् अर्पयति। श्रीकृष्णस्य पितरं नन्दं ददाति। नन्दः कृष्णेण सह वरुणस्य लोकात् प्रतिनिवृत्तः भवति। नन्दः व्रजवासिनाम् वरूणलोके आत्मना सन्दर्शितं सौभाग्यम्,वरुणेन भगवतः कृतम् अर्चनम् उद्दिश्य च कथयति। व्रजवासिनः नन्देन कथितं शृण्वन्ति। श्रीकृष्णं स्वभाग्यवशात् व्रजे अवतीर्णं साक्षात् परात्परं नारायणं जानन्ति। तस्मिन्नेव सन्दर्भे व्रजवासिनाम् वरुणलोकं द्रष्टुम् इच्छन्ति। भगवान् सर्वेषाम् आन्तर्यं संकल्पं जानाति। तत् सङ्कल्पम् अनुग्रहीतुम् इच्छति।श्रीकृष्णः, पुरा अक्रूरः यत्र देशे कालिन्द्यां निमग्नः भवति, भगवन्तम् पश्यति ,तं देशं व्रजवासिनः नयति। तैः सह तत्र निमज्जति। समुत्तिष्ठति।निमग्नाः व्रजवासिनः अपि तत्र जले योगिभिः प्राप्यं सत्य-ज्ञान-आनन्द-मयम् अनन्तं ब्रह्मलोकं पश्यन्ति। सुविस्मिताः भवन्ति. ।

**स्वावलोकनप्रश्नाः**

१.वरुणदूतः किमर्थं नन्दम् अपाहरत् ?

२.गोप्यः किमर्थं नन्दनन्दनं शरणम् अवापुः ?

३.नन्दः व्रजौकसाम् किं किं न्यवेदयत् ?

४. भगवान् लोकदिदृक्षून् कथम् अनुगृहीतवान्?

६.३.६.गोपाङ्गनानां मुक्तिप्रदानम्

**(मूलम्)** ८५.अथ ' ये यथा मां प्रपद्यन्ते तान् तथैव भजामि अहम्' स्व-उक्त-दिशा प्राक्-दत्त-वर-अनुरो धेन च मधुरभक्त्या स्व-आत्मानम् आराधयन्तीः गोपाङ्गनाः मोक्षं प्रापिपयिषुः शरत्-चन्द्र-चन्द्रिका-धवलासु शरत्-निशासु यमुना-कूलम् आसाद्य कलमधुरं वेणुना गीतानि जगौ। नितान्त-मधुरम् अनङ्गवर्धनं तत्-रवम् आकर्ण्य व्रजाङ्गनाः स्व-

स्वकार्याणि परिसमाप्य पतिभिः भ्रातृभिः च पुनः पुनः वार्यमाणाः अपि कृष्णदर्शनलालसाः तम् उद्देशं प्रति पलायाञ्चक्रुः। गृहान्तः निरुद्धाः काश्चन व्रजसुन्दर्यः गन्तुम् अशक्ताः अपि तम् एव निर्ध्यायन्त्यः निमीलित–लोचनाः दुस्सह–प्रेष्ठ–विरहिताः दुखातिशयेन निर्धूत–अशेष–किल्बिषाः ध्यान–प्रप्त–अच्युत– आश्लेष–सुख–विशेषेण प्रक्षीण–अशेष–पुण्यसञ्चयाः परब्रह्म–स्वरूपिणं भगवन्तं देवकीसुतं जारबुद्ध्या सङ्गताः अपि सद्यः एव प्रक्षीण–बन्धनाः गुणमयं देहं परित्यज्य मुक्तिं प्रापुः।

**(विवरणम्)** अयं वाक्यसमुदायः श्रीकृष्णः गोपाङ्गनानां विदेहकैवल्यम् अनुगृह्णाति इति अंशं वर्णयति। श्रवणम्, कीर्तनं विष्णोः,दर्शनं पादसेवनम्,स्मरणं चिन्तनं दास्यं,सख्यम् आत्मनिवेदनम् इति भक्तिः नवधा विद्यते। यः यः येन येन रूपेण भगवन्तम् आराधयति, तेन तेनैव रूपेण भगवान् अपि भक्तान् अनुगृह्णाति, इति भगवद्गीतायां श्रीकृष्णस्य उक्तिः एका अस्ति।पूर्वं रामावतारे,सहस्रशः मुनिवरान् उद्धर्तुम्= आत्मनः सायुज्यस्य अनुग्रहणेन धन्यान् कर्तुं विष्णुना वरं च दत्तम् अस्ति। ते एव मुनिपुङ्गवाः इदानीं नन्दव्रजे गोपाङ्गनात्वेन जाताः सन्ति। श्रीकृष्णः तासां मोक्षं दातुम् इच्छति। नन्दव्रजे गोपाङ्गनाः मधुरभक्त्या श्रीकृष्णम् आराधयन्ति। शरत्काले चन्द्रस्य चन्द्रिका यथा वा विद्यते तथा धवलासु शरदः निशासु यमुनायाः कूलं गच्छति। कलमधुरं वेणुना गीतं गायति। तत् गानं नितान्तं मधुरं भवति। गोपाङ्गनानां मनांसि हरति। मनस्सु अनङ्गस्य आलोचनां जनयति। व्रजाङ्गनाः श्रीकृष्णस्य मुरलीरवं शृण्वन्ति। स्व–स्वकार्याणि परिसमापयन्ति। पतिभिः भ्रातृभिः च पुनः पुनः वार्यमाणाः अपि कृष्णं द्रष्टुं इच्छन्ति। उत्सुकाः काश्चन अनुक्त्वैव तत्प्रदेशं धावन्ति। गृहान्तः निरुद्धाः काश्चन व्रजसुन्दर्यः गन्तुम् अशक्ताः अपि नेत्रे निमील्य विरहतापम् अनुभवन्ति। तम् एव ध्यायन्ति। तीक्ष्णेन श्रीकृष्णस्य स्मरणेन अखिलात् पापात् मुक्ताः भवन्ति। निरन्तरितध्यानेन अच्युतस्य आश्लेषसुखम् अनुभवन्ति। अशेषपुण्य सञ्चयस्य परिहारेण श्रीकृष्णं जारबुद्ध्या सङ्गताः भवन्ति। अनुपदमेव नष्टबन्धनाः भवन्ति। कर्मवशात् सम्पन्नं देहं परित्यजन्ति। मुक्तिं प्राप्नुवन्ति।

**स्वावलोकनप्रश्नाः**

१.भगवान् गोपाङ्गनाः मोक्षं प्रापयिषुः किं चकार ?

२.वेणुरवं कीदृशम् ?

३.तत्–रवम् आकर्ण्य व्रजाङ्गनाः किं चक्रुः?

४. व्रजाङ्गनाः कथं मुक्तिं प्रापुः ?

## ६.३.६.१.गोपाङ्गनाभिः सह श्रीकृष्णस्य नर्तनम् :-

**(मूलम्)** ८६.श्रीकृष्ण-सन्निधिं प्राप्ताः व्रजाङ्गनाः बहुधा भगवता प्रतिबोधिताः अपि न गृहगमनाय मतिं चक्रुः। भक्त-अभीष्ट-प्रदः महायोगीश्वर-ईश्वरः भगवान् स्व-आत्मानं बहुधा प्रकल्प्य मण्डलीकृतासु गोपाङ्गनासु द्वयोः द्वयोः मध्ये तिष्ठन् परस्पर-कण्ठ-आसक्तबाहुः मध्ये च कलमधुरं वेणुना गायन् ताभिस्सह नर्तकः नर्तयिता च स्वयम् आसीत्।

**(विवरणम्)** अयं वाक्यसमुदायः, श्रीकृष्णः गोपाङ्गनाभिः सह नृत्यं करोति इत्यंशं वर्णयति। व्रजाङ्गनाः श्रीकृष्णस्य सन्निधिं प्राप्नुवन्ति। भगवान् श्रीकृष्णः बहुधाउ परिपरिविधं गृहं गन्तुं ताः सन्दिशति। तथापि ताः गृहं गन्तुं न इच्छन्ति। भगवान् श्रीकृष्णः भक्तानाम् अभीष्टं साधयति। योगीनामपि योगी योगीश्वरः अयं श्रीकृष्णः। सर्वस्यापि प्रभुः सः श्रीकृष्णः, स्वयम् आत्मानं बहुधा सृजति। गोपाङ्गनानां मण्डलेषु द्वयोः द्वयोः मध्ये तिष्ठति। कण्ठेषु बाहून् स्थापयति। कलमधुरं वेणुना गायति। ताभिः सह नृत्यति। तान् स्वयं नर्तयति च।

**स्वावलोकनप्रश्नाः**

१.व्रजाङ्गनाः कां मतिं न चक्रुः ?

२.महा-योगीश्वर-ईश्वरः व्रजाङ्गनाभिः कथं रेमे ?

## ६.३.६.२.गोपाङ्गनानां उन्मत्तभाषणम् :-

**(मूलम्)** ८७.एवं कासुचित् शरद्-रात्रिषु रासक्रीडाः जलक्रीडाः वनक्रीडाः च कृत्वा तासां मनोरथम् आपू- रयन् झटिति अन्तर्हिते भगवति गोविन्दे तदीय-स्मित-विभ्रम-ईक्षितैः मनोहर-आलापैः आक्षिप्त-हृदयाः तद्भाव - भाविताः व्रजाङ्गनाः गति-विलोकनादिषु तं नन्दनन्दनम् अनुकुर्वन्त्यः परस्परम् अहम् एव श्रीकृष्णः इतिवदन्त्यः उन्मत्ताः इव बहुविधाः क्रीडाः कुर्वन्त्यः वनात् वनान्तरं गत्वा तं सर्वभूत-अन्तरस्थं भगवन्तं करिण्यः इव यूथपं विचेतुम् आरभन्त। सन्निहितान् प्लक्ष-न्यग्रोधादीन् वनस्पतीन्, मृगवराहादीन् च सम्बोध्य नन्दसूनोः गतिंपप्रच्छुः।

एवं प्रतिवृक्षं प्रतिवनम् अन्विष्य अपि साक्षात् मन्मथमन्मथं स्व-प्रेष्ठम्-अलमभानाः कस्मिंश्चित् वनोद्देशे शङ्ख- चक्र-अङ्कितानि श्रीकृष्णस्य पदानि अन्यस्याः च वराङ्गनायाः पदानि ददृशुः। दृष्ट्वा च, नूनम् अनया सेवितः भगवान्, इति तत् पादानुसारेण अन्विष्य अपि गोविन्दम् अपश्यन्त्यः विचेरुः।

**(विवरणम्)** अयं वाक्यसमुदायः, गोपाङ्गनानाम् उन्मादावस्थां वर्णयति। श्रीकृष्णः शरद्-रात्रिषु एवं गोपाङ्गनाभिः रासलीलाः करोति। जलेषु क्रीडति। उद्यानवनेषु विहरति। गोपाङ्गनानां मनो- रथम् पूरयति। यदि कदाचित् भगवान् अन्तर्हितः भवति, तदा भगवतः स्मित-विभ्रमान् ध्ययन्ति। मनोहरम् आलपन्ति। तद्भाव-भाविताः व्रजाङ्गनाः गति-विलोकनादिषु तं नन्दनन्दनम् अनुकुर्वन्ति। परस्परम् अहम् एव कृष्णः इति वदन्ति। उन्मत्ता इव बहुविधं क्रीडन्ति। वनात् वनान्तरं गच्छन्ति। यथा, करिण्यः= स्त्रीगजाः पुम्- गजं विचिन्वन्ति, तथा व्रजाङ्गनाः तं सर्वभूत-अन्तरस्थं भगवन्तं विचेतुम् आरभन्ते। सन्निहितान् वृक्षविशेषान् पशुविशेषान् च सम्बोधयन्ति। नन्दसूनोः विलासं विन्यासं च पृच्छन्ति । एवं प्रतिवृक्षं प्रतिवनम् अन्विष्यन्ति। तथापि साक्षात् मन्मथमन्मथं स्वप्रियं न लभन्ते। वनप्रदेशे कुत्रचित् शङ्ख-चक्र-अङ्कितानि श्रीकृष्णस्य पदानि पश्यन्ति। श्रीकृष्णस्य पदैः साकम् अन्यस्याः च वराङ्गनायाः पदानि अपि पश्यन्ति। नूनम् अनया आराधितः भगवान् इति श्रीकृष्णस्य पदानि अनुसरन्ति, अन्विष्यन्ति। तथापि गोविन्दं नैव पश्यन्ति,आश्चर्यं प्राप्नुवन्ति च।

**स्वावलोकनप्रश्नाः**

१.शरत् रात्रिषु, व्रजाङ्गनाः उन्मत्ताः सत्यः किम् अकुर्वन्त ?

२.उन्मत्ताः व्रजाङ्गनाः नन्दसूनोः गतिं कान् पप्रच्छुः ?

३.व्रजाङ्गनाः कानि ददृशुः ?

४.व्रजाङ्गनाःकथं विचेरुः ?

### ६.३.६.३.गोपाङ्गनायाः सौन्दर्याभिमानम् :-

**(मूलम्)** ८८.एवम् आत्मारामः अपि स्त्रीविभ्रमैः न आकृष्ट-हृदयः अपि कामिनां दैन्यं स्त्रीणां दुरात्मतां च दर्शयितुम् अन्याः सर्वाः अपि व्रजाङ्गनाः हित्वा कयाचित् एकया व्रजसुन्दर्या रेमे। सा च यतः 'अयं नन्दसूनुः इमाः सर्वाः अपि योषितः हित्वा मयैव रमते, अतः अहं सर्वासु अपि योषित्सु गरिष्ठा' इति आत्मानं मेने। तेन च आत्मनः सौन्दर्यदर्पेण सम्मूर्च्छिता सा गोपाङ्गना कस्मिंश्चित् वनोद्देशे ' न अहम् इतः पदात् पदम् अपि चलितुं शक्ता। अतः नय मां यत्र ते जिगमिषा अस्ति' इति आह। आत्मनः सौन्दर्यदर्पेण तया एवम् उक्तः भगवान् तां स्कन्धम् आरोप्य अन्तर्दधे।

**(विवरणम्)** अयं वाक्यसमुदायः श्रीकृष्णः गोपाङ्गनानां सौन्दर्याभिमानाय अपि दासः भवति इति अंशं वर्णयति। भगवान् श्रीकृष्णः आत्मारामः, जितेन्द्रियः अरिषड्वर्गाणाम् अतीतः, स्त्रीविभ्रमैः न आकृष्टः भवति, तथापि अपि कामिनां दैन्यं जनानाम् अवगमयितुम् इच्छति। स्त्रीणाम् अनियन्त्रितात्मताम् ज्ञापयितुम्अभिलषति। मनोभावैः पीडितः इव अवभासते। अन्याः सर्वाः अपि व्रजाङ्गनाः जहाति। कयाचित् व्रजसुन्दर्या रमते। सा च यतः 'अयं श्रीकृष्णः नन्दसूनुः इमाः सर्वाः अपि योषितः त्यक्त्वा मयैव रमते, अतः अहं सर्वासु अपि योषित्सु गरिष्ठा' इति आत्मानि अहङ्कारम् एति। तेन च आत्मनः सौन्दर्यदर्पेण सम्मूर्च्छिता भवति। सा गोपाङ्गना कस्मिंश्चित् वनोद्देशे 'न अहम् इतः पदात् पदम् अपि चलितुं समर्था अस्मि। अतः मां त्वया सह नयतु'इति उन्मादेन जल्पति।भगवान् अपि आत्मनः सौन्दर्येण दर्पितां तां गोपाङ्गनां स्कन्धम् आरोपयति। अन्तर्दधाति च।

**स्वावलोकनप्रश्नाः**

१.आत्मारामःकिमर्थंम् एकया व्रजसुन्दर्या रेमे ?

२.सा च आत्मानं कथं मेने ?

## श्रीकृष्णं प्राप्तुं गोपाङ्गनानाम् तपनम् :-

**(मूलम्)** ८९.तदनु सा अपि अनुतापं प्राप्य भगवन्तं विचिन्वती तम् एव विचिन्वतीभिः इतराभिः सह सङ्गता स्वात्मनः वृत्तम् अकथयत्। तत् आकर्ण्य तस्याः माधवाद् बहुमानप्राप्तिं, तस्याः एव दौरात्म्यात् गोविन्देन कृतम् अवमानं च आकलय्य विस्मयं प्रापुः। अथ तया सह मिलित्वा, अन्विष्यन्त्यः अपि यदा भगवतः गतिं न अविन्दन्, तदा अन्वेषणात् निवृत्ताः तदीयाः लीलाः गातुमुपचक्रमुः। 'हे भगवन्! तव जन्मना अनुगृहीतः व्रजः सर्वोत्कर्षेण वर्तते। सर्वदा लक्ष्मीः अत्र प्रतिवसति। त्वद्गप्राणाः वयं त्वां सर्वासु अपि दिक्षु विचिनुमः। त्वत्-दर्शन-भाग्येन अस्मान् अनुगृहाण। न केवलं त्वं गोपिकानन्दनः। किन्तु अखिलदेहिनाम् अन्तरात्म-साक्षी विश्वगोपनाय वेधसा प्रार्थितः अवतीर्णः असि' इति।

**(विवरणम्)** अयं वाक्यसमुदायः श्रीकृष्णः गोपाङ्गनायाः सौन्दर्याभिमानं दूरीकरोति,गोपाङ्गनाः च श्रीकृष्णं विचिन्वन्ति इति विषयद्वयं वर्णयति। तदनन्तरम् भगवतः स्कन्धे आरोपिता सा गोपाङ्गना अपि मदनेन अभिभूता भवति। अनुतापं गच्छति। भगवन्तं विचिन्वति। तदा तत्र इतराः काश्चन गोपाङ्गनाः भगवन्तं अन्विष्यन्ति। अनुतापं गता व्रजाङ्गना एव इतराभिः सह सङ्गता भवति। स्वात्मनः वृत्तं कथयति। भगवतः स्कन्धारूढया कथितं

शृण्वन्ति। तस्याः माधवाद् बहुमानप्राप्तिं, तस्याः एव दौरात्म्यात् गोविन्देन कृतम् अवमानं च अवगच्छन्ति। विस्मयं प्राप्नुवन्ति। पुनः सर्वाः मिलित्वा भगवन्तम् अन्विष्यन्ति। तथापि भगवन्तं न जानन्ति। विस्मयं प्राप्नुवन्ति। भगवतः एव चरितं गातुम् उद्युक्ताः भवन्ति। 'हे भगवन्! तव जन्मना अनुगृहीतः व्रजः सर्वोत्कर्षेण वर्तते। सर्वदा लक्ष्मीः अत्र प्रतिवसति। त्वत्–गतप्राणाः वयं त्वां सर्वासु अपि दिक्षु अन्विष्यामः। त्वत्–दर्शन–भाग्येन अस्मान् अनुगृहाण। न केवलं त्वं गोपिकानन्दनः। किन्तु अखिलदेहिनाम् अन्तरात्मसाक्षी, जगतः रक्षणार्थं ब्रह्मणा प्रार्थितः भुवि अवतीर्णः असि' इति एवम् अनेकधा गोपिकानन्दनं श्रीकृष्णं स्तुवन्ति कीर्तयन्ति च।

स्वावलोकनप्रश्नाः

१.व्रजाजाङ्गनाः किमर्थं विस्मयं प्रापुः ?

२.उन्मत्ताः व्रजाङ्गनाः नन्दसूनोः लीलाः गातुं कथम् उपचक्रमुः ?

### ६.३.६.४.नन्दनन्दनस्य दर्शनम् :-

**(मूलम्)** ९०.'यः त्वं पुरा तुमुलकरकावृष्टिपातादिरूपेभ्यः उपप्लवेभ्यः नः अगोपायीः, सः त्वम् इदानीं परित्यक्त–गुरु–पति–पुत्राः त्वत्–अधीनाः भवत्–विरह–अनल–दन्दह्यमान–मानसाः नः किमर्थम् उपेक्षसे' इति एवं बहुधा विलपन्तीषु स्तुवन्तीषु गायन्तीषु च व्रजाङ्गनासु तत्–लीलाः, तदनुजिघृक्षया तत्–मध्ये स्व–आत्मानं प्रत्यक्षीचकार नन्दनन्दनः।

**(विवरणम्)** अयं वाक्यसमुदायः श्रीकृष्णः गोपाङ्गनानाम् आत्मनं दर्शयति इत्यंशं वर्णयति। 'भगवन्! श्रीकृष्ण! त्वयि प्रेम्णा, गोपिकाः वयम्, इदानीं पितरं पतिं पुत्रं च त्यक्त्वा,त्वया साकम् आगच्छामः। पूर्वं भवान् बहुविधेभ्यः उपप्लवेभ्यः अस्मान् रक्षितवान् असि। तादृशः त्वम् इदानीं भवतः विरहस्य अनलेन दन्दह्यमानमानसाः नः किमर्थम् उपेक्षसे' इति एवं बहुधा विलपन्ति, स्तुवन्ति, गायन्ति च। नन्दनन्दनः ता गोपाङ्गनाः अनुग्रहीतुम् तासां मध्ये स्वयं प्रत्यक्षं भवति। आत्मानं दर्शयति च।

**स्वावलोकनप्रश्नाः**

१.व्रजाङ्गनाः कथं विलपन्ति ?

२.व्रजाङ्गनाः कीदृशाः ?

### ६.३.६.५.व्रजसुन्दरीणां विदेहकैवल्यप्रदानम् :-

**(मूलम्)**९१ .तदनु तत्-दर्शनेन प्रत्यागत-प्राणाः व्रजसुन्दर्यः तं परितः परिवेष्ट्य काश्चित् दक्षिणकरम्, काश्चित् वामकरम् , काश्चित् कण्ठदेशम्, काश्चित् स्कन्धदेशं च, गृहीत्वा बहुविधान् आलापान् चक्रुः। ताः यथार्हं मधुरालापैः सम्भाष्य ताभिः सह शरत्-चन्द्र-चन्द्रिकाधवले कालिन्दीपुलिने समुपाविशत्। एवं कतिचन शरत्-निशाः जलक्रीडाभिः रासक्रीडाभिः निकुञ्ज-विहारैः पुलिन-विहारैः च यापयित्वा, प्राक्-दत्तवराः ताः अनुजग्राह। अन्ते च तासां विदेहकैवल्यं प्रादात्।

**(विवरणम्)** अयं वाक्यसमुदायः श्रीकृष्णः गोपाङ्गनानां विदेहकौवल्यम् अनुगृह्णाति इत्यंशं वर्णयति। तदनन्तरं व्रजसुन्दर्यः श्रीकृष्णस्य दर्शनेन प्रत्यागत-प्राणाः भवन्ति। तं परितः आवहन्ति। काश्चित् गोपिकाः श्रीकृष्णस्य दक्षिणकरं धरन्ति। काश्चित् वामकरं वहन्ति। काश्चित् कण्ठदेशं गृह्णन्ति। काश्चित् स्कन्धदेशं च स्वीकुर्वन्ति। बहुविधान् आलापान् कुर्वन्ति। श्रीकृष्णः तैः सह मधुरम् आलापति। ताभिः सह कालिन्दीपुलिनेषु समुपाविशति। पुलिनाश्च शरत्-चन्द्र-चन्द्रिका-धवलाः वर्तन्ते। एवं कतिचन शरत्-निशाः जलक्रीडाभिः रास-क्रीडाभिः निकुञ्ज-विहारैः, पुलिन-विहारैः च, यापयति। प्राक्-दत्तवराः ताः अनुगृह्णाति। अन्ते च तासां विदेह कैवल्यम् अनुगृह्णाति ।

**स्वावलोकनप्रश्नाः**

१.तत्(श्रीकृष्णस्य)दर्शनेन किं चक्रुः?

२.व्रजाङ्गनाः कथम् अनुगृहीताः ?

### ६.४.उपसंहारः

बृन्दावने शरदः शोभायाः वर्णनम्, श्रीकृष्णस्य मनोहरं वेणुगानम्, गोपाङ्गनाभिः सह श्रीकृष्णस्य विरहणम्, नन्द व्रजकुमारिकाणां कात्यायन्याः अर्चनम्, गोपिकावस्त्रापहरणम्, विप्रभार्याणां श्रीकृष्णस्य अनुग्रहभाषणम्, इन्द्रस्य गर्वभञ्जनम्, गोवर्धनपर्वतस्य उद्धरणम्, व्रजौकसां वरुणलोकदर्शनम्, गोपाङ्गनाभिः सह श्रीकृष्णस्य नर्तनम्,गोपाङ्गनानाम् उन्मत्तता, गोपाङ्गनायाः सौन्दर्यदर्पः,गोपाङ्गनानां विलपनम्, व्रजसुन्दरीणां विदेहकैवल्यप्रदानम् इति एते अंशाः सुलभशैल्या वर्णिताः । एते च गोपाङ्गनानाम् अनन्यभक्तिं द्योतयन्ति। श्रीकृष्णस्य अव्याजानुरागं च बोधयन्ति।

## ६.५.अभ्यासः

अ).गोपिकावस्त्रापहरणवृत्तान्तं वर्णयत ?

इ).गोपाङ्गनासु प्रदर्शितम् श्रीकृष्णस्य अव्याजानुरागं वर्णयत ?

उ). श्रीकृष्णः कथं इन्द्रस्य गर्वं निर्मूलितवान् ?

# UNIT-VII
# कंसस्य वधः

**संरचना**

७.१.परिचयः
७.२.लक्ष्याणि
७.३.कंसस्य वधः
७.३.१.विद्याधरस्य शापनिमोचनम्
७.३.१.१.विद्याधरवृत्तान्तम्
७.३.२.शङ्खचूडस्य निहननम्
७.३.३.श्रीकृष्णस्य मुरली-गान-अमृतम्
७.३.४.वृषभासुरवधः
७.३.५.राम-कृष्णयोः निहननाय कंसस्य समालोचनम्
७.३.५.१.अक्रूरसहायस्य अभ्यर्थनम्
७.३.५.२.केशि-हननम्
७.३.५.३. नारदस्य अभिनन्दनम्
७.३.५.४.व्योमासुरस्य हननम्
७.३.५.५. अक्रूरस्य आन्दोलनम्-श्रीकृष्णस्य आतिथ्यम्
७.३.५.६.कंससन्देशस्य श्रवणम्
७.३.६. मधुरागमनाय राम-कृष्णयोः प्रस्थानम्
७.३.६.१.मधुरायां रमण्यः
७.३.६.२..सुदाम्नः अनुग्रहणम्
७.३.६.३.कुब्जायाः अनुग्रहणम् -धनुषः भञ्जनम् च
७.३.७.मल्लयुद्ध-विशारदानां मल्लरङ्गप्रवेशनम्
७.३.७.१.हस्तिनः हस्तिपकानां च हननम्
७.३.७.२.राम-कृष्णयोः नारायण-अंश-सम्भूतत्वम्
७.३.८.श्रीकृष्ण-चाणूरयोः संवादः
७.३.८.१.कंस-चाणूरयोः - बलराम-मुष्टिकयोः च मल्लयुद्धः
७.३.८.२.चाणूर-मुष्टिकयोः हननम्

७.३.८.३.इतरमल्लानां निहननम् -कंसस्य क्रोधनम्
७.३.९.कंसस्य वधः
७.३.१०.माता-पितरौ उद्दिश्य राम-कृष्णयोः उपसर्पणम्
७.३.११.व्रजं प्रति नन्दस्य गमनम्
७.३.११.१.राम-कृष्णयोः अध्ययनम् - गुरुदक्षिणासमर्पणम् च
७.४.उपसंहारः
७.५.अभ्यासः

## ७.१.परिचयः

अयं च सप्तमः (UNIT-VII) पाठ्यांशः। अयं च कृष्णचरितस्य प्रथमखण्डे ९२-११८ (para graphs) पर्यन्तं प्रचलति। अयम् अन्तिमः भागः। गते षष्ठे पाठ्यांशे (UNIT-VI) बृन्दावने श्रीकृष्णस्य वेणुगानम्, गोपाङ्गनाभिः श्रीकृष्णस्य विरहणम्, नन्दव्रजकुमारिकाणां कात्यायन्याः अर्चनम्,गोपिकावस्त्रापहरणम्, इन्द्रस्य गर्वभङ्गवृत्तान्तम्, गोवर्धनपर्वतस्य उद्धरणम्, गोपाङ्गनाभिः सह श्रीकृष्णस्य नर्तनम्, गोपाङ्गनानाम् उन्मत्तता, गोपाङ्गनायाः सौन्दर्यदर्पः,गोपाङ्गनानां विलपनम्, व्रजसुन्दरीणां विदेहकैवल्यप्रदानम् इति एते अंशाः वर्णिताः। अनन्तरम् अत्र सप्तमे पाठ्यांशे (UNIT-VII) प्रधानतया कंसस्य वधाय उपकारकं वातावरणं वर्णितम् अस्ति। तत्साधकतया विद्याधरवृत्तान्तम्, शङ्खचूड-वृषभासुर-केशिप्रभृतीनां दुष्टानां संहरणम्, राम-कृष्णयोः निहननाय कंसस्य उद्यमनम्, अक्रूरवृत्तान्तम्, राम-कृष्णयोः मधुरानगरप्राप्तिः,तत्र सुदाम्नः कुब्जायाः च अनुग्रहणम्,श्रीकृष्ण-चाणूरयोः वादः, कंस-चाणूरयोः, बलराम-मुष्टिकयोः च मल्लयुद्धः, चाणूर-मुष्टिकयोः हननम् , कंसस्य क्रोधनम्, कंसस्य संहरणम्, राम-कृष्णयोः मातापित्रुपसर्पणम्, व्रजं प्रति नन्दस्य गमनम् राम-कृष्णयोः अन्तेवासित्वम्,गुरुदक्षिणासमर्पणं च इति एते अंशाः बोध्यन्ते। एते च श्रीकृष्णस्य शिष्टरक्षणम्, दुष्टशिक्षणं ख्यापयन्ति। प्रशान्तसमाजनिर्माणाय, भद्रतापूर्कं जीवनाय श्रीकृष्णस्य निबद्धतां बोधयन्ति। अत्र च गद्यम् रसस्फोरकम्, ररसानुभूतिप्रदायकं च भवति। अत्र च हृद्यम्। श्रीकृष्णचरितस्य गद्यम्, पुनः पुनः, पदे पदे, श्रीकृष्णस्य लीलाविशेषाणां मननाय समर्थं भवति।

## ७.२.लक्ष्याणि

जगति सर्वेषां सद्गतिः एव, न कस्यापि दुर्गतिः भवति। यावान् वा समयः भवतु सर्वः अपि मानवः, संस्कृतः भवेत् एव। संस्कृतः भूत्वा सन्मार्गम् प्राप्नुयात् एव। संस्कारहीनता तु तात्कालिकी एव। संस्कारहीनतया आपतितम् दौर्गत्यम् यस्य कस्य अपि न चिरस्थायि भवति।

अस्माभिः क्रियमाणं शुभ-अशुभं कर्म एव सद्गतिप्रयाणकालं ह्रासयति वा,दीर्घयति वा, तावत् एव। एतत् दृष्टौ निधाय मानवः स्वच्छन्दतया सद्गतिप्रदायकं कर्म आचरेत्। अस्मिन् विषये परमकारुणिकः भगवान् सदा सहकरोति एव। धर्म-अविरुद्धं यत् अभिलषति, तत् अनुपदम् एव प्राणिनाम् अनुगृह्णाति। धर्म-अविरुद्धस्य प्रसादने दयामयस्य भगवतः, नियमाः निबन्धनानि परिमितयश्च न भवन्ति। भगवान् प्राणिनां सन्मार्गम्, कर्मणा केषाञ्चन अनुगृह्णाति। ज्ञानेन केषाञ्चन अनुगृह्णाति। प्रेम्णा= अनुरागेण, केषाञ्चन अनुगृह्णाति। स्नेहेन केषाञ्चन अनुगृह्णाति। अनन्यभक्त्या केषाञ्चन अनुगृह्णाति। किमुत एतैः, वैरेण अपि केषाञ्चन सन्मार्गम् अनुगृह्णाति। भगवता, वैरेण, सद्गतिम् आप्तेषु हिरण्याक्ष-हिरण्यकशिपू, रावण-कुम्भकर्णौ, शिशुपाल-दन्तवक्त्रौ आसन्। तथा एव प्रकृते कंसः अपि। कंसः मृत्युभीत्या वैरप्रवृत्तिम् वहन् सर्वत्र सर्वदा श्रीकृष्णं दूषयति। साधून् पीडयति। श्रीकृष्णस्य हननाय सर्वान् प्रयत्नान् आचरति। तदेव भगवतः हस्ते मरणाय कारणम् अभवत्। भगवतः हस्ते मरणम् अपि मुक्तिप्रदायकम् एव भवति। एवं भगवति वैरम् अपि भगवत्-सायुज्यसम्पादकं भवति इति एतत् अंशस्य बोधनम् एव एतत् पाट्यांशस्य मुख्यम् उद्देश्यं भवति। एतत्-पाठ्यांसस्य अध्ययनेन -

- आधुनिकसंस्कृतगद्यस्य परिचितः भवति।
- संस्कृतगद्यस्य माध्यमेन पौराणिककथायाः श्रवणे पठने च समर्थः भवति।
- आधुनिकसंस्कृतगद्यस्य माध्यमेन सरलसंस्कृतस्य भाषणे, प्रवीणः भवति।
- विद्याधरस्य शापमोचनवृत्तान्तं पठितुं पारयति।
- शङ्खचूडस्य निहननकथां लिखितुं प्रभवति।
- राम-कृष्णयोः निहननं प्रति कंसस्य उद्योगं वक्तुं समर्थः भवति।
- अक्रूरस्य सौमनस्यम् अवगन्तुं प्रभवति।
- चाणूर-मुष्टिकयोः निहननविधानं जानाति।
- श्रीकृष्णेन संसाधितं कंसस्य निहननं वर्णयितुं समर्थः भवति।

## ७.३.कंसस्य वधः

### ७.३.१.विद्याधरस्य शापविमोचनम् :-

**(मूलम्)** ९२.कस्मिंश्चित् दिवसे देवयात्रायै शकटान् आरुह्य नन्दादयः गोपाः,सरस्वतीतटस्थम् अम्बिका -वनं प्रापुः। तत्र सरस्वत्यां स्नात्वा, यथाविधि उमामहेश्वरौ समभ्यर्च्य, गो-भू-हिरण्यादि ब्राह्मणेभ्यः दत्त्वा, सरस्वतीजलं निपीय, तत्र समाहिताः आसन्। तत्र प्रसुप्तस्य नन्दस्य पादाग्रं कश्चन उरगः दष्ट्वा ग्रसितुम् आरेभे। ततः समुत्थाय नन्दः आत्मरक्षणाय 'कृष्ण! कृष्ण! पाहि' इति उच्चैः आचक्रन्द। तेन च सर्वे अपि गोपाः समुत्थाय

महान्तं कोलाहलं चक्रुः। अथापि भक्षणात् अनिवृत्तम् उरगं समासाद्य देवकीनन्दनः पादेन उरगं दृढम् अर्दयत्। तेन च प्राक्तनम् उरगरूपं विहाय मनोहरं रूपम् आस्थाय साक्षाद्बभूव विद्याधरः। दिव्य- माल्य- अम्बर-धरं मनोहररूपं तं समीक्ष्य, सविस्मयः वासुदेवः तदीयं वृत्तान्तम् अपृच्छत्।

**(विवरणम्)** अयं वाक्यसमुदायः विद्याधरस्य शापमोचनं वर्णयति। एकस्मिन् दिने नन्दादयः गोपाः देवयात्रां कर्तुं शकटान् आरुहन्ति। सरस्वतीनद्याः तीरे वर्तमानम् अम्बिकावनं गच्छन्ति। सरस्वत्यां स्नान्ति। पार्वती-परमेश्वरौ यथाविधि पूजयन्ति। गो-भू-हिरण्यादि-विप्रेभ्यः ददति। सरस्वत्यां जलं पिबन्ति। तत्र समुपविशन्ति। प्रयाणेन नन्दः अलसितः भवति। निद्रां गच्छति। एकः सर्पः तस्य पादाग्रं दशन् अस्ति। निद्रातः उत्थितः नन्दः प्रमादात् आत्मानं रक्षितुं ' कृष्ण! कृष्ण! पाहि' इति उच्चैः आक्रन्दति। सर्वे अपि गोपाः महान्तं कोलाहलं कुर्वन्ति। तथापि उरगः भक्षणात् न निवृत्तः, किन्तु दशन् एव अस्ति। कृष्णः समागच्छति। पादेन उरगं दृढं मर्दयति। उरगः शापात् मुक्तः भवति। स्वीयं रूपं विजहाति। मनोहरं शरीरं प्राप्नोति। विद्याधररूपेण साक्षात्कृतः भवति। सः दिव्यम् अम्बरं धरति। दिव्यां मालां वहति। तं विलोक्य विस्मयं प्राप्नुवन्ति। वासुदेवः विद्याधरस्य वृत्तान्तम् वृत्तान्तं पृच्छति।

| स्वावलोकनप्रश्नाः |
|---|
| १.भक्षणात् अनिवृत्तम् उरगं देवकीनन्दनः किम् अकरोत् ? |
| २.तेन(उरगमर्दनेन) किं बभूव ? |

### ७.३.१.१.विद्याधरवृत्तान्तम् :-

**(मूलम्)** ९३.सः तु एवम् आह - 'भगवन्! कदाचित् अहं रूप-यौवन-दर्पेण विमानेन दिक्षु सञ्चरन् कुत्रचित् कुरूपिणः तपस्विनः आङ्गिरसान् दृष्ट्वा पर्यहसम्। तेन च क्रुद्धाः ते यतः त्वम् अस्मान् वीक्ष्य परि-अहसः, अतः त्वम् उरगः भव' इति शेपुः। तदनु मया प्रार्थिताः कदाचित् यदुकुले अवतीर्णः श्रीकृष्णः भवत्-समीपम् आगमिष्यति। तस्य पादघातेन तद्रूपं विहाय प्राक्तनं रूपं प्राप्यस्यसि इति अनुग्रहं चक्रुः। अहं सुदर्शनः नाम विद्याधरः इति आत्मनः वृत्तान्तं कथयित्वा, प्रणम्य, श्रीकृष्णं भवत्-चिन्तनेन भवत्-नामस्मरणेन च अशेषाः किल्बिषाः नश्यन्ति। किमुत तव पादस्पर्शेन' इति स्तुत्वा स्वाधाम जगाम। गोपाः अपि अद्भुतं तत्-वृत्तान्तं विदित्वा यात्रां परिसमाप्य बृन्दावनम् आजग्मुः।

**(विवरणम्)** अयं वाक्यसमुदायः विद्याधरस्य शापवृत्तान्तं वर्णयति। विद्याधरः स्वीयं वृत्तान्तम् ‘ भगवन्! अहं रूपेण यौवनेन च सम्पन्नः सन् गर्विष्ठः अस्मि। विमाने लोकान् सञ्चरन् कदाचित् कुरूपिणः आङ्गिरसान् दृष्ट्वान्। परिहासं च कृतवान्। तेन ते आङ्गिरसाः क्रुद्धाः भवन्ति। ‘यतः त्वं अस्मान् वीक्ष्य परिहासं करोषि, अतः उरगः भव’ इति शपन्ति। अनन्तरं बहुधा प्रार्थिताः ते ‘यादवकुले श्रीकृष्णः अवतीर्णः तव समीपम् आगमिष्यति। तस्य पादस्य आघातेन (Pressure) उरगरूपं जहासि, पूर्वं विद्याधरं रूपं प्राप्यसि’ इति एवं शापस्य अवसानम् अपि ददति। तस्य नाम सुदर्शनः। विद्याधरः निजरूपं लब्ध्वा श्रीकृष्णं प्रणमति ‘भवत्–चिन्तनेन भवत्–नामस्मरणेन च अशेषाः किल्बिषाः नश्यन्ति। किमुत तव पादस्पर्शेन’ इति श्रीकृष्णं स्तौति।श्रीकृष्णस्य अनुमत्या स्वधाम गच्छति। गोपाः अपि अद्भुतं तत्–वृत्तान्तं जानन्ति। विस्मयं प्रप्नुवन्ति। बृन्दावनस्य प्रयाणं कुर्वन्ति।

**स्वावलोकनप्रश्नाः**

१.विद्याधरः कान् दृष्ट्वा पर्यहसत् ? ते कीदृशाः ?

२.क्रुद्धा ते किं शेपुः ?

३.शापं दत्त्वा कथं विमोचनम् ऊचुः ?

४.विद्याधरस्य नाम किम् ?

## ७.३.२.शङ्खचूडस्य निहननम् :-

**(मूलम्)** ९४.कस्याञ्चित् रात्रौ दिव्य–माल्य–अम्बर–भूषितौ राम–कृष्णौ व्रजसुन्दरीभिः सह बहुविध–कुसुम– गन्धवासितं बृन्दावनम् एत्य तत्र सुमनोहरम् अगायताम्। तेन च मनोहरेण गीतेन विस्मृत–देहाः व्रज–सुन्दर्यः मत्ताः इव आसन्। अत्रान्तरे शङ्खचूडः नाम कश्चन कुबेरभटः गुह्यकः आत्मनः योगबलेन ताः व्रजसुन्दरीः उत्तरां दिशं प्रापयामास। ताः च अत्मरक्षणाय ‘ राम! कृष्ण!’ इति उच्चैः आचुक्रुशुः। तेन क्रुद्धौ राम–कृष्णौ सालवृक्षौ उत्पाट्य ‘मा रुदत! सुन्दर्यः!’ इति उच्चैः आकृश्य तम् अनुसस्रतुः। तत्–दर्शनेन भीतः शङ्खचूडः ताः तत्र विसृज्य पलायामास। देवकीनन्दनः तासां संरक्षणाय बलभद्रं तत्र संस्थाप्य, तम् अनुसृत्य यत् रूपेण सः यत्र गतः तथा एव गत्वा मुष्टिघातेन तं निहत्य तत्–शिरस्थं मणिं गृहीत्वा, परावृत्य तं मणिं बलभद्राय प्रादात्।

**(विवरणम्)** अयं वाक्यसमुदायः श्रीकृष्णेन अनुष्ठितं शङ्खचूडस्य निहननं वर्णयति। बलराम-कृष्णौ दिव्यम् अम्बरं धरतः। कण्ठे मालाम् अलङ्कुरुतः। बृन्दावनं विविधैः कुसुमैः सुगन्धेन वासितं च विद्यते। गोपिकाभिः बृन्दावनं प्रविशतः। सुमनोहरं गायतः। तेन च मनोहरेण गीतेन गोपिकाः मत्ताः भवन्ति। देहम् अपि विस्मरन्ति। एवं स्थिते शङ्खचूडः नाम कश्चन कुबेरस्य भटः अस्ति। सः गुह्यकः भवति। गुह्यकाः च देवगणेषु अन्यतमाः भवन्ति। शङ्खचूडः स्वशक्त्या गोपिकाः उत्तरां दिशं प्रापयति। ताः च अत्मरक्षणाय 'राम! कृष्ण!' इति उच्चैः क्रोशन्ति। राम-कृष्णौ 'मा रुदत! सुन्दर्यः!' इति गोपिकाः समाश्वासयतः। तेन क्रुद्धौ राम-कृष्णौ सालवृक्षान् उत्पाटयतः। शङ्खचूडम् अनुसरतः। तत्-दर्शनेन भीतः शङ्खचूडः गोपिकाः तत्र विसृजति। पलायति च। देवकीनन्दनः तासां संरक्षणाय बलभद्रं तत्र संस्थापयति। शङ्खचूडम् अनुसरति। यत् रूपेण शङ्खचूडः यत्र गच्छति तथा एव गत्वा मुष्टिघातेन तं निहन्ति। तत्-शिरस्थं मणिं गृह्णाति। परावृत्य तं मणिं बलभद्राय ददाति।

**स्वावलोकनप्रश्नाः**

१.शङ्खचूडः कः ? सः किं चकार ?

२.व्रज-सुन्दर्यः अत्मरक्षणाय किम् आचुक्रुशुः ?

३.देवकीनन्दनः शङ्खचूडं कथं निहतवान् ?

४.श्रीकृष्णः शङ्खचूडस्य मणिं कस्मै प्रदत्तवान् ?

### ७.३.३.श्रीकृष्णस्य मुरली-गान-अमृतम् :-

**(मूलम्)** ९५.कस्मिंश्चित् दिने यथापूर्वं प्रातःकालिकं कृत्यं निर्वर्त्य, गाः चारयितुं सहचरैः गोपालैः सह वनं गते यशोदानन्दने, तत् विरह-अनल-दन्दह्यमान-मानसाः गोपाङ्गनाः तत्-लीलाः गायन्त्यः परस्परम् आलापान् चक्रुः। श्रीकृष्ण-मुरली-गान-अमृतम् आस्वादयन्त्यः प्राणेशसहकृताः अपि निलिम्पाङ्गनाः स्वनीवीबन्धं शिथिलीकुर्युः। तत्-गीतामृतम् आसाद्य मृगाः गावः च तृणभक्षणात् निवृत्ताः ऊर्ध्वग्रीवाः महानन्दे निमग्नाः बभूवुः इति एवं बहुधा तदीयं जगत्-मोहनाकारम्, उपलान् अपि द्रावयन्तं, पश्वादीनपि निर्व्यापारान् कुर्वन्तं तदीयं गानामृतं च स्मारं स्मारं कदानु गभस्तिमान् अस्तम् एष्यति ? कदा नु तदीयं मुख-अरविन्दं द्रक्ष्यामः ? इति गेहे स्थिताः अपि तत्-मानसाः गोप्यः आसन्।

**(विवरणम्)** अयं वाक्यसमुदायः श्रीकृष्णस्य वेणुगानमाधुर्यम्, गोपिकानां परवशतां च वर्णयति। यशोदायाः नन्दनः श्रीकृष्णः। सः प्रातःकाले निर्वर्तनीयानि कृत्यानि निर्वर्तयति। गाः चारयितुं सहचरैः गोपालैः वनंगच्छति। तदा गोपाङ्गनाः श्रीकृष्णस्य विरहानलेन दह्यमान-मानसाः भवन्ति। तत्-विलासान् परस्परम् आलपन्ति। श्रीकृष्णस्य मुरली-गान-अमृतम् आस्वादयन्ति। पारवश्येन स्वनीवीबन्धस्य शिथिलीकरणम् अपि न जानन्ति। मृगाः गावः च तृणभक्षणम् अपि स्थगयित्वा श्रीकृष्णस्य तत्-गानामृतम् शृण्वन्ति। ऊर्ध्वग्रीवाः सन्तः महानन्दे निमग्नाः भवन्ति। अखिलं जगत् मोहमभ्युपैति। उपलाः अपि द्रवन्ति। पश्वादीन् अपि श्रोतुम् आयत्तमानसान् करोति, इति एवं बहुधा प्रशस्तं तदीयं गानामृतं च पुनः पुनः मनसि स्मरन्ति। सूर्यः कदा अस्तम् एति ? कदा नु श्रीकृष्णस्य मुख-अरविन्दं पश्यामः ? इति चिन्तयन्ति। गेहे स्थिताः अपि गोप्यः श्रीकृष्णे आयत्तमानसाः भवन्ति। तदीयं सुन्दरवदनं द्रष्टुम् निरीक्षन्ते।

**स्वावलोकनप्रश्नाः**

१.गोपाङ्गनाः कीदृशाः ?

२.ताः गोपाङ्गनाः किं चक्रुः?

३.तत्-गीतामृतम् आस्वाद्य मृगाः गावः च कथं बभूवुः ?

४.श्रीकृष्णस्य गानामृतं कीदृशम् ?

५.गोप्यः तत्-मानसाः कथम् आसन् ?

### ७.३.४.वृषभासुरस्य संहरणम् :-

**(मूलम्)** ९६.कदाचित् अचलसन्निभः अरिष्टः नाम वृषभ-असुरः गोष्ठं प्राप्य मदोद्धतः खुरैः भुवम् आलिखन्, श्रृङ्गेण उत्खातकेलीं कुर्वन्, यथा गर्भस्थाः अपि शिशवः विस्रंसिताः भवेयुः तथा नर्दन् तत्रस्थानां गवां गोपानाञ्च महान्तं भयम् उत्पादयामास। ते अपि स्वरक्षणाय श्रीकृष्णम् आह्वयन्। श्रीकृष्णः तस्य अग्रतः तिष्ठन् भुज-आस्फोटनेन तम् आहूय सख्युः अंसे निक्षिप्य करं, तस्थौ। सः अपि क्रुद्धः विषाण-अग्रेण भुवम् उल्लिखन् बलदर्पितः श्रीकृष्णं मर्दयितुं तूर्णम् उपासर्पत्। भगवान् अपि तस्य श्रृङ्गद्वयं दृढं गृहीत्वा पश्चात् अष्टादशपदानि उच्चाटयामास। तेन च नितरां क्रुद्धः वृषभः किञ्चित् किञ्चित् शकृत् मूत्रञ्च विसृजन्,

खुराग्रैः भुवं विमर्दयन्,रोष-अरुणितनेत्रः श्रीकृष्णं प्रति समापतत्। आपतन्तं तं नन्दनन्दनः श्रृङ्गयोः गृहीत्वा भूतले निष्पीडयामास। तेन च स वृषभः मुखेन, नासाभ्यां च असृक् वमन्, शकृत् मूत्रं च विसृजन् अपगत-असुः अभवत्। तेन च व्रजवासिनः सुराः च नितरां सन्तुष्टाः आसन्। सुराः च पुष्पैः तम् अवाकिरन्।

**(विवरणम्)** अयं वाक्यसमुदायः श्रीकृष्णः वृषभासुरं संहरति इत्यंशं वर्णयति। अरिष्टनामा कश्चन वृषभासुरः अस्ति। सः पर्वतेन समानम् आकारं वहति। एकदा, सः गोशालां प्रविशति। खुरैः भुवम् आलिखति। शृङ्गेण उत्खनति। गवाम्, गोपानां च महान्तं भयं जनयति।गोपाः स्वरक्षणाय श्रीकृष्णम् आह्वयन्ति। श्रीकृष्णः तस्य अग्रतः तिष्ठति, करं सख्युः अंसे निक्षिपति। वृषभासुरं प्रतियोद्धुं सिद्धः भवति। वृषभः अपि श्रीकृष्णं मर्दयितुम् उपसर्पति। श्रीकृष्णः तस्य शृङ्गद्वयं गृह्णाति। अष्टादशपदानि पृष्ठतः पश्चात् प्रापयति। क्रुद्धः वृषभः किञ्चित्-किञ्चित् शकृत् मूत्रं च विसृजति। खुराग्रैः भुवं विमर्दयति। कोपेन श्रीकृष्णम् अभिपतति। आपतन्तं तं शृङ्गयोः गृहीत्वा भूतले निष्पीडयति। तेन वृषभः मुखेन, नासाभ्यां च रक्तं वमति। शकृत् मूत्रं च विसृजति। प्राणान् मुञ्चति। व्रजवासिनः सुराश्च तेन सन्तुष्टाः भवन्ति।

**स्वावलोकनप्रश्नाः**

१.वृषभासुरः कः ? सः कीदृशः ? सः कथं भयम् उत्पादयामास ?

२.'ते अपि स्वरक्षणाय श्रीकृष्णम् आह्वयन्' अत्र 'ते' के ?

३.श्रीकृष्णः वृषभासुरं कथं अपगतासुम् अकरोत् ?

### ७.३.५.राम-कृष्णयोः निहननाय कंसस्य समालोचनम् :-

**(मूलम्)** ९७.एवं कंसप्रेरिते वृषभे निहते सति, त्रिकालज्ञः देवर्षिः नारदः कंसं प्रति समागत्य' यशोदायां कन्या समुत्पन्ना यया श्रीकृष्णस्य जन्म अभिहितम्। सः तु देवकीपुत्रः। रामः च रोहिणीपुत्रः। दारकौ इमौ त्वत्- भयेन वसुदेवः नन्दस्य गृहे न्यक्षिपत्' इति अभिहितवान्। तत् आकर्ण्य कंसः वसुदेवं निहन्तुं धृतासिः तूर्णम् उदस्थात्। नारदः अपि कथञ्चित् तं तस्माद्

व्यवसायात् निवर्तयामास। एवं निवारितः सः देवकीनन्दनं स्व- मृत्युं विदित्वा तत्-पितरौ देवकी-वसुदेवौ निगलेन निगृह्य बबन्ध। तदनु सः कंसः तयोः हननाय 'केशि' नामकं राक्षसं प्रेषयामास। ततः च चाणूरमुष्टिकादीन् महाबलशालिनः मल्लयुद्ध-विशारदान् अमात्यान् आहूय नारद- उक्तं सर्वं तेभ्यः आवेद्य 'धनुर्याग (SPORTS MEET) व्याजेन' रामकृष्णौ इह समानाय्य भवद्भिः निहन्तव्यौ। अतः चतुर्दश्यां धनुर्यागायमञ्चाः सज्जीक्रियन्ताम्। रङ्गस्थलम् अपि समीक्रियताम्। पौरजानपदाः च मल्लयुद्ध -दर्शनाय समाहूयन्ताम्। महामात्रं कुवलयापीडं नाम गजं मदोत्कटं द्वारदेशे निक्षिप्य तेन रङ्गप्रवेशे एव यथा राम-कृष्णौ निहतौ भवेताम् तथायत्नः क्रियताम् ' इति आदिश्य राम-कृष्णयोः समानयनाय अक्रूरं चोदयितुं तम् आह्वयत्।

**(विवरणम्)** अयं वाक्यसमुदायः, कंसः नारदेन कथितं शृणोति। राम-कृष्णयोः निहननाय आलोचनां करोति इति अंशं वर्णयति। एवं कंसेन प्रेरितः वृषभः निहतः भवति। अनन्तरं कदाचित् त्रिकालवेदी देवर्षिः नारदः कंसं मिलति। रोहिणी-यशोदयोः सकाशे बलराम-कृष्णयोः वर्धनं पोषणं च सूचयति। तत्र तयोः श्रीकृष्णः देवक्याः पुत्रः। बलरामः च रोहिण्याः पुत्रः। दारकौ इमौ त्वत्-भयेन वसुदेवः नन्दस्य गृहे पोषयति इति कथयति। कंसः तत् शृणोति। वसुदेवं निहन्तुम् असिं धरति। तूर्णम् उत्तिष्ठति। नारदः कथञ्चित् कंसं तस्माद् व्यवसायात् निवर्तयति। एवं निवारितः अपि कंसः देवकीनन्दनं स्वस्य मृत्युं जानाति। तत्-पितरौ देवकी-वसुदेवौ निगलेन निगृह्णाति, बध्नाति, तदनु सः कंसः तयोः हननाय 'केशि' नामकं राक्षसं प्रेषयति। ततः च कंसः चाणूर-मुष्टिकादीन् महाबलशालिनः मल्लयुद्ध-विशारदान् अमात्यान् आह्वयति। नारदेन उक्तं सर्वं तेभ्यः निवेदयति। 'धनुर्याग (SPORTS MEET)' नाम्ना राम-कृष्णौ इह समानेयौ। भवद्भिः निहन्तव्यौ च। अतः चतुर्दश्यां धनुर्यागाय मञ्चाः सज्जीक्रियन्ताम्। रङ्गस्थलम् अपि सम्यक् क्रियताम्। पौरजानपदाः च मल्लयुद्ध- दर्शनाय समाहूयन्ताम्। महामात्रं कुवलयापीडं नाम गजं मदोत्कटं द्वारदेशे निक्षिप्य तेन रङ्गप्रवेशे एव यथा राम-कृष्णौ निहतौ भवेताम् तथा यत्नः क्रियताम् ' इति आदिशति। राम-कृष्णयोः समानयनाय चोदयितुम् अक्रूरम् आह्वयति।

**स्वावलोकनप्रश्नाः**

१.देवर्षिः नारदः कंसं किम् अभिहितवान् ?

२.नारदेन उक्तम् आकर्ण्य कंसः किम् अकरोत् ?

३.कंसः किमर्थं देवकी–वसुदेवौ बबन्ध ?

४.'तदनु सः कंसः तयोः हननाय 'केशि' नामकं राक्षसं प्रेषयामास' अत्र 'तयोः' कयोः ?

५.कंसः चाणूरमुष्टिकादीन् किम् आदिशत् ?

६.केन व्याजेन समानाय्य रामकृष्णौ निहन्तव्यौ ?

### ७.३.५.१.अक्रूरसहायस्य अभ्यर्थनम् :-

**(मूलम्)** ९८.तेन च समागते, अक्रूरे तदीयं पाणिं पाणिना सङ्गृह्य कंसः ' भवादृशः सखा नास्ति मम अन्यः। यथा इन्द्रः विष्णु–सहायेन स्व–समीहितम् अर्थं साधयति, तथा त्वत्साहाय्येन मदीयं समीहितं साधयेयम्। व्रजवासिभ्याम् आनकदुन्दुभेः सुताभ्यां राम–कृष्णाभ्यां मे मृत्युः नारदेन समुदीरितः। अतः त्वं नन्दव्रजं समासाद्य अनेन रथेन राम–कृष्णौ धनुर्याग–दर्शन–व्याजेन तूर्णं समानय। आनीतौ च तौ कालकल्पेन कुवलयापीडेन हस्तिना घातयिष्ये। यदि तेन विमुक्तौ स्यातां तदा चाणूर–मुष्टिकादयो मल्लवीराः तौ अवश्यं निहन्युः। निहतयोः च तयोः वसुदेवपुरोगमान् तत्–बन्धून् अपि निहनिष्यामि। पितरम् उग्रसेनम्, पितृव्यम्, देवकञ्च, ये च अन्ये मत्–विद्वेषिणः तान् सर्वान् अपि निहनिष्यामि। तदनु नष्टकण्टकाम् इमां धरित्रीं जरासन्धादिभिः मित्रैः पालयिष्यामि। तस्मात् राम–कृष्णौ इह आनय' इति अक्रूरं समादिशत्। सः अपि 'त्वत्–आज्ञया अवश्यं तौ इह आनयिष्ये। केन अपि दैवगतिः अनुल्लङ्घनीया, तथापि भवत्–आज्ञां परिपालयिष्ये'इति उवाच। एवम् अक्रूरं समादिश्य, तम् मन्त्रिणः च विसृज्य, स्वभवनं प्रविष्टे कंसे, अक्रूरः अपि स्वभवनम् आजगाम।

**(विवरणम्)** अयं वाक्यसमुदायः, राम–कृष्णयोः इह आनयनाय अक्रूरस्य प्रेषणम् इति अंशं वर्णयति। कंसः अक्रूरम् आह्वापयति। अक्रूरः कंसम् उपसरति। कंसः अक्रूरस्य पाणिं पाणिना गृह्णाति। ' मम भवादृशः सखा अन्यः नास्ति। यथा इन्द्रः विष्णु–सहायेन स्व–

समीहितम् अर्थं साधयति, तथा त्वत्-साहाय्येन मदीयं समीहितं साधयितुम् इच्छामि। नन्दस्य सुतौ राम-कृष्णौ। तौ च व्रजे वसतः। ताभ्यां राम-कृष्णाभ्यां मे मृत्युः नारदेन समुदीरितः अस्ति। अतः त्वं नन्दस्य व्रजं गच्छतु। अनेन रथेन राम-कृष्णौ धनुर्याग-दर्शन-व्याजेन तूर्णं समानयतु। कुवलयापीडेन हस्तिना मारयामि। यदि कुवलयवीडात् मुक्तौ भवतः, तदा चाणूर-मुष्टिकादयः मल्लवीराः वा तौ अवश्यं मारयतः। राम-कृष्णयोः निहननानन्तरं वसुदेवादीन् तयोः बन्धून् अपि निहनिष्यामि। पितरम् उग्रसेनम्, पितृव्यं देवकञ्च, ये च अन्ये मत्-विद्वेषिणः तान् सर्वान् अपि निहनिष्यामि। तदनु नष्टकण्टकाम् इमां धरित्रीं जरासन्धादिभिः मित्रैः पालयिष्यामि। तस्मात् राम-कृष्णौ इह आनय' इति अक्रूरं समादिशति। सः अपि 'तव आज्ञानुसारेण अवश्यं राम-कृष्णौ इह आनयिष्यामि ।सर्वथा विधिः अनुल्लङ्घनीया भवति खलु। भवतः आज्ञाम् अनुतिष्ठामि' इति वदति। एवम् अक्रूरः कंसाय धैर्यं उपदिशति। कंसः समावेशं समापयति। अक्रूरम्,मन्त्रिणः च विसृजति। स्वभवनं प्रविशति। अक्रूरः अपि स्वगृहम् आगच्छति।

**स्वावलोकनप्रश्नाः**

१.अक्रूरः कः ?

२. कंसः अक्रूरं किं समादिशत् ?

३.अक्रूरः कंसं किम् उवाच ?

## ७.३.५.२.केशि-हननम् :-

**(मूलम्)** ९९.कंसप्रेषितः केशिनामकः राक्षसः महामात्रं हयरूपम् आस्थाय खुरपुटेन धरित्रीं सङ्घट्टयन् स्वहेषाध्वनिना व्रजवासिनां साध्वसम् उत्पादयन् व्रजम् उपागमत्। सकलम् अपि गोकुलं त्रासयन्तं युद्धाय आत्मानम् आह्वयन्तं तं नन्दनन्दनः समुपाह्वयत्। रोषेण सन्निहितः सः पद्भ्याम् अरविन्दलोचनं जघान। ततः भगवान् यथा तार्क्ष्यः उरगं पद्भ्यां गृहीत्वा भूमौ विसृजेत् तथा हयस्य पादौ गृहीत्वा धनुश्शतान्तरे विससर्ज। लब्धसंज्ञः सः हयः भूयः तूर्णं समुत्थाय क्रोधाविष्टः हरेः हननाय समापतत्। समापततः तस्य मुखे भगवान् स्वकरं निक्षिप्य प्रवर्धयामास। तेन भग्नदन्तः निरुद्धवायुः सः हयः भुवि निपत्य परिवृतलोचनः अपगत-असुः अभवत्।

**(विवरणम्)** अयं वाक्यसमुदायः, श्रीकृष्णः केशिनामकं राक्षसं हन्ति, इति अंशं वर्णयति। केशिनामकः कश्चन राक्षसः। सः श्रीकृष्णं हन्तुं कंसेन प्रेषितः। अश्वरूपं स्वीकरोति। खुरैः धरित्रीं खनति। हेषाध्वनिना व्रजवासिनां भयम् उत्पादयति। गोकुलं तर्जयति। श्रीकृष्णं युद्धाय आह्वयति। श्रीकृष्णः राक्षसं योद्धुम् इच्छति। तार्क्ष्यः उरगं पद्भ्यां गृहीत्वा भूमौ याथा विसृजति एवं श्रीकृष्णः अपि हयस्य पादौ गृह्णाति। दूरे पातयति। लब्धसंज्ञः सः हयः क्रुद्धः भवति। हरेः हननाय समापतति। हरिः तस्य मुखे स्वकरं क्षिपति। करं वर्धयति, विस्तारयति च। तेन केशिराक्षसः भग्नदन्तः भवति। सः राक्षसः निरुद्धवायुः भूमौ पतति। गतासुः भवति।

**स्वावलोकनप्रश्नाः**

१.केशिः कः ?

२.केशिः केन रूपेण व्रजम् उपागमत् ?

३.केशिः रोषेण किं चकार ?

४.भगवान् केशिं कथं अपगतासुम् अकरोत् ?

### ७.३.५.३.नारदस्य अभिनन्दनम् :-

**(मूलम्)** १००.ततः त्रिकालवेदी देवर्षिः नारदः वासुदेवम् उपगम्य,रहसि तदीयं निजस्वरूपम् आवेद्य, बहुधा स्तुत्वा ' तुरगरूपस्य केशिनः संहारेण देवाः अत्यन्तं प्रमुदिताः अभवन् 'इति उवाच। किञ्च ' भगवन् ! शिष्टरक्षणाय दुष्ट संहाराय च भुवि अवतीर्णः असि। परश्वः चाणूरमुष्टिककंसादीन् सुरांशसंभूतान् अधार्मिकान् हनिष्यसि' इति उक्त्वा, तत्-आरभ्य कौरववध-अन्तानि तदीयानि अद्भुतकार्याणि भावीनि सर्वाणि अपि निवेद्य, तं प्रणिपत्य तेन अभ्यनुज्ञातः भागवतप्रवरः मुनिः जगाम। भगवान् अपि केशिनं हत्वा सानन्दं सहचरैः सह गाः चारयामास।

**(विवरणम्)** अयं वाक्यसमुदायः केशिराक्षसस्य हननाय नारदः श्रीकृष्णम् अभिनन्दति इति अंशं वर्णयति। नारदः भूत-भविष्यत्-वर्तमानानि च जानाति। देवः भूत्वा अपि ऋषिः इव प्रवर्तते। नारदः वसुदेवस्य तनयं वासुदेवं मिलति। रहसि तदीयं निजस्वरूपं बोधयति। बहुधा स्तौति, तुरगरूपस्य केशिनः संहारेण देवाः अत्यन्तं प्रमुदिताः भवन्ति' इति वदति। किञ्च 'भगवन्! शिष्टरक्षणाय दुष्टसंहाराय च भुवि अवतीर्णः असि। परश्वः चाणूर-मुष्टिक-कंसादीन्

असुरांश-सम्भूतान् अधार्मिकान् हनिष्यसि' इति सूचयति। तत्-आरभ्य कौरववध- अन्तानि तदीयानि अद्भुतकार्याणि भावीनि सर्वाणि अपि कथयति। वासुदेवं प्रणमति। तेन अनुमतः भवति। नारदः गच्छति। भगवान् अपि केशिनं हत्वा सानन्दं अनुचरैः सह गाः चारयति।

**स्वावलोकनप्रश्नाः**

१.केशिनः संहारेण देवाः अत्यन्तं प्रमुदिताः इति कः कम् उवाच ?

२.श्रीकृष्णः किमर्थम् अवतीर्णः इति नारदः उवाच ?

३.असुरांशसम्भूताः अधार्मिकाः के ?

### ७.३.५.४.व्योमासुरस्य वधः :-

**(मूलम्)** १०१. एकदा गोपालाः अद्रिसानुषु गाः चारयन्तः निलायनक्रीडां चक्रुः। तत्र केचन मेषायिताः, केचन चोरायिताः केचन पालायिताः च अभवन्। तदा मयपुत्रः व्योमनामा कंसप्रेरितः राक्षसः तेषु चोरायितः भूत्वा, मेषायितान् बहून् गोपालान् अद्रिगुहायां निक्षिप्य, शनैः शनैः त्रिचतुरवशिष्टान् सर्वान् अपि गोपालान् गुहान्तर्गतान् कृत्वा, तत्-द्वारं बृहता पाषाणेन पिदधे। सर्वज्ञः भगवान् तदीयं कर्म विज्ञाय तं हस्तेन, हरिः वृकम् इव, जग्राह। तदा सः गिरीन्द्रसदृशम् रूपम् आस्थाय आत्मानं मोचयितुं प्रायतिष्ट। अथापि न अशक्नोत्। भगवान् देवकीनन्दनः बलिष्ठं तं दोर्भ्यां निगृह्य, भूमौ पातयित्वा, आनन्दमग्नेषु दिविषत्सु, पशुमारम् अमारयत्। ततः गुहाद्वारे पिहितं पाषाणं निष्कास्य, गुहान्तर्गतान् स्व-अनुचरान् जुगोप। तदनु देवैः गोपैः च तोष्टूयमानः गोकुलं वव्राज।

**(विवरणम्)** अयं वाक्यसमुदायः,श्रीकृष्णः व्योमासुरं व्यापादयति,देवाः गोपबालाश्च श्रीकृष्णं प्रशंसन्ति इति अंशद्वयं वर्णयति। एकदा गोपालाः अद्रिसानुषु गाः चारयन्तः निलायनक्रीडां खेलन्ति। केचन गोपाः मेषाः इव आचरन्ति। पुनश्च केचन चोराः इव प्रवर्तन्ते। एवं स्थिते व्योमनामा कश्चन राक्षसः अस्ति। सः कंसेन प्रेरितः, सः मयस्य पुत्रः। राक्षसेषु चोरस्थाने भवति।मेषपक्षस्थान् गोपान् बहून् अद्रिगुहायां निक्षिपति। अवशिष्टान् त्रिचतुरान् अपि गुहायां बद्ध्नाति। तत् द्वारं बृहत्-पाषणेन पिदधाति। सर्वज्ञः श्रीकृष्णः तत् विजानाति। सिंहः वृकम् इव तं हस्तेन गृह्णाति। सः स्वशरीरं पर्वतसन्निभं करोति। स्वं मोचयितुं यतते। देवकीनन्दनः व्योमासुरं दोर्भ्यां निगृह्णाति। भूमौ पातयति। पशुवत् मारयति। गुहस्य द्वारे पिहितं पाषाणं निष्कासयति। गोपान् रक्षति।

| **स्वावलोकनप्रश्नाः** |
|---|
| १.गोपालाः कां क्रीडां चक्रुः ? |
| २.व्योमनामा राक्षसः कः ? सः किं चक्रे ? |
| ३.सर्वज्ञः व्योमराक्षसं कथं जग्राह ? |
| ४.देवकीनन्दनः व्योमराक्षसं कथम् अमारयत् ? |

### ७.३.५.५.अक्रूरस्य आन्दोलनम्-श्रीकृष्णस्य आतिथ्यम् :-

**(मूलम्)** १०२.अथ मथुरायां महामतिः अक्रूरः अपि तां रात्रिं यापयित्वा, प्रातः समुत्थाय, नित्यकृत्यानि निर्वर्त्य, रथारूढः नन्दव्रजं गच्छन्, स्वमनसि एवम् अचिन्तयत् - 'अहो! किं मया पूर्वस्मिन् जन्मनि सुकृतम् आचरितम्? किं वा तपः तप्तम् ? किं वा दानम् अकारि? यतः योगिनाम् अपि दुर्लभं श्रीकृष्ण-पादारविन्दं द्रक्ष्ये। यतः भगवतः श्रीकृष्णस्य पादारविन्दं द्रक्ष्ये, अतः मदीयम् अमङ्गलं विनष्टम्, जन्म अपि सार्थकं भवति। कंसः माम् अत्यन्तम् अन्वगृह्णात्। यतः अहम् अमुना प्रेषितः कृत-अवतारस्य भगवतः श्रीकृष्णस्य पादारविन्दं द्रक्ष्ये ' इति एवम् आत्मनः भाग्यविशेषं बहुधा श्लाघमानः, किं मां दृष्टवा भगवान् कंसप्रेरितः अयम् इति माम् अतिदुष्टं मन्येत? आहोस्वित् सर्वभूतान्तरात्मा सः माम् आत्मबन्धुं भक्त-अग्रेसरं वा मन्येत। अथवा कंसप्रेरितम् अपि मां विश्वदृक् सर्वान्तरात्मा नैव (न अ एव) अरिं मन्येत, इति एवं बहुधा मनसि श्वफल्कतनयः अक्रूरः

अध्वनि विचिन्तयन्, सायंसमये गोकुल-उपकण्ठं प्रापत्। तत्र मार्गे रजसि अब्ज-यव-अंकुशादिरेखाभिः लक्षितानि पादचिह्नानि दृष्ट्वा रथात् अवरुह्य 'अहो ! अमूनि भगवतः अङ्घ्रिचिह्नानि' इति विचिन्त्य तेषु प्रणिपत्त्या अचेष्टत। तदनु गोदोहनाय गोष्ठं प्राप्तौ पद्मनेत्रौ वनमाला-विभूषितौ श्यामल-श्वेतौ पीताम्बरधरौ जगतः रक्षणाय स्व-अंशेन साक्षात् अवतीर्णौ, करभ-विक्रमौ जगत्-मोहन-आकारौ राम-कृष्णौ विलोक्य तयोः चरणोपान्ते दण्डवत् प्रणिपपात। ततः भगवत् दर्शन-आह्लाद-बाष्प-पर्याकुल-ईक्षणं प्रवृद्ध-रोमाञ्चं तम् अक्रूरं प्रणतवत्सलः भगवान् श्रीकृष्णः बाहुभ्याम् उपगुह्य, परिरेभे। संकर्षणः अपि तम् उपगुह्य तदीयं पाणिं पाणिना गृहीत्वा, सानुजः गृहम् अनयत्। नीत्वा, च स्वागतं पृष्ट्वा, अर्घ्यपाद्यादिना मधुपर्केण च तम् अपूर्वम् अतिथिं सत्कृत्य, मेध्यं बहुगुणम् अन्नं प्रादात्। भोजनान्ते च सुखोपविष्टं

तं नन्दः समुपसृत्य, निरनुग्रहे कंसे जीवति कथं नु भवतां कुशलं पृच्छेयम् यः स्वभगिन्याः अपि तोकानि निर्दयः अवधीत्, तादृशे पालके सति अन्येषां किमु वक्तव्यम् इति उवाच। सूनृतया गिरा नन्देन परिपृष्टः अक्रूरः अध्वश्रमं विजहौ।

**(विवरणम्)** अयं वाक्यसमुदायः,अक्रूरस्य आन्दोलनम्,श्रीकृष्णस्य अनुग्रहणं च वर्णयति।'अहं श्रीकृष्णं धनुर्यागव्याजेन मधुरां आनयामि। यथाकथञ्चित् तं घातयिष्यामि' इति कंसः चिन्तयति। श्वफल्कस्य तनयम् अक्रूरं गोकुलं प्रेषयति। अक्रूरः मधुरां गच्छति। गमनसमये एवं चिन्तयति च - 'अहो! मया पूर्वस्मिन् जन्मनि किं सुकृतं आचरितवान् अस्मि। किं वा तपः तप्तवान् अस्मि। किं वा दानम् आचरितवान् अस्मि। योगिनाम् अपि श्रीकृष्णस्य दर्शनं दुर्लभं भवति खलु। तथा सति कंसः मम अत्यन्तम् उपकरोति। अहं श्रीकृष्णस्य पदारविन्दं अद्य पश्यामि' इति आत्मनः भाग्यं बहुधा स्तौति। कंसेन प्रेषितं मां श्रीकृष्णः अतिदुष्टं चिन्तयति? उत सर्वभूतान्तरात्मा मामात्मबन्धुं भक्ताग्रेसरं वा चिन्तयति? विश्वदृक् कंसप्रेषितम् अपि मां नैव शत्रुं मन्येत? इति अध्वनि बहु व्याकुलः भवति।अक्रूरः सायंकालसमये गोकुलस्य समीपं गच्छति। मार्गे अब्ज- यव- अङ्कु- शादिरेखाभिः लक्षितानि पादचिह्नानि पश्यति। तानि श्रीकृष्णस्य पादचिह्नानि इति चिन्तयति। गोदोहनाय प्राप्तौ राम-कृष्णौ पश्यति। तयोः प्रणिपातम् आचरति। अक्रूरः भगवतः दर्शनेन पुलकितः भवति। श्रीकृष्णः तं बाहुभ्यां गृह्णाति। दृढम् आलिङ्गति। सङ्कर्षणः पाणिं गृहीत्वा गृहं नयति। अर्घ्य-पाद्यादिना मधुपर्केण च अक्रूरं सत्करोति। भोजनान्ते श्रीकृष्णः अक्रूरं योगक्षेमं पृच्छति।

**स्वावलोकनप्रश्नाः**

१.अक्रूरः स्वमनसि किम् अचिन्तयत् ?

२. अक्रूरः कः ? सः कदा गोकुलोपकण्ठं प्रापत् ?

३.राम-कृष्णौ कीदृशौ ? अक्रूरः तौ कथं प्रणिपपात ?

४.प्रणतवत्सलः अक्रूरं कथं परिरेभे ?

५.भोजनान्ते च सुखोपविष्टम् अक्रूरं नन्दः किम् उवाच ?



**७.३.५.५.कंससन्देशस्य श्रवणम् - मथुरापुरी-गमनाय प्रस्थानम् :-**

**(मूलम्)** १०३. भगवान् श्रीकृष्णः, सायन्तन–अशनं निर्वर्त्य, पर्यङ्के सुख–उपविष्टम् अक्रूरम् उपसृत्य आत्मनः बन्धु–विषये सुहृत्–विषये च कंसस्य वृत्तं पप्रच्छ। अथवा ' मलमये नः मातुलनाम्नि कंसे राजनि, कथं नु मत्–प्रजानां बन्धूनां च कुशलम्। अहो मत्–हेतोः हि आर्ययोः अस्मत्–पित्रोः कारागार–बन्धनं, मत्–अग्रजानां निधनेन महत् दुःखं च सम्प्राप्तम् आसीत्। दिष्ट्या इदानीं स्वेषां वः दर्शनं सञ्जातम्। तात! अद्य तव आगमनकारणं किम्? इति। एवं भगवता पृष्टः अक्रूरः ' नारदमुखात् विदित–भवत्–वृत्तान्तः कंसः यदुषु प्रवृद्ध – क्रोधः आसीत्। वसुदेवं च निहन्तुम् ऐच्छत्। धनुर्यागव्याजेन साग्रजं त्वां मथुरापुरीम् आनाय्य कथञ्चित् हन्तुम् इच्छति'इति अकथयत्। तत् श्रुत्वा विहस्य नन्दसूनुः स्वपितरं प्रभाते मथुरानगरी–यात्रायै चोदयामास। नन्दः अपि दधि–क्षीर–हैयंगवीनादि–रूपाणि कंसस्य उपायनानि गृहीत्वा 'मथुरापुरी–गमनाय शकटैः सन्नद्धाः भवन्तु' इति गोकुले अघोषत्।

**(विवरणम्)** अयं वाक्यसमुदायः,श्रीकृष्णः अक्रूरस्य आतिथ्यं कल्पयति इति अंशं वर्णयति। अक्रूरः सायंतनभोजनं समापयति। पर्यङ्के सुखम् उपविशति। श्रीकृष्णः तम् उपसरति। बन्धूनां विषये मित्राणां विषये च कंसस्य प्रवर्तनं पृच्छति। देवकी–वसुदेवयोः कारागारबन्धनम्,आत्मजानां मरणेन तेषां प्राप्तं दुःखं च चिन्तयति। अक्रूरम्, आगमनस्य कारणं च पृच्छति। 'कंसः नारदमुखात्,तवउश्रीकृष्णस्य,वृत्तान्तं जानाति। यदुषु कोपं वर्धयति। वसुदेवं च हन्तुम् इच्छति। धनुर्–यागव्याजेन साग्रजं त्वां मधुरापुरीम् आनाय्य, यथाकथञ्चित् हन्तुम् इच्छति'इति अक्रूरः श्रीकृष्णं वदति। तत् श्रुत्वा नन्दसूनुः विहसति। स्वपितरं प्रभाते मधुरापुरी यात्रायै चोदयति। नन्दः अपि दधि–क्षीर–हैयङ्गवीनादि– बहुमानानि स्वीकुर्वन्तु, शकटैः सन्नद्धाः भवन्तु' इति गोकुले उच्चैः घोषयति च।

**स्वावलोकनप्रश्नाः**

१.अक्रूरम् उपसृत्य श्रीकृष्णः किम् पप्रच्छ ?

२.भगवता पृष्टः अक्रूरः किम् अकथयत् ?

३.अक्रूरस्य तत् वचः श्रुत्वा नन्दसूनुः किं चकार ?

४.नन्दः किं गोकुले अघोषत् ?

### ७.३.६.राम-कृष्णयोः मधुरानगरगमनम् :-

**(मूलम्)** १०४.ततः श्रीकृष्णस्य मथुरानगरी-गमन-वृत्तान्तम् आकर्ण्य तत्-विरहम् आगामिनम् आसहमानाः गोपाङ्गनाः अक्रूरं बहुधा निनिन्दुः। भगवान् अपि ताः सूनृतया गिरा समाश्वास्य, अक्रूरेण सह मथुरापूरीं प्रतस्थे। नन्दादयः अपि उपायनैः सज्जीकृतानि शकटानि आरुह्य प्रतस्थिरे। मध्येपथे रामकृष्णौ कालिन्दीम् आलोक्य, रथात् अवरुह्य, कालिन्दीजलम् अपिबताम्। अक्रूरः अपि तौ रथे अवस्थाप्य, तस्यां विधिवत् स्नातुं ययौ। कालिन्दीजले निमग्नस्य तस्य राम-कृष्णौ साक्षादभूताम्। जल-अन्तर्गतौ तौ दृष्ट्वा सविस्मयः उन्मज्य यथापूर्वं रथस्थौ तौ अद्राक्षीत्। तेन च संशयाविष्टमनाः जले तत्-दर्शनं मृषा इति मत्वा, पुनः नद्यां निममज्ज। तदा तत्र सहस्रफण-मणि-मण्डि-तस्य बिस-श्वेतस्य शेषस्य उपरिष्टात् शयानम्, शङ्ख-चक्र-गदा-धरम्, वनमाला-विभूषितम्, चतुर्भुजम्, श्रीवत्स-अङ्कित-वक्षसम्, भ्राजत् कौस्तुभम्, देवर्षिभिः प्रह्लादादि-भक्तैः च तोष्टूयमानम् सकल-जगत्-सृष्टि-स्थिति-लय-कारणं दृष्ट्वा विस्मय- उत्फुल्ल -गात्र -यष्टिः समुद्गत -आनन्द-बाष्पलोचनः सगद्गदया गिरा तं बहुधा अस्तौषीत्। किञ्च जलात् तूर्णम् उन्मज्य, प्रातःकालिकं कृत्यं सत्वरं निर्वर्त्य, रथम् आगमत्। आगतं तं दृष्टवा श्रीकृष्णः जले भूमौ आकाशे वा किम् अपि अद्भुतं तात! दृष्टवान् असि ? इति अपृच्छत्। सः अपि जले भुवि अन्तरक्षे च सर्वत्र त्वाम् एव अहम् अपश्यम् इति उक्त्वा स्यन्दनं चोदयामास।मध्येमार्गं तत्र तत्र उपसङ्गताः ग्रामीणाः जगत्-मोहनं रूपं वीक्ष्य तयोः दृष्टिं नैव आददुः। नन्दादयः अपि राम-कृष्णयोः आगमनात् प्रागेव मथुरापुर-उपकण्ठस्थम् उपवनं प्रविश्य अनयोः आगमनं प्रतीक्ष- माणाः तस्थुः। राम-कृष्णौ अपि 'दिनावसाने तत्र आगत्य श्वः प्रभाते आवां पुरीं प्रवेक्ष्यावः। अस्यां रात्रौ सहचरैः सह अत्र वसावः' इति अक्रूरम् ऊचतुः। सः अपि 'भवद्भ्यां विना न अहं पुरीं प्रवेक्ष्ये। भवत्-पादरजसामदीयं गेहं पुनीतम्। यतः भवत्-पादयुगलं निर्निज्य बलिः महान्तम् ऐश्वर्यं प्रापत्। भवत्-पाद-उद्भवा गङ्गा भुवन-त्रयं पावयामास। अतः अवश्यं सहानुचरैः मदीयं गेहं पावयन्तु' इति प्रार्थयामास। भगवान् अपि 'यदुकुल-विद्वेषिणं मद-उद्धतं कंसं हत्वा भवत्-गृहम् आगमिष्यामि' इति समाधाय,तं प्रेषयामास। सः अपि तद् अनागमनेन विमनस्कः पुरीं प्रविश्य, कंसाय तत्-आगमन-वृत्तान्तं निवेद्य स्वगृहं प्राप।

**(विवरणम्)** अयं वाक्यसमुदायः,राम-कृष्णौ मधुरां प्राप्नुतः इति अंशं वर्णयति। गोपाङ्गनाः श्रीकृष्णस्य मधुरापुरगमनं शृण्वन्ति। तत्-विरहम् असहमानाः अक्रूरं बहुधा निन्दन्ति। भगवान् ताः सूनृतया वाचा समाश्वासयति। अक्रूरेण साकं मधुरापूरीं प्रतिष्ठते। नन्दादयः अपि उपायनैः शकटानि आरोहन्ति। प्रयाणाय सिद्धाः भवन्ति। मध्ये मार्गं बलराम-कृष्णौ कालिन्दीजलं

पिबतः। अक्रूरः अपि तौ बलराम-कृष्णौ रथे अवस्थाप्य कालिन्द्यां स्नातुं याति। जले निमग्नस्य तस्य बलराम-कृष्णौ साक्षात् भवतः। जलान्तर्गतौ तौ दृष्ट्वा, स्नानं परिसमाप्य,सविस्मयं रथदेशं समागत्य रथस्थौ तौ पश्यति। तेन अक्रूरस्य मनसि संशयः भवति। जले तयोः दर्शनं मृषा इति चिन्तयति। पुनः नद्यां निमज्जति। तत्र श्रीकृष्णः आदिशेषस्य उपरिष्टात् शयानः अस्ति। शङ्ख-चक्रगदाः धरति। कण्ठे वनमालां विभूषयति। चतुरान् भुजान् वहति। कौस्तुभं धरति। देवर्षिभिः प्रहलादादिभक्तैः च वन्द्यमानः विद्यते। जले तादृशं नारायणं पश्यति। बाष्पलोचनः सगद्गदया गिरा श्रीकृष्णं बहुधा स्तौति। जलात् तूर्णम् उन्मज्जति। प्रातः कालिकं कार्यं निर्वर्तयति। रथम् उपसरति। तं दृष्ट्वा श्रीकृष्णः 'तात! जले, भूमौ,आकाशे, वा किम् अपि अद्भुतं दृष्टवान् असि वा'? इति पृच्छति। अक्रूरः अपि 'जले, भुवि,अन्तरिक्षे च सर्वत्र त्वाम् एव अहम् पश्यामि' इति वदति। स्यन्दनं चोदयति। मध्ये मार्गं आगताः ग्रामीणाः जगत्-मोहनं श्रीकृष्णं पश्यन्ति। बलराम-कृष्णौ दिवस-अवसाने 'श्वः प्रभाते पुरी प्रवेक्ष्यावः। अस्यां रात्रौ सहचरैः सह अत्र वसावः' इति अक्रूरं वदतः। अक्रूरः बलराम-कृष्णौ स्वगृहं नेतुम् इच्छति। परं तौ 'यदुकुलविद्वेषिणं मदोद्धतं कंसं हत्वा, भवद्गृहम् आगमिष्यामि' इति समाधाय अक्रूरं प्रेषयतः। श्रीकृष्णः अनुचरैः नन्दादिभिः सह तत्-वने सुखं स्वपिति। प्रातः कालिकं कृत्यं निर्वर्त्य, अपराह्णे बलभद्रेन साकं रम्य-प्राकार-सहितां धनुर्यागव्याजेन समन्तात् समलङ्कृतां मधुरापुरीं प्रविशति। पुरस्थाः रमण्यः स्वकर्माणि विहाय जगत्-मोहन-आकारौ बलराम-कृष्णौ पश्यन्ति।

**स्वावलोकनप्रश्नाः**

१.गोपाङ्गनाः अक्रूरं किमर्थं निनिन्दुः ?

२.अक्रूरः कथं कुत्र रामकृष्णौ अपश्यत् ?

३.अक्रूरः राम-कृष्णौ किं प्रार्थयामास ?

४.भगवान् किं समाधाय अक्रूरं प्रेषितवान् ?

### ७.३.६.१.मधुरायां रमण्यः :-

**(मूलम्)** १०५.भगवान् अपि सह-अनुचरैः नन्दादिभिः च सह तत्-वने सुखं सुप्त्वा, प्रभाते च सर्वं प्रातः कालिकं कृत्यं निर्वर्त्य, सानन्दं तैः अभ्यवहारादिकं निर्वर्त्य अपराह्णे बलभद्रेण सह रम्य-उपवन-शोभितां रम्य-प्राकार-सहितां धनुर्यागव्याजेन समन्तात् समलङ्कृतां

मधुरापुरीं प्राविशत्। तदा तत्-दर्शन-उत्सुकाः रमण्यः स्व-स्व-कर्माणि अपरिसामाप्य एव प्रासाद-अग्रान् अधिरुह्य, जगत्-मोहन-आकारौ राम-कृष्णौ विलोक्य 'अहो आभ्यां सह बहुविधाः क्रीडाः कुर्वन्त्यः व्रजाङ्गनाः अतीते जन्मनि किं वा तपः तेपुः। किं वा सुकृतम् आचरितं ताभिः' इति परस्परम् आलपन्त्यः तत्-मनस्काः आसन्।

**(विवरणम्)** अयं वाक्यसमुदायः मधुरायां स्त्रियः बृन्दावनात् आगच्छन्तौ बलराम-कृष्णौ पश्यन्ति इति अंशं वर्णयति। श्रीकृष्णः अनुचरैः नन्दादिभिः सह तत्-वने सुखं स्वपिति। प्रातः कालकृत्यानि समापयति। अपराह्णे बलभद्रेन साकं मधुरापुरीं प्रविशति। मधुरापुरी च रम्यप्राकारैः रमणीया विद्यते। धनुर्यागव्याजेन समन्तात् ध्वज-पताकाभिः समलङ्कृता च अस्ति। पुरस्थाः मधुरायां स्त्रियः स्व-स्वकर्माणि त्यजन्ति। जगत्- मोहन-आकारौ बलराम-कृष्णौ पश्यन्ति। गोपाङ्गनाः जीवितं धन्यं तर्कयन्ति। गोपिकानां पुण्यं प्रशंसन्ति। श्रीकृष्णम् एव मनसा चिन्तयन्ति।

**स्वावलोकनप्रश्नाः**

१.भगवान् कीदृशीं मधुरापुरीं प्राविशत् ?

२.तत्-दर्शन-उत्सुकाः रमण्यः, राम-कृष्णौ विलोक्य कथं तत्-मनस्काः आसन् ?

### ७.३.६.२.सुदाम्नः अनुग्रहणम् :-

**(मूलम्)** १०६.एवं राजमार्गेण गच्छतोः तयोः राजवस्त्रनिर्णेता रजकः सन्निहितः अभवत्।तदा तं समीक्ष्य आवां भवत्-प्रभोः कंसस्य भागिनेयौ। तत्-दर्शनाय प्रस्थितौ। गोकुलवासिनोः आवयोः तत्-दर्शन-अनुरूपाणि वस्त्राणि नैव (न अ एव) सन्ति। अतः कानिचित् राजधार्याणि वस्त्राणि आवयोः प्रदेहि इति अवोचताम्। तदा सः रजकः क्रुद्धः 'अहो युवाम् उन्मत्तौ इव दृश्येते। राजाधिराजा अपि कंसस्य नामग्रहणे भीता भवेयुः। राज-धार्य-वस्त्र-धारण-योग्यता गोकुल-वासिनोः, गाः चारयतोः, भवतोः कथं सङ्घटत' इति तौ परुषं प्रोवाच। तेन क्रुद्धः देवकीसुतः तं मुष्टिघातेन अमारयत्। तत्-दृष्ट्वा अन्ये अपि तत् अनुचराः रजकाः वस्त्रजालं तत्र एव विसृज्य पलायाञ्चक्रुः। तेषु स्व-अभीष्टानि वस्त्राणि गृहीत्वा, अन्यानि गोपेभ्यः यथायथं प्रदाय, किञ्चित् दूरं गतयोः तयोः एकः तन्तुवायः समागत्य तयोः सादरममूल्यानि हिरण्मयानि वस्त्राणि प्रादात्। तेन च प्रसन्नः भगवान् तस्य स्वसारूप्यम् अनुजग्राह। तदनु तत्-वस्त्र-अलङ्कृतौ तौ मध्येपथे वर्तमानं सुदाम्नः माला- कारस्य गृहं प्राविशताम्। तदनु सः तौ अर्घ्य-पाद्यादिना सत्कृत्य 'भवत्-पादपङ्कज-रजसा मदीयं गृहं

पवित्रम् आसीत्। दासेन अनेन भवतोः किं वा कार्यम्' इति विनमितकन्धरः विज्ञाप्य,तयोः बहु विधैः पत्रैः पुष्पैः च सज्जीकृताः मालाः अर्पयामास। तेन प्रीतः भगवान् तत्-वाञ्छितं वरं स्व-पादकमल-सेवारूपं,स्व-पाद-अर्चकैः सह मैत्रीरूपं च अनुजग्राह। किञ्च बल-आयुः-कीर्तिकान्ति-सम्पत्-प्रदानेन अपि तम् अन्वगृह्णात्।

**(विवरणम्)** अयं वाक्यसमुदायः सुदाम्नः अनुग्रहणं वर्णयति। प्रतिदिनं धर्तुं राज्ञां वस्त्राणि निर्धारयितुं कश्चित् रजकः भवति। राजमार्गेण गच्छतोः बलराम-कृष्णयोः सः राज-वस्त्रनिर्णेता रजकः अभिमुखः भवति। रजकं दृष्ट्वा, बलराम-कृष्णौ 'आवां भवतः प्रभोः कंसस्य भागिनेयौ। तस्य दर्शनाय गच्छावः। आवां गोकुलवासिनौ। अतः राजदर्शनाय उचितानि वस्त्राणि आवयोः सकाशे न सन्ति। अतः धर्तुम् कानिचित् राजवस्त्राणि आवयोः प्रदेहि' इति पृच्छतः। तत् आकर्ण्य रजकः क्रुद्धः भवति। 'अहो ! युवां उन्मत्तौ इव दृश्येते। राजाधिराजाः अपि कंसस्य नामग्रहणे भीताः भवेयुः। गाः चारयतोः युवयोः राजवस्त्र-धारणे योग्यता नास्ति' इति वदति। तेन क्रुद्धः देवकीसुतः रजकं मुष्टिघातेन मारयति। अन्ये अपि रजकाः तत् पश्यन्ति। वस्त्राणि तत्रैव विसृजन्ति। पलायनं कुर्वन्ति। श्रीकृष्णः तत्र वस्त्रराशिषु गोपेभ्यः अभीष्टानि वस्त्राणि वितरति। स्व- अभीष्टानि वस्त्राणि स्वीकरोति। मार्गमध्ये एकः तन्तुवायः समागच्छति। ताभ्यां हिरण्मयानि वस्त्राणि ददाति। प्रसन्नः भगवान् तस्मै स्वस्य निजरूपम् अनुगृह्णाति। सुदाम्नः मालाकारस्य गृहं प्रविशतः। बलराम-कृष्णौ तस्य पूजां स्वीकुरुतः। श्रीकृष्णः बल-आयुष्-कीर्ति-कान्ति-सम्पदः च कल्पयति, स्व-पादकमल-सेवा-अनुरूपं फलम् अनुगृह्णाति च।

**स्वावलोकनप्रश्नाः**

१.रामकृष्णौ रजकं किम् अवोचताम् ?

२.रजकः रामकृष्णौ किं परुषं प्रोवाच ?

३.सुदामा कः ?भगवान् तं कथम् अन्वगृह्णात् ?

### ७.३.६.३.कुब्जायाः अनुग्रहणम् -धनुषः भञ्जनम् च :-

**(मूलम्)** १०७.ततः अमूल्य-वस्त्र-आभणानि धृत्वा, गच्छतोः तयोः मध्येपथे त्रिवक्रनाम्नी काचन कुब्जा अमूल्यानि अनुलेपनानि गृहीत्वा अदृश्यत। तां दृष्ट्वा, तदीयं वृत्तान्तम् आपृच्छ्य, तत्-हस्ते सन्निहितानि सुगन्ध -द्रव्याणि ताम् अपृच्छत्। सा अपि तयोः

मनोहर–आकारं वीक्ष्य, सानन्दं बहुविधानि अनुलेपनानि तयोः प्रादात्। भगवान् अपि दिव्य–अनुलेपन–प्रदानेन प्रीतः तां कुब्जाम् अनुजिघृक्षुः तस्याः पादयोः पादौ निक्षिप्य, द्वयङ्गुल–उत्तान–पाणिना तस्याः चिबुकं गृहीत्वा उन्ननाम। तेन च सा तदीयं कुरूपं विहाय रमणीयं रूपं प्राप्य, स्मर- आविष्टचेताः भगवन्तम् उत्तरीयांशे गृहीत्वा, तेन सह रन्तुकामा तद्गृह–आगमनाय प्रार्थयामास। भगवान् अपि पार्श्वस्थम् अग्रजं दृष्ट्वा किञ्चित् विहसन्, मदीयं कार्यम् अत्र परिसमाप्य, भवत्–गृहम् आगमिष्यामि इति अवोचत्। तदनु पार्श्वस्थैः प्रदत्तानि उपायनानि गृह्णन् सरामः वासुदेवः वणिक्–पथेन गत्वा तत्र धनुष्–शालां प्राप्य, तत्रस्थम् ऐन्द्रं धनुः इव महाद्भुतं बहुभिः पुरुषैः गुप्तं शरासनम्, पुनः तत्रत्यैः रक्षिभिः निषिद्धः अपि अति–अद्भुतं वामकरेण आदाय मण्डलीकृत–कोदण्डः सन्धाय शरं यावत् मोक्तुं समाचकर्ष तावत् मध्ये भग्नम् आसीत् धनुः। तद्ध्वनिना दिशः दश प्रतिनेदुः । कंसः अपि तत् श्रुत्वा भीतः अभवत्।

**(विवरणम्)** अयं वाक्यसमदायः कुब्जायाः अनुग्रहणम्, धनुषः भञ्जनम् इति विषयद्वयं वर्णयति। बलराम –कृष्णौ अमूल्यानि वस्त्राणि आभरणानि च धरतः। राजमार्गे गच्छतः। तदा तौ त्रिवक्रनाम्नीम् एकां कुब्जां पश्यतः। तस्याः सकाशे अमूल्यानि अनुलेपनानि सन्ति। तानि गृहीत्वा गच्छति। सा तयोः मनोहर–आकारं रूपं पश्यति। बलराम–कृष्णयोः बहुविधानि अनुलेपनानि ददाति। तेन बलराम–कृष्णौ प्रीतौ भवतः। श्रीकृष्णः तां कुब्जां अनुग्रहीतुम् अपि इच्छति। तस्याः पादयोः पादौ निक्षिप्य, द्वयङ्गुलोत्तानपाणिना तस्याः चुबुकं गृहीत्वा ऊर्ध्वं करोति। सा कुरूपं विजहाति। रमणीयं रूपं प्राप्नोति। सा श्रीकृष्णे अनुरक्ता भवति। तेन सह रन्तुकामा च अस्ति। अतः गृह–आगमनाय श्रीकृष्णं प्रार्थयति। श्रीकृष्णः अग्रजं पश्यति। स्मितं करोति। 'मदीयं कार्यं समाप्य तव गृहम् आगमिष्यामि 'इति वदति। वणिक्–पथेन गच्छति। धनुश्शालां प्राप्नोति। तत्र च मपिमान्वितं धनुः अस्ति। तत् महापुरुषैः परिरक्षत् अस्ति। तत्रस्थाः रक्षकाः वारयन्ति। तथापि वामकरेण तत्–धनुः उत्क्षिपति। शरसन्धानं करोति। शरं च मोक्तुं यावत् यतते तावत् एव तत्–धनुः भग्नः भवति। महान् शब्दः जायते। दश दिशः प्रतिनदन्ति। कंसः अपि धनुषः भञ्जनेन उत्पन्नं शब्दं शृणोति। भृशं भीतः भवति।

**स्वावलोकनप्रश्नाः**

१.कुब्जा का ? सा कथम् अदृश्यत ?

२.भगवान् कुब्जां कथम् अन्वगृह्णात् ?

३.देवकीसुतः कीदृशं धनुः बभञ्ज ?

### ७.३.७.मल्लयुद्ध-विशारदानां मल्लरङ्गप्रवेशनम् :-

**(मूलम्)** १०८.तदनु तत्रत्याः चाप-रक्षिणः निषिद्धः अपि अयं बालकः धनुः बभञ्ज इति समुत्थाय तं ताडयितुं प्रायतन्त। तेषां व्यवसायं विदित्वा क्रुद्धौ राम-कृष्णौ तत्रत्यान् सर्वान् अपि कार्मुक-खण्डाभ्याम् अमारयताम्। अथ अस्तङ्गते भगवति रवौ, अपावृत्य, स्व-आवासस्थलं प्रापतुः। कंसः अपि महाद्भुतं धनुर्भङ्ग -स्वनं तत्-रक्षिणां राम-कृष्णाभ्यां हननं च आकर्ण्य, भृशं वित्रस्तः चिन्तया निद्रां लेभे। स्वप्ने प्रेत-परिष्वङ्गः खर-यानं तैल-अभ्यञ्जनम् इति एतानि बहूनि दुर्-निमित्तानि अद्राक्षीत्। तथा एव जाग्रत्-अवस्थायाम् अपि दुर्-निमित्तानि बहुविधानि अपश्यत्। अथ अतीतायां च रात्रौ, उदिते च गभस्तिमालिनि, मल्लक्रीडामहोत्सवम् आत्मना समुपकल्पितम् द्रष्टुकामः प्रातःकालिकीं विधिं निर्वर्त्य धृत-अमूल्य-आभरण-वस्त्रः पताका-तोरणादिभिः मल्लरङ्गस्थलं प्राविशत्। तत्र च ब्रह्म-क्षत्र-विशां यथार्हं समुपकल्पितेषु मञ्चेषु यथार्हं समुपविष्टेषु ब्रह्मक्षत्रादिषु कंसः महार्हं तदीयम् आसनम् अलञ्चकार। नन्दादयोऽपि जानपदाः समानीतानि उपायनानि राज्ञे समर्प्य, तेभ्यः समुपकल्पितेषु आसनेषु यथार्हं समुपाविशन्। चाणूर-मुष्टिक-प्रभृतयः अपि मल्लयुद्धविशारदाः तदनुगुणैः वेषैः मल्लरङ्गं प्राविशन्।

**(विवरणम्)** अयं वाक्यसमुदायः, चाणूर-मुष्टिक-प्रभृतीनां मल्लानां युद्धरङ्गप्रवेशनं वर्णयति। श्रीकृष्णः धनुश्शालायां बहुभिः पुरुषैः रक्षितं शरासनं पश्यति। तत् च ऐन्द्रं धनुः इव महाद्भुतं वर्तते। धनुषः रक्षकाः श्रीकृष्णं वारयन्ति। तथापि श्रीकृष्णः तत् धनुः वामकरेण आददाति। शरं सन्धातुम्,आकर्णान्तम् आकर्षति। मण्डलीकरोति च। कोदण्डं यावता मोक्तुम् आकर्षति तावता मध्ये एव धनुः भग्नं भवति। तत्-ध्वनिना दश दिशः प्रतिध्वनन्ति। तत् श्रुत्वा कंसः अपि भीतः भवति। चापरक्षिणः 'बालकः धनुः बभञ्ज' इति तं ताडयितुं यतन्ते। राम-कृष्णौ तेषां ताडनप्रयत्नं जानन्ति। बलराम-कृष्णौ तत्रत्यान् सर्वान् अपि कार्मुकस्य खण्डैः मारयन्ति। सायंकाले बलराम-कृष्णौ स्ववासं प्राप्नुतः। तत् विदित्वा वित्रस्तः कंसः चिन्तया निद्रां लभते। जाग्रत्-अवस्थायाम्, स्वप्ने अपि प्रेतपरिष्वङ्गः, खरयानं तैल-अभ्यञ्जनम् इति एतानि बहूनि दुर्-निमित्तानि पश्यति। प्रभाते कंसः मल्लक्रीडां द्रष्टुकामः मल्लरङ्गस्थलं प्रविशति। तत्र ब्रह्म-क्षत्राः एकतः उपविशन्ति। कंसः अपि स्वस्य घनम् आसनं अलङ्करोति। नन्दादयः अपि स्वैः आनीतानि उपायनानि कंसाय समर्पयन्ति। यथार्हेषु आसनेषु उपविशन्ति। चाणूर-मुष्टिक-प्रभृतयः मल्लरङ्गं प्रविशन्ति।

**स्वावलोकनप्रश्नाः**

१. कंसः भृशं वित्रस्तः चिन्तया कथं निद्रां लेभे ?

२.कंसः कानि दुर्-निमित्तानि अद्राक्षीत्?

३.नन्दादयः किम् अकुर्वन् ?

### ७.३.७.१.हस्तिनः, हस्तिपकानां च हननम् :-

**(मूलम्)** १०९.सरामः नन्दसूनुः अपि प्रातः उत्थाय कृत-अभिषेकः अमूल्य-वसन-आभरणधारी मल्लदुन्दुभिघोषं निशम्य, तेन नितरां प्रोत्साहितः रङ्गद्वारं समासाद्य तत्रस्थं महामात्रं स्वहननाय अम्बष्ठप्रेरितं कुवलया- पीडं नाम कुञ्जरम् अपश्यत्। दृष्ट्वा च 'भो हस्तिपक ! आवयोः मार्गं देहि ! कृञ्जरम् अपसारय मार्गात्। न आवयोः तं प्रेरयितुम् अर्हसि। यदि भूयः अपि प्रेरयेः तदा सकुञ्जरं त्वां मारयिष्यामि' इति अवदत्। एवं भगवता निर्-भर्त्सितः अपि स क्रूरः अम्बष्ठः तयोः हननाय कुञ्जरं प्रोत्साहयामास। सः अपि तेन प्रोत्साहितः श्रीकृष्णं करेण जग्राह। कथञ्चित् तेन विसृष्टः भगवान्, हस्तेन तं कुञ्जरं ताडयित्वा,तस्य अङ्घ्रिषु अलीयत। अथ सः कुञ्जरः संबद्धः अग्रतः बालकम् अपश्यन्, घ्राण-दृष्ट्या स्व-अङ्घ्रिषु निलीनं तं करेण जग्राह। भगवान् अपि तस्मात् कथञ्चित् आत्मानं मोचयित्वा तं पुच्छे गृहीत्वा पञ्चविंशति-धनुष्परिमितं दूरं समाचकर्ष। तदनु सव्य-अपसव्यतः भ्राम्यता तेन सह भ्राम्यमाणेन गोवत्सेन गोपालः इव सः बभ्राम। ततः गोविन्दः कुञ्जरस्य अभिमुखम् अभ्येत्य करतलेन वारणं निहत्य पातयामास। सः अपि क्रुद्धः भगवन्तम् अपि पतितं मत्वा दन्ताभ्यां भूमिम् अखनत्। किञ्च स्वविक्रमे प्रतिहते सति अत्यन्तम् अमर्षितः सः कुञ्जरः महामात्रैः हस्तिपकैः श्रीकृष्ण- हननाय प्रचोदितः भगवन्तम् अभ्यद्रवत्। आपतन्तं तं वीक्ष्य बक-अरिः तदीयं शुण्डालं हस्तेन दृढं प्रगृह्य, पुनः भूमौ पातयित्वा, मृगेन्द्रः इव करीद्रं पादेन आक्रम्य, तस्य दन्तम् उत्पाट्य, तेन हस्तिनं हस्तिपकान् च अहन्।

**(विवरणम्)** अयं वाक्यसमुदायः, श्रीकृष्णः हस्तिनम्, हस्तिपकं च संहरति इति अंशं वर्णयति। बलरामेण सह श्रीकृष्णः अमूल्यवस्त्राणि आभरणानि च धरति। मल्लानां दुन्दुभेः घोषां शृणोति। नितरां प्रोत्साहितः रङ्गद्वारं प्रवेष्टुम् गच्छति। मार्गे अम्बष्ठेन प्रेरितः कुवलयापीडः नाम गजः आगच्छति। तदा कृष्णः अम्बष्ठम् 'भोः! हस्तिपक! आवयोः मार्गं देहि। मार्गत् कुञ्जरं अपसारय। आवयोः तं प्रेरयितुं नार्हसि। यदि भूयः अपि प्रेरयसि सकुञ्जरं त्वां मारयिष्यामि'

इति वदति। एवं भगवता निर्भर्त्सितः अपि सः क्रूरः तयोः हननाय कुञ्जरं प्रोत्साहयत्येव। गजः श्रीकृष्णं करेण प्रहरति। कथञ्चित् तेन विसृष्टः श्रीकृष्णः,हस्तेन कुञ्जरं ताडयति। तस्य अङ्घ्रिषु लीयते। कुवलयापीडः तु अग्रतः बालकम् न पश्यति। घ्राणदृष्ट्या स्वपादेषु निलीनं श्रीकृष्णं करेण गृह्णाति। श्रीकृष्णः तस्मात् आत्मानं मोचयति। गजं पुच्छे गृह्णाति। पञ्चविंशति-धनुः परिमितं दूरं पातयति। अनन्तरं कुञ्जरस्य अभिमुखम् एत्य करतलेन गजं निहन्ति। अत्यन्तम् अमर्षितः सः कुञ्जरः महामात्रैः हस्ति पकैः श्रीकृष्णहननाय प्रचोदितः भवति। भगवन्तम् अभिद्रवति। आपतन्तं तं वीक्ष्य श्रीकृष्णः करं हस्तेन गृहीत्वा पुनः पुनः भूमौ पातयित्वा प्रहरति। गजं च मारयति। अनन्तरं हस्तिपकान् च हन्ति।

**स्वावलोकनप्रश्नाः**

१. नन्दसूनुः रङ्गद्वारे कम् अपश्यत् ?

२.नन्दसूनुः हस्तिपकं किम् अवदत् ?

३.क्रूरः अम्बष्ठः किं चकार ?

## ७.३.७.२.राम-कृष्णयोः नारायण-अंश-सम्भूतत्वम् :-

**(मूलम्)** ११०.ततः मृतद्विपम् उत्सृज्य, दन्तपाणिः सरामः देवकीनन्दनः प्रस्विन्नगात्रः असृक्-मदबिन्दुभिः अङ्कितः, मल्लानाम् अशनिः इव, नृणां सखा इव, स्त्रीणां मूर्तिमान् स्मरः इव, गोपानां स्वजनः इव, असतां भूभुजां शासकः इव, भोजपतेः कंसस्य मृत्युः इव, योगिनां परतत्वम् इव, वृष्णीनां परदेवता इव च गृहीतः, रङ्गं प्राविशत्। कंसः अपि तादृशं महामात्रं गजं मृतं विदित्वा, स्वमनसि अत्यन्तं उद्विविजे। उत्तम-वेषधारिणौ, महाभुजौ तौ राम-कृष्णौ समीक्ष्य,मञ्चस्थाः पौरजानपदाः 'ध्रुवम् एतौ नारायण-अंश-सम्भूतौ। एतावत् गोकुले निगूढौ आस्ताम्। आभ्याम् एव पूतनादयः राक्षसाः राक्षस्यः च मारिताः' इति परस्परं तयोः प्राक्तनीः लीलाः आलपन्तः आसन्।

**(विवरणम्)** अयं वाक्यसमुदायः, राम-कृष्णौ दिव्यगुणसम्पन्नौ,नारायणांशसम्भूतौ च, इति मधुरायां मल्लयुद्धं द्रष्टुम् उपस्थिताः जानपदाः कथयन्ति, इति अंशं वर्णयति। श्रीकृष्णः द्विपं हन्ति। पाणौ दन्तद्वयं धरति। बलरामेण देवकीनन्दनः मल्लरङ्गं प्रविशति। तदा श्रीकृष्णस्य शरीरम् अलसितं विद्यते। गजस्य मदबिन्दवः रक्तबिन्दवश्च शरीरे सर्वत्र सन्ति। तादृशः श्रीकृष्णः मल्लानाम् अशनिः इव दृश्यते। नृणां सखा इव भासते। स्त्रीणां मूर्तिमान् स्मर इव दर्शनं ददाति।

गोपानां स्वजनः इव अवभासते। असतां भूभुजां शासकः इव भयं जनयति। भोजपतेः कंसस्य मृत्युः इव अभिसरति। योगिनां परतत्त्वम् इव प्रसन्नवदनः भासते। वृष्णीनां परदेवता इव दृश्यते। कंसः अपि तादृशं महामात्रं गजं मृतं जानाति। स्वमनसि अत्यन्तं उद्विग्नः भवति। उत्तम-वेषधारिणौ,मञ्चस्थाः पौरजानपदाः महाभुजौ तौ राम-कृष्णौ समीक्षन्ते। 'ध्रुवम् एतौ नारायण-अंश- सम्भूतौ। एतावत् गोकुले निगूढौ आस्ताम्। आभ्याम् एव पूतनादयः राक्षसाः राक्षस्यः च मारिताः' इति परस्परं तयोः प्राक्तनीः लीलाः स्मरन्ति ।

**स्वावलोकनप्रश्नाः**

१. देवकीनन्दनः कथं रङ्गं प्राविशत् ?

२.महामात्रं गजं मृतं विदित्वा, कंसः किं बभूव ?

३.राम-कृष्णौ समीक्ष्य,मञ्चस्थाः किम् आलपन् ?

### ७.३.८.श्रीकृष्ण-चाणूरयोः संवादः :-

**(मूलम्)** १११.एवं जनेषु आलपत्सु चाणूरः सरामं श्रीकृष्णम् आहूय एवम् अवादीत्- 'हे नन्दसूनो!हे राम! युवयोः मल्लयुद्ध-कौशलम् आकर्ण्य राजा युवयोः युद्धकौशलं दिदृक्षुः युवाम् इह आनयत्। तस्मात् भवद्भ्याम् आस्माभिः च राज्ञः प्रियं कार्यम्' इति। तदानीं श्रीकृष्णः 'अवश्यम् अस्माभिः राज्ञः प्रियं कार्यम्। यूयं तु युवानः, बलिष्ठाः। अतः वयं सवयोभिः बालैः सह युद्धं करवाम' इति अब्रवीत्। चाणूरः अपि'वयसा बालकेन अपि त्वया सहस्र-द्विप-सत्वभृत् महान् गजः हतः। अतः त्वं बली। अत आवयोः मल्लयुद्धः न अधर्मः' इति उवाच।

**(विवरणम्)** अयं वाक्यसमुदायः, मल्लयुद्धात्पूर्वं श्रीकृष्ण-चाणूरयोः संवादं वर्णयति। श्रीकृष्णः कुवलया- पीडं हन्ति। बलरामेण सह देवकीनन्दनः रक्त-मद-बिन्दुभिः अञ्चितं मल्लरङ्गं प्रविशति। सः मल्लानां अशनिः इव, नराणां मित्रम् इव, स्त्रीणां स्मरः इव, दुष्टानां राज्ञां शासकः इव, कंसस्य मृत्यः इव, योगिनां परतत्त्वम् इव, वृष्णीनां परदेवता इव च अवभासते। कंसः कुवलयापीडं कृष्णेन हतं जानाति। मनसि उद्वेगं प्राप्नोति। सभ्याः जानपदास्तु श्रीकृष्णस्य वीरचरितानि आलपन्तः सन्ति। चाणूरः बलरामेण सह कृष्णम् आह्वयति। 'हे नन्दसूनो ! हे राम! युवयोः मल्लविद्याकौशलं कंसः जानातु। तत् द्रष्टुम् इच्छति। अतः एव भ्रातरौ युवाम् इह आनयति। तस्मात् भवद्भ्याम् अस्माभिश्च राज्ञः प्रियं कर्तव्यम् अस्ति' इति वदति। तत् श्रुत्वा श्रीकृष्णः 'अवश्यम् अस्माभिः राज्ञः प्रियं कर्तव्यम् एव। यूयं तु युवानः बलशालिनः च। वयं

सवयोभिः बालैः युद्धं करवाम' इति विज्ञापयति। 'सहस्रगुण-सत्वसम्पन्नः गजः भवद्भ्यां हतः। भवन्तौ अपि बलशालिनौ एव। अतः अस्माभिः योद्धुम् आगच्छताम्, पुनः चाणूरः राम-कृष्णौ वदति।

**स्वावलोकनप्रश्नाः**

१. चाणूरः सरामं श्रीकृष्णम् आहूय किम् अवादीत् ?

२. चाणूरः श्रीकृष्णं किम् अब्रवीत् ?

३.चाणूरः श्रीकृष्णं पुनः किम् अवादीत् ?

### ७.३.८.१.कंस-चाणूरयोः - बलराम-मुष्टिकयोः च द्वन्द्वयुद्धः :-

**(मूलम्)** ११२.एवम् उक्तवति चाणूरे बद्धपरिकरौ राम-कृष्णौ भुजौ आस्फालयन्तौ पश्यतां पौरजानपदानां कंसस्य च विनोदाय, मृगेन्द्रः मृगेण इव कञ्चित् कालं मल्लयुद्धक्रीडां कर्तुं प्रारभेते। तदनु भगवान् देवकीसुतः चाणूरं, रौहिणेयः मुष्टिकं च आससाद। हस्ताभ्यां हस्तयोः, पद्भ्यां पादयोः, जानुभ्यां जान्वोः च दृढं बध्वा अन्योन्यं विचकर्षतुः। परिभ्रामण-विक्षेप-परिरंभाव-पातनैः उत्सर्पण-अपसर्पणैः अन्योन्यं प्रत्यरुन्धताम्। उत्थापन- उन्नयन-चालन-स्थापनादिभिः परस्पर-जिगीषया परस्परम् अपचक्रतुः। तादृशं बल-अबलसूचकं युद्धं पश्यन्त्यः तत्र समवेताः पौरयोषितः महान् अयम् अधर्मः, ये राजसभा-सदः राज्ञः प्रियम् अन्विच्छन्तः वज्रसार-सर्वाङ्गयोः शैलेन्द्रसन्निभयोः, मल्लयुद्धविशारदयोः चाणूर-मुष्टिकयोः, अतिसुकुमार-अङ्गयोः किशोरयोः अनवाप्त-यौवनयोः राम-कृष्णयोः च मल्लयुद्धम् अनुमोदन्ते। अम्बुभिः पद्मकोशम् इव, श्रमवारिभिः परिप्लुतं श्रीकृष्णस्य मुखं वीक्ष्यताम्। एवम् आताम्रलोचनं रामस्य अपि मुखं पश्यतु इति परस्परम् आलपन्।

**(विवरणम्)** चाणूरः 'हे कृष्ण! वयसा बालकेन अपि त्वाया सहस्रद्विप-सत्वभृत् कुवलयापीडः हतः। अतः त्वं बली एव। अवयोः त्वया सह मल्लयुद्धः न अधर्मः' इति श्रीकृष्णं चोदयति। बलराम-कृष्णौ बद्धपरिकरौ भुज-आस्फालनम् कुरुतः। तयोः मल्लयुद्धः प्रेक्षवतां सिंह-किशोरयोः क्रीडा इव अस्ति। श्रीकृष्णः चाणूरं आसीदति। बलरामः मुष्टिकं च उपसरति। उभयोः पक्षयोः मध्ये हस्ताहस्ति युद्धं अभूत्। पद्भ्यां पादयोः, जानुभ्यां जान्वोश्च अन्योन्यं दृढं बद्ध्वा तौ विचकर्षतुः। परिभ्रामण-विक्षेप-परिरम्भ-अवपातनैः, उत्सर्पण -अपसर्पणैश्च अन्योन्यं निजपराक्रमं प्रकटयतः। तत्र बलाबलसूचकं युद्धं पश्यन्त्यः पौराङ्गनाः 'अयं महान्

अधर्मः।एतौ मल्लौ वज्रसारसर्वाङ्गौ मल्लयुद्ध–विशारदौ शैलेन्द्रसन्निभौ। राम–कृष्णौ तु बालकौ। अनवाप्त– यौवनौ। अतः एतयोः मल्लयुद्धं न अनुमन्तुं शक्यते' इति अन्तः वदन्ति स्म।किञ्च 'अम्बुबिन्दुभिः पद्मम् इव,श्रान्त– जलबिन्दुभिः श्रीकृष्णस्य वदनं स्विन्नं भवति। बलरामस्य नेत्रे च रक्ते भवतः, तयो बालकयोः पराक्रमं पश्यन्तु' इति तत्र उपस्थिताः जानपदाः कथयन्ति।

**स्वावलोकनप्रश्नाः**

१. रामकृष्णौ कथं मल्लयुद्धक्रीडां कर्तुं प्रारभेते ?

२. रामकृष्णौ कं कं आससादतुः ?

३.रामकृष्णौ कथं विचकर्षतुः ?

४.रामकृष्णौ कथं प्रत्यरुन्धताम् ?

५.रामकृष्णौ कथम् अपचक्रतुः ?

६.बल–अबलसूचकं युद्धं पश्यन्त्यः पौरयोषितः परस्परम् किम् आलपन् ?

### ७.३.८.२.चाणूर–मुष्टिकयोः हननम् :–

**(मूलम्)** ११३.एवम् आलपन्तीषु अङ्गनासु भगवान् चाणूरं हन्तुम् ऐच्छत्। वज्रघातसमैः भगवद्–गात्र– निष्पातैः हीनबलः चाणूरः नितरां ग्लानिम् अवाप। तेन अत्यन्तं क्रुद्धः सः चाणूरः श्येनः इव भगवन्तम् उपद्रुत्य, उभौ अपि करौ मुष्टीकृत्य भगवन्तम् उरसि अताडयत्। अथापि (अथ अ अपि) मालाहतः द्विपः इव भगवान् तेन प्रहारेण अचलितः तं बाह्वोः निगृह्य बहुशः भ्रामयन्, क्षीणजीवितं तं तरसा भूपृष्ठे पातयामास। तेन च सः अपगत–असुः अभवत्। एवं बलभद्रेण मुष्टिना तलेन च दृढम् अभिहतः मुष्टिकः अपि रन्ध्राभ्यां रुधिरम् उद्वमन् यमसदनं प्राप।

**(विवरणम्)** अयं वाक्यसमुदायः,श्रीकृष्णः चाणूरं हन्ति,बलरामःमुष्टिकं च हन्ति इति विषयद्वयं बोधयति। मल्लरङ्गे अनुकूलतया प्रतिकूलतया च उपस्थितानां जय जय ध्वानाः प्रचलन्ति। अत्रान्तरे एव भगवान् चाणूरं हन्तुम् इच्छति। वज्रघातसमैः श्रीकृष्णस्य आघातैः चाणूरः हीनबलः नितरां ग्लानिम् आप्नोति। सः चाणूरः श्येनः इव भगवन्तं उपद्रवति।

उभौ अपि करौ मुष्टीकृत्य कृष्णं उरसि ताडयति। मालाहतः द्विपः इव श्रीकृष्णः तेन प्रहारेण ईषत् चलति। तथापि श्रीकृष्णः अनुपदम् एव बलं सन्तनोति। चाणूरं बाह्वोः निगृह्णाति। बहुशः भ्रामयति। क्षीणजीवितं करोति। भूपृष्ठे पातयति। सः चाणूरः मृतः भवति। बलभद्रः अपि मुष्टिना शिरसि प्रहरति। तं त्यक्तजीवितं करोति। सः च रन्ध्राभ्यां रुधिरम् उद्वमति। प्राणान् त्यजति। यमसदनं याति।

**स्वावलोकनप्रश्नाः**

१.चाणूरः कथं नितरां ग्लानिम् अवाप ?

२.अत्यन्तं क्रुद्धः सः चाणूरः भगवन्तं किम् अकरोत् ?

३.भगवान् कथं अचलितः ?

४.भगवान् कथं चाणूरं पातयामास ?

५.मुष्टिकः कथं यमसदनं प्राप ?

### ७.३.८.३.इतरमल्लानां निहननम् -कंसस्य क्रोधनम् :-

**(मूलम्)** ११४. तदनु समर-सन्नद्धं कूटनामानं मल्लं रामः लीलया वाममुष्टिना अवधीत्। अनन्तरं समराय समागतौ शल-तोलकौ श्रीकृष्णः भुवि पातयित्वा अमारयत्। अन्ये मल्लाः स्वप्राण-रक्षणार्थं पलायाञ्चक्रुः। एवं पञ्चसु मल्लेषु हतेषु प्रवृद्धं समर-दुन्दुभि-तूर्य-निर्घोषम्, जन-कोलाहलम्, करतालध्वनिं च निशम्य, कंसः एवम् अवादीत्- ' दुर्वृत्तौ इमौ राम-कृष्णौ पुरात् निष्कासयत। गोपानां च धनम् अपहरत। दुर्मतिं नन्दम् अपि बध्नीत। एवं वसुदेवः, परपक्षीयः पिता उग्रसेनः च, हन्येताम्' इति।

**(विवरणम्)** अयं वाक्यसमुदायः कंसस्य असहनम्,उद्रेकम्,क्रोधं च वर्णयति। अनन्तरं युद्धाय आगतं कूटनामानं मल्लं रामः वाममुष्टिना प्रहृत्य मारयति। युद्धाय आगतौ शल-तोलकौ कृष्णः भुवि पातयित्वा मुष्टिभिः ताडयति। अन्ये मल्लाः प्राणपरित्राणाय पलायन्ते। जनकोलाहलं करतालध्वनिं च कंसः शृणोति। असहनम् उपैति। उद्रिक्तः भवति। क्रुद्धः भूत्वा जनान् एवं आदिशति। 'बलराम-कृष्णौ दुर्वृत्तौ, पुरात् निष्कासयत। गोपानां च धनम् अपहरत। दुर्मतिं नन्दं बध्नीत। वसुदेवं उग्रसेनम् अपि घ्नन्तु' इति स्वपुरवासिनः प्रेरयति।

**स्वावलोकनप्रश्नाः**

१.कूटः कः ? तं कः अवधीत् ? कथम् अवधीत् ?

२.श्रीकृष्णः कौ अमारयत् ? कथम् अमारयत् ?

३.रामकृष्णौ कति मल्लान् अमारयताम् ?

४.अत्र कंसस्य दुर्वचांसि कानि ?

### ७.३.९.कंसस्य वधः :-

**(मूलम्)** ११५.एवं विकत्थमाने कंसे, भगवान् देवकीसुतः शिला-विभङ्गैः मृगराजशाबः अद्रिशिखरम् इव क्लुप्तेन सोपानपथेन समुन्नतं मञ्चम् अधिरुरोह। समीपम् आपतन्तं च तं वीक्ष्य धृत-चर्म-असिः आसनात् उद-तिष्टत्। खङ्गपाणिम् आशु विचरन्तं तं यदुकुलपांसनं कंसम्, उरगं तार्क्ष्यसुतः इव केशग्राहं समाकृष्य, भूमौ पातयित्वा, जवेन तस्य उपरि मृगेन्द्रः इव निपत्य, अपगत-असुम् अकरोत्। ततः स्व-भ्रातरि कंसे निहते सति, तत्-प्रतिचिकीर्षया तस्य अनुजाः कङ्ग-न्यग्रोधकादयः अष्टौ भगवन्तम् अभ्यधावन्।तथा युद्धाय समुद्यतान्अष्टौ आपतत्-भ्रातॄन् रोहिणीसुतः परिघम् उद्यम्य अमारयत्। एवं कंसे तदनुजेषु च निहतेषु तत् योषितः मल्लरङ्गम् आसाद्य बहुधा व्यलपन्। भगवान् आश्वास्य च ताः सर्वाः मातुलान्यः, हतानां तेषाम् और्ध्वदैहिकम् अकारयत्।

**(विवरणम्)** अयं वाक्यसमुदायः कंसस्य वधं वर्णयति। राम-कृष्णौ क्रमशः कंसं क्षीणबलं कुरुतः। कंसः राम-कृष्णयोः शौर्यं पराक्रमं च न सहते। क्रुद्धः भवति। राम-कृष्णौ दूषयति। आत्मनः स्तुतिं च करोति। श्रीकृष्णः कंसस्य आत्मप्रगल्भनं शृणोति। किशोरः(सिंहशाबकः) अद्रेः शिखरम् इव, सोपानस्य मार्गेण कंसेन अधिष्ठितं मञ्चम् आरोहति। समीपम् आपतन्तं श्रीकृष्णं योद्धुं, कंसः चर्म असिश्च धरति। आसनात् उत्तिष्ठति। श्रीकृष्णः यदुकुलपांसनं तं कंसम्, उरगं गरुत्मान् इव, केशग्राहं समाकर्षति। भूमौ पातयति। तस्य उपरि पतति। मुष्टिभिः प्रहरति। अपगतासुं च करोति। सोदरं निहतं दृष्ट्वा कंसानुजाः कङ्क-न्यग्रोधकादयः अष्टौ भगवन्तं अभिधावन्ति। तान् रौहिणेयः रामः परिघम् उद्यम्य मारयति। भगवान् मातुलान्यः आश्वास्य हतानां और्ध्वदैहिकं कारयति।

**स्वावलोकनप्रश्नाः**

१.श्रीकृष्णः कंसं कथं समाकृष्टवान् ?

२.कंसस्य उपरि श्रीकृष्णः कथं निपतितवान् ?

३.कंसस्य भ्रातरः कति ? ते च के ? तान् कः अमारयत् ?

### ७.३.१०. मातापितरौ उद्दिश्य राम-कृष्णयोः उपसर्पणम् :-

**(मूलम्)** ११६. तदनु पितरौ उग्रसेनं च बन्धनात् मोचयित्वा पितरौ राम-कृष्णौ ववन्दाते। अथापि(अथ अपि) तौ जगत्-ईश्वरौ विज्ञाय देवकी-वसुदेवौ शङ्कया तौ न परिषस्वजाते। तत् एतत् विज्ञाय भगवान् जन- मोहिनीं मायां तयोः ततान। ततः सरामः श्रीकृष्णः आनत-शिरस्कः पितरौ उपेत्य 'हे तात! नित्य-उत्कण्ठितयोः अपि युवयोः बाल्य-पौगण्डक-किशोरादि-अवस्थासु यादृशं सुखं अन्यैः उपलभ्यते तादृशं सुखं युवाभ्यां दिष्ट्या नैव (न अ एव) लब्धम् आसीत्। समर्थः अपि यः मातरं पितरं वृद्धं भार्यां साध्वीं सुतं प्रपन्नं च न अबिभ्रत् सः श्वसन् अपि मृतः इति धर्मविदः वदन्ति। न एतावत् युवयोः शुश्रूषा-लाभः आसीत्। अपराधः अयं क्षम्यताम् इति भगवता उक्ते, तत् -मायामोहितौ पितरौ तम् अङ्कम् आरोप्य, मूर्ध्नि उपघ्राय, प्राकृतम् इव बालकं परिष्वज्य, नितरां ननन्दाते। एवं पितरौ आश्वास्य मातामहम् उग्रसेनं यदूनां नृपं कृत्वा 'हे महाराज ! अस्मान् आज्ञापय। भृत्ये मयि उपासीने सति, तव विबुधाः अपि बलिम् आहरन्ति। किमुत मर्त्याः? इति अवोचत्। किञ्च कंसभयात् देशान्तर-गतान् यदु-वृष्णि-अन्धक-दाशार्हादीन् समाश्वास्य, तान् स्व-स्व-गृहेषु न्यवासयत्।

**(विवरणम्)** अयं वाक्यसमुदायः, कंसस्य वधानन्तरं राम-कृष्णौ, मातापितरौ देवकी-वसुदेवौ उपसर्पतः इत्यंशं वर्णयति। राम-कृष्णौ पितरौ उग्रसेनं च बन्धनात् मोचयतः। पितरौ नमस्कुरुतः। 'राम-कृष्णौ जगदीश्वरा' इति विज्ञाय पितरौ न परिष्वजतः। भगवान् जनमोहिनीं मायां तयोः वितनोति। बलराम-श्रीकृष्णौ पितरौ उपसरतः 'हे तात! बाल्य-पौगण्ड- किशोराद्यवस्थासु यादृशं सुखं अन्यैः लब्धम्, तादृशं सुखं युवाभ्यां न लब्धम्। समर्थः अपि यः मातरं पितरं वृद्धं भार्यां साध्वीं सुतं प्रपञ्चं च न भरन्ति, सः जनः श्वसन् अपि मृत एव' इति धर्मविदः वदन्ति। एतावत् पर्यन्तं पितरौ युवाम् न शुश्रूषितवन्तौ स्तः। अपराधः अयं क्षम्यताम्' इति वदतः। मायया मोहितौ पितरौ श्रीकृष्णम् अङ्कम् आरोपयतः। मूर्धानम् उपजिघ्रतः। परिष्वजतः। नितराम् आनन्दं प्रापुतः। मातामहं उग्रसेनं यदूनां नृपम् करोति। कंसभयात् यदु-वृष्णि-अन्धक-दाशार्हाः परित्यज्य देशान्तरं गच्छन्ति। तान् समाश्वास्य स्वेषु गृहेषु वासयति च।

**स्वावलोकनप्रश्नाः**

१.'देवकी-वसुदेवौ तौ न परिषस्वजाते' अत्र 'तौ' कौ ?

२.देवकी-वसुदेवौ किमर्थं तौ न परिषस्वजाते ?

३.राम-कृष्णौ यदूनां नृपं कं चक्रतुः ?

४.कंसभयात् देशान्तरात् आगताः राजानः के?

### ७.३.११.व्रजं प्रति नन्दस्य गमनम् :-

**(मूलम्)** ११७.अथ राम-कृष्णौ नन्दं समासाद्य, समालिङ्ग्य, ' हे तात! युवाभ्याम् आवां भृशं पोषितौ लालितौ च। सः पिता, सा च जननी यौ अनौरसम् अपि औरसं पुत्रम् इव पोषयतः। अतः आवां न क्वापि भवन्तौ विस्मरावः। कञ्चित् कालं सुहृदां प्रियं विधाय ज्ञातीन् द्रष्टुं व्रजम् एष्यावः' इति उक्त्वा अमूल्यवस्त्र- आभरणादि-दानेन सव्रजं नन्दं तोषयित्वा विससर्ज। सः अपि बाष्प-परिप्लुत-ईक्षणः सानन्दं भगवन्तमालिङ्ग्य गोपैः सह व्रजं जगाम।

**(विवरणम्)** अयं वाक्यसमुदायः, कंसस्य वधानन्तरं नन्दःगोपैः सह व्रजम प्रयति इत्यंशं वर्णयति। राम- कृष्णौ नन्दस्य सकाशम् आगच्छतः। तम् आलिङ्गतः। अनन्तरं च 'हे तात! युवभ्याम् आवां भृशं पोषितौ, लालितौ च। अनौरसम् अपि औरसपुत्रम् इव आवां पोषयतः। अतः आवां न कदापि भवन्तौ विस्मरावः। कञ्चित् कालं मित्राणां प्रियं कृत्वा, ज्ञातीन् द्रष्टुं व्रजम् एष्यावः' इति विज्ञापयतः। ततः अमूल्यवस्त्र - आभरणादि-दानेन सव्रजं नन्दं तोषयतः। नन्दः अपि आनन्दति। परं राम-कृष्णयोः वियोगं न सहते। तस्य नेत्रे बाष्पेन परिप्लुते भवतः। यथा कथञ्चित् धैर्येण गोपैः सह व्रजं गच्छति च।

**स्वावलोकनप्रश्नाः**

१.औरसम् -अनौरसम् इति अनयोः अर्थः कः ?

२.'आवां न क्वापि भवन्तौ विस्मराम'अत्र 'आवाम्' कौ ? 'भवन्तौ' च कौ ?

३.'हे तात!...व्रजम् एष्यावः' इदं कस्य वचनम् ? कं प्रति वचनम् ?

## ७.३.११.१.राम-कृष्णयोः अध्ययनम् - गुरुदक्षिणासमर्पणम् :-

**(मूलम्)** ११८.अथ वसुदेवः अपि पुत्रयोः राम-कृष्णयोः स्व-गुरुणा अन्यैः च ब्राह्मणैः विधिवत् द्विजाति- संस्कारम् अकारयत्। ब्राह्मणेभ्यः च गो-हिरण्यादिरूपाः दक्षिणाः प्रादात्। सर्वज्ञौ अपि, जगद्गुरू अपि, तौ लोकप्रबोधाय गुरु-उपसदनम् इच्छन्तौ सर्वज्ञं सान्दीपनिं नाम गुरुं वारणास्याम् उपसेदतुः। तत्र चतुष्-षष्ठिभिः दिवसैः वेद-वेदाङ्गानि, चतुषष्ठिकलाः च उपदेशमात्रेण अग्रहीष्टाम्। तदनु गुरुदक्षिणायै आभ्यां प्रार्थितः सान्दीपनिः स्वपत्न्याः काक्षितं दत्तम्, इति अवोचत्। सा अपि कदाचित् प्रभासक्षेत्रे वारिनिधौ मृतं बालकम् अयाचत। तदा रथ-आरूढौ राम-कृष्णौ संयमिनीपुरं गत्वा, तत्र यमेन सम्पूजितौ। तेन दत्तं गुरुपुत्रम् आदाय गुरुपत्न्यै समर्प्य, नितरां तौ अतोषयताम्। ततः स्व-पुत्र-लाभेन नितरां संतृप्तेन गुरुणा गूरुपन्त्या च अनुज्ञातौ दत्त-आशिषौ राम-कृष्णौ अति-रहसा रथेन मथुरापुरम् आजग्मतुः।

**(विवरणम्)** अयं वाक्यसमुदायः, राम-कृष्णयोः विद्याभ्यासं, तयोः गुरुदक्षिणासमर्पणं च वर्णयति। वसुदेवः राम-कृष्णयोः स्वगुरुणा विधिवत् द्विजजातिसंस्कारं कारयति। ब्राह्मणेभ्यश्च गो-हिरण्यादि-रूपाः दक्षिणाः प्रददाति। सर्वज्ञौ अपि बालकौ लोकप्रबोधाय च गुरोः कुले वसतः।वसुदेवः राम-कृष्णौ सन्दीपनेः गुरोः सकाशं वाराणसींप्रेषयति। तत्र चतुष्-षष्ठि-दिनेषु तौ वेद-वेदाङ्गानि, चतुष्-षष्ठिकलाश्च उपदेशमात्रेण स्वीकुरुतः। राम-कृष्णौ गुरुदक्षिणायाः स्वीकरणाय सान्दीपनिं याचतः। 'स्वपत्न्याः काङ्क्षितं कुरुतम्' इति गुरुः आदिशति। सा अपि प्रभास-क्षेत्रे समुद्रे मृतं बालकम् याचति। राम-कृष्णौ यमपुरं गच्छतः। तत्र यमेन पूजितौ भवतः। गुरुपुत्रम् आनयतः। गुरुपत्न्यै समर्पयतश्च। गुरुः सदारः स्वपुत्रलाभेन नितरां सन्तृप्तः भवति। गुरुणा गुरुपत्न्या च अनुज्ञातौ रथेन मधुरापुरीम् आगच्छतः।

**स्वावलोकनप्रश्नाः**

१.द्विजातिसंस्कारः नाम कः ?

२.'जगद्गुरू अपि ता' अत्र 'तौ' कौ ?

३.'जगद्गुरू अपि तौ' किमर्थं गुरुम् उपसेदतुः ?

४.सान्दीपनिः कां गुरुदक्षिणाम् अवोचत् ?

५.संयमिनीपुरं किम् ?

## ग्रन्थस्य उपसंहारः

**(मूलम्)** इति श्रीमत्-गौतमगोत्र-उद्भवेन व्याकरणालङ्कारेण महामहिमोपाध्यायेन कलाप्रपूर्णेन वेङ्कटेश्वरशास्त्रिणा विरचिते भगवत्-कृष्णचरिते प्रथमः खण्डः, श्री गोपालकृष्णपरब्रह्मार्पणम् अस्तु।

समर्पिता कृतिः इयं भक्त्या गोपालमूर्तये।
उद्धरेत् कृपया सः अयं मग्नं मां भवसागरे। इति शम्।

**(विवरणम्)** इदं खण्डान्तगद्यम्। अयं च कश्चन प्रक्रियानिर्वहणसम्प्रदायः अस्ति। प्रति खण्डस्य अन्ते रचयितुः परिचयः अत्र लभ्यते। तथा हि- अस्य कृष्णचरितस्य रचयिता वेङ्कटेश्वरशास्त्री महोदयाः। अयं गौतमसगोत्रे उद्भूताः। व्याकरणशास्त्रम् अधीतवन्तः। महामहोपाध्याय-कलाप्रपूर्ण बिरुदाभ्यम् अलङ्कृताः च। संसारसागरे मग्नम् आत्मानम् (रचयितारम्) उद्धर्तुं कृष्णचरितं विलिख्य गोपालकृष्णपरब्रह्मणे अर्पयति।

## ७.४.उपसंहारः

एवम् अत्र विद्याधरवृत्तान्तम्,शङ्खचूडस्य निहननम्,वृषभासुरसंहरणम्, राम-कृष्णयोः निहननाय कंसस्य उद्यमनम्, अक्रूरसहायस्य अभ्यर्थनम्, केशिनिहनन्, अक्रूरस्य श्रीकृष्णातिथ्यम्, मथुरापुरी-गमनाय प्रस्थानम्, सुदाम्नः अनुग्रहणम्, कुब्जायाः अनुग्रहणम्, धनुषः भञ्जनम् च, मल्लयुद्ध-विशारदानां मल्लरङ्ग-प्रवेशनम्, हस्तिनः हस्तिपकानां च हननम्, राम-कृष्णयोः नारायण-अंश-सम्भूतत्वम्, श्रीकृष्ण-चाणूरयोः संवादः, कंस- चाणूरयोः, बलराम-मुष्टिकयोः च मल्लयुद्धः, चाणूर-मुष्टिकयोः हननम्, कंसस्य क्रोधनम्, कंसस्य वधः, माता-पितरौ उद्दिश्य राम-कृष्णयोः उपसर्पणम्, व्रजं प्रति नन्दस्य गमनम्, राम-कृष्णयोः अन्तेवासित्वम्, गुरुदक्षिणा च इति एते अंशाः वर्णिताः। एते च विषयाः पाठकानां सरलसंस्कृतगद्यस्य पठनोद्देश्यं साधयितुं प्रभवन्ति। पौराणिककथांशानां बोधनाय समर्थाः भवन्ति। विशिष्य कंसवधवृत्तान्तं मनसि स्थापयितुं शक्ताः भवन्ति।

## ७.५.अभ्यासः

अ).श्रीकृष्णः अक्रूरं कथम् अनुगृहीतवान् ?

इ).मधुरायां श्रीकृष्णः कान् कान् कथम् अनुगृहीतवान् ?

उ).श्रीकृष्णः कथं कंसं संहृतवान् ? तत् कंसवधस्य वृत्तान्तं सङ्क्षिपत ?

# UNIT-VIII
# व्यासात्मकाः प्रश्नाः

**संरचना**

८.१.परिचयः
८.२.लक्ष्याणि
८.३.व्यासात्मकाः प्रश्नाः
८.३.१.श्रीकृष्णस्य अवतारः
८.३.२.श्रीकृष्णस्य शैशवम्
८.३.३.श्रीकृष्णस्य बाल्यक्रीडाः
८.३.४.ब्रह्मणः गर्वभञ्जनम्
८.३.५.कालियमर्दनम्
८.३.६.कात्यायनीव्रतम् (गोपिकावस्त्रापहरणवृत्तान्तम्)
८.३.७.विप्रभार्याणाम् अनुग्रहणम् – विप्राणां गर्वापनोदनम्
८.३.८.गोवर्धनस्य उद्धरणम्
८.३.९.श्रीकृष्णस्य रासलीलाः
८.३.१०.सुदर्शनचरितम् (विद्याधरवृत्तान्तम्)
८.३.११.कंसस्य वधः
८.४.उपसंहारः
८.५.अभ्यासः

## ८.१.परिचयः

Diploma in Sanskrit Examination मध्ये, आहत्य पञ्च पत्राणि सन्ति। तत्र इदं प्रथमं पत्रम्। अस्य शतं १०० अङ्काः भवन्ति। अत्र विषयद्वयं भवति। तत्र'कृष्णचरितम्' इत्ययमन्यतरः। इदम् आधुनिकगद्यं परिचयं करोति। पौराणिक-कथाकथन-प्रक्रियां प्रति अवगाहनां कल्पयति। परीक्षपत्रे अयं प्रथमभागत्वेन निर्णीतः अस्ति। एतस्य कृते चत्वारिंशत् ४० अङ्काः भवन्ति। अत्र आहत्य त्रयः प्रश्नाः समाधेयाः वर्तन्ते। तेषु व्यासात्मकतया कथावर्णनपरौ द्वौ प्रश्नौ लेखनीयौ विद्येते। एकैकस्य च दश अङ्काः विद्यन्ते। एवम् आहत्य व्यासात्मकप्रश्नानां समाधानलेखनाय विंशति अङ्काः सन्ति। तदर्थं विद्यार्थिनां कृते, अत्र

पाठ्यांशे, अभ्याससम्पादनं भवति। इदं च पत्रं गद्यपठनस्य परिचयसम्पादनाय निर्दिष्टम् अस्ति। तदैव गद्यमाध्यमेन पौराणिककथांशानां ज्ञानम् अपि अत्र आर्जितं भवति।

## ८.२.लक्ष्याणि

सामान्यतः पाठ्यभागस्य अध्ययने कोणद्वयं भवति। जीवनाय उपयोगः इति अयम् एकः कोणः। सः वैयक्तिक-जीवन-लक्ष्यं साधयितुं समर्थः भवति। द्वितीयः कोणः परीक्षादृक्पथम् (Examination Point Of View)। इदं परीक्षायाः उत्तीर्णतायै आवश्यकं भवति । प्रस्तुतम् अयं पाठ्यांशः परीक्षादृष्ट्या विद्यार्थिनां कृते सज्जीकृतः अस्ति। कथं वा प्रश्नानां समाधानम् इति मनसि निधाय पाठ्यांशं परीक्षादृष्ट्या अपि प्रणालिकाबद्धं पठति। प्रश्नपत्रे प्रश्नानां व्यासात्मकतया कथाकथनरूपेण समाधानस्य लेखनम् इति अन्यतमः प्रश्नः कश्चित् अस्ति। तस्य समाधानाय आवश्यकः सन्नाहः अत्र सम्पाद्यते। एतत् पाठ्यांशस्य अध्ययनेन –

- संस्कृतगद्यस्य लेखनस्य कौशलं वर्धितं भवति।
- संस्कृतगद्यस्य अवगमनाय सामर्थ्यं विस्तृतं भवति।
- संस्कृतगद्यस्य रचनाकौशलं विकसितं भवति।
- आधुनिकगद्यमाध्यमेन पौराणिककथांशानाम् अध्ययनं आर्जितं भवति।
- आधुनिकगद्यमाध्यमेन भाषायाम् भावव्यक्तीकरणकौशलं अधिगतं भवति।
- वाक्यरचनाद्वारा लेखनकौशलं सम्पादितं भवति।
- आलोचनां कर्तुम् अवकाशं कल्पितं भवति।
- परीक्षादृक्पथम् अभ्यसितं भवति, आर्जितं च भवति।

## ८.३.व्यासात्मकाः प्रश्नाः

### ८.३.१.श्रीकृष्णस्य अवतारः :-

द्वापरयुगस्य अन्तिमः कालः प्रचलति। तस्मिन् काले असुरांशेन अधार्मिकाः असङ्ख्याकाः राजानः सम्भवन्ति। एतेषु कंस-साल्व-शिशुपाल-जरासन्धादयः प्रमुखाः। ते च स्वीयक्रौर्येण, पारुष्येण, दुष्प्रवर्तनेन, दुष्परिपालनेन च भुवः पीडां जनयन्ति। प्रकृतिम् असह्यां कुर्वन्ति। तेन भूः भारभूता भवति। भूमाता तेषां दौष्ट्यं चिरं सोढुम् अशक्ता भवति। अश्रुमुखी सती ब्रह्माणं शरणं गच्छति। ब्रह्मा अपि देवैः परमेश्वरेण च सम्भूय विष्णोः सकाशं गच्छति। तत्र ब्रह्म-रुद्र-पुरस्सराः देवाः वेदसूक्तैः विष्णुं स्तुवन्ति। आश्रितवत्सलः विष्णुः आकाशवाणीं प्रसारयति। आकाशवाण्याः भाषणं ब्रह्मा अवगच्छति। विषयं विजानाति च। परमेशवरप्रमुखान् उद्दिश्य एवं वदति- 'हे देवाः! अयम् अर्थः(आगमनप्रयोजनम्) पुरुषोत्तमेन प्राक् एव अवगतः किल। भूमेः रक्षणाय भगवान् वसुदेवगृहे अवतरिष्यति। अनन्तःउ शेषः, वासुदेवस्य अग्रजः

भविष्यति। विष्णुमाया अपि कार्यार्थं अंशेन जनिष्यति ' इति वदति। उपस्थिताः देवगणाः सर्वे विषयं जानन्ति, निष्क्रमन्ति च।

**देवकी-वसुदेवयोः विवाहः :-**

पुरा शूरसेनः नाम यदुपतिः मधुरान् शूरसेनान् च देशान् पालयति स्म। अतः सर्वेषां यादवानां मधुरा राजधानी भवति। देवकः उग्रसेनस्य अग्रजः। वसुदेवः देवकस्य सुतां देवकीं परिणयति। नवोढां तां स्वगृहं नयति। उग्रसेनस्य सुतः कंसः। तस्य देवक्यां वात्सल्यम् अधिकम्।अतः विवाहानन्तरं देवकी-वसुदेवयोः गृह- प्रापणाय कंसः स्वयं रथसारथ्यं वहति। देवकी-वसुदेवौ रथम् अधिरोहतः। कंसः रथं चोदयति। त्रयः विनोदेन उल्लासेन च गच्छन्ति।मार्गमाध्ये आकाशवाणी कंसम् आह्वयति ' अरे! मूर्ख! अस्याः तव सोदर्याः अष्टमः गर्भः त्वां हनिष्यति' इति वदति।

**देवक्याः हननाय कंसस्य उद्यमनम् :-**

खलानाम् अकार्यं किं भवति। कंसः भयेन आकुलः भवति। सः कंसः आगामिनः अपायात् आत्मानं रक्षितुं चिन्तयति। सद्यः एव देवकीं हन्तुं सिद्धः भवति। असिं धरति। देवकीं केशग्राहम् आकर्षति। तेन दुष्प्रवर्तनेन वसुदेवः नितरां खिन्नः भवति। किमपि कर्तुं न शक्नोति। अत्कष्टेन तस्मात् प्रयत्नात् कंसं निवर्तयितुम् उद्युक्तः भवति। विश्वासवचनैः कंसम् आलोचयति। वसुदेवस्य समाश्वासनम् तात्कालिकात् अपायात् विमोचयितुं वसुदेवः -'महाभाग! देवक्याः संतानात् खलु भवतः अपायः। एषा तु अबला, नवोढा, तव भगिनी। एनां हन्तुं न युक्तं भवति। अस्यां जातं जातं संतानं अवश्यं तव प्रदास्यामि' इति वाग्दानं करोति। कंसः सहेतुकं वसुदेवस्य वचनं शृणोति।विश्वस्तः भवति। सोदर्याः हननप्रयत्नात् निवृत्तः भवति।

गच्छता कालेन देवकी प्रदमम् अपत्यम् आप्नोति। वसुदेवः जातमात्रं तं कंसाय अर्पयति। कंसः आकाशवाण्यां विशावसं प्राप्नोति। वसुदेवस्य सत्यनिष्ठां प्रशंसति। संतुष्टः सन् - 'युवयोः अष्टमगर्भात् एव मे मृत्युः। अस्मात् मे भयं नास्ति। अतः कुमारः अयं स्वीकरोतु ' इति वसुदेवं वदति । तत् श्रुत्वा वसुदेवः सन्तुष्टः सुतम् आददाति। स्वभवनम् गच्छति।

नारदभाषितम् कदाचित् कालत्रयवेदी नारदः कंसस्य -'वसुदेवाद्याः वृष्णयः, देवक्याद्याः स्त्रियः, नन्दादयः गोपाः तत्-स्त्रियश्च देवताप्रयाः। तव ज्ञातयः असुराः। भवान् अपि प्राक् विष्णुना हतः कालनेमिः। इदानीं तव संहराय विष्णुः देवक्यां अवतरिष्यति ' इति वदति। रुष्टः कंसः देवकीं वसुदेवं च निगलैः स्वभवने निगृह्णाति। तयोः षट् पुत्रान् हन्ति। स्वपितरं उग्रसेनम् अपि बध्नाति। स्वयं सिंहासनम् अधितिष्ठति।

**भगवतः अवतरणम् :-**

कंसेन चोदिताः प्रलम्ब-चाणूरादयः यादवान् पीडयन्ति। तेन भीताः यादवाः कुरून्,पाञ्चालान् आश्रयन्ति। वसुदेवस्य अपरा पत्नी रोहिणी अपि नन्दगृहे यशोदया सह अवतिष्ठते । कंसः षट् पुत्रान् हन्ति। देवकी सप्तमं गर्भं धरति। भगवता आदिष्टा योग माया देवक्याः जठरात् शेषाख्यं धाम सन्निकृष्य रोहिणी जठरे क्षिपति।पौराः तु देवक्याः गर्भस्रावः जातः इति भावयन्ति।

**कंसस्य वितर्कः :-**

महाविष्णुः जगतः सृष्टि-स्थिति-लयान् अनुतिष्ठति। सः अंशेन वसुदेवस्य मनः आविशति। तत्-मनसः धाम देवकीं प्रविशति। साग्निगर्भा शमी इव नितरां राजते। विष्णोः मनसः धाम, स्वप्रभया सकलम् अपि भुवनं विरोचयति।कंसः तत्-धाम धृतवतीं देवकीं पश्यति। 'ध्रुवं मे प्राणहरः अस्याः जठरे अस्ति। इदानीम् एव एतां अहं हन्यां तदा स्त्रीहत्यादोषेण, विशेषतः गर्भिण्याः हननेन, आयुः श्रीः यशश्च विनश्यति। यशोहीनं मां (कंसम्) अन्ये अपि परित्यजन्ति। अतः प्रसूतिपर्यन्तं प्रतीक्ष्ये ' इति चिन्तयति। तदारभ्य आसीनः अपि तिष्ठन् अपि, भुज्यमानः अपि,पर्यटन् अपि कंसः तम् एव हृषीकेशं मनसा चिन्तयत् सर्वं विष्णुमयं पश्यति।

**कृष्णावतारः :-**

कालः परमशोभनः, दिशः प्रसन्नाः,वसुधा मङ्गलभूयिष्ठा, श्रावणमासः, रोहिणीनक्षत्रम्, कृष्णपक्षः, अष्टमी तिथिः, निशीथसमयः, एवंगुणविशेषणविशिष्टे ब्रह्मदेवताके शुभप्रदे मुहूर्ते देवक्यां महाविष्णुः अवतरति। तदा देवदुन्दुभयः नदन्ति। पुष्पवृष्टिश्च भवति। वसुदेवः अवतीर्णं पश्यति। 'साक्षात् भगवान् अवतीर्णः' इति विजानाति। मनसा ब्राह्मणेभ्यः अयुतं गोदानम् आचरति।

**भगवतः विश्वरूपसन्दर्शनम् :-**

वसुदेवः अपत्यवात्सल्येन-'हे सुरेश्वर! कंसः आकाशवाणीद्वारा मम गृहे भवतः अवतरणं शृणोति। भवतः अग्रजान् हन्ति। अद्य भवतः अवतरणं श्रुत्वा हननाय आगच्छति'इति कंसजं भयं भगवते निवेदयति। देवकी अपि'कंसात् भीतान् अस्मान् पाहि! शङ्खचक्रादियुतम् अलौकिकम् इदं रूपं जहातु' इति विज्ञापयति।

**वसुदेवस्य पूर्वजन्मकथनम् :-**

भगवान् देवकीं प्रति -' त्वम् एव पूर्वजन्मनि पृश्निः। अयं च वसुदेवः सुतपनामा प्रजापतिः। यदा ब्रह्मा युवां प्रजासृष्टौ नियमयति। तदा माम् उद्दिश्य दिव्यवर्षसहस्राणि तपः

आचरतः। तेन अहम् परितुष्टः अस्मि। वरं प्रदातुम्,अनेनैव रूपेण,भवतोः पुरतः आविर्भूतः। 'वरं वृणोतु' इति मया भवन्तौ आदिष्टौ। भवन्तौ भवन्तौ मत्-मायामोहितौ स्तः। युवां सन्तानेन रहितौच भवतः। मोक्षं विहाय, मादृशं पुत्रं वृणुतः।अहं तथा इति अङ्गीकृतवान्। मादृशस्य द्वितीयस्य अभावात् इदानीम् अहम् एव पुत्ररूपेण अवतीर्णः अस्मि। द्वितीये जन्मनि अदिति-कश्यपयोः युवयोः उपेन्द्रनाम्ना जनिं लब्धवान्। वामनः इति ख्यातिं प्राप्तवान्। तृतीये जन्मनि भवतोः कुमारः आसम्। अलौकिकम् इदं रूपं प्राक्-जन्मस्मरणाय युवयोः दर्शितम्। अतः मां पुत्रत्वेन ब्रह्मभावेन च चिन्तयन्तौ परां गतिम् अवाप्स्यथ। कंसात् भयं अस्ति चेत् मां गोकुलं नयतु। यशोदतनयां मायां आनयतु। द्वाराणि स्वयमेव विवृतानि भवन्ति। यमुना अपि मार्गं दास्यति' इति अभयं कथयति। एवम् निवेद्य, विष्णुः , सद्यः एव प्राकृतिकः शिशुः भवति।

**योगमायायाः आविर्भावः :-**

गृहपालाः सूतिकागृहे शिशोः रोदनं शृण्वन्ति। कंसाय देवक्याः प्रसवनं निवेदयन्ति। सःअनुपदम् एव तल्पात् शीघ्रम् उत्तिष्ठति। सूतिकागृहं प्रविशति। देवकी हननाय उद्यतं भ्रातरं पश्यति। सुतां बाह्वोः उपगूहति। 'हे भ्रातः! इयं तव स्नुषा। बहवः पुत्राः हिंसिताः। एनां हन्तुं नार्हसि। अहं तव सोदरी मह्यम् एनां चरमजां दातुम् अर्हसि' इति अतिदीनं याचति। सः देवक्याः वचनं न शृणोति। तस्याः हस्तात् शिशुम्आकृष्यति। शिलापृष्ठे दृढम् क्षिपति। सद्यः एव सा स्त्रीशिशुः योगमायारूपेण गगनम् आक्रमति। कंसम् ' रे मूढ! मम हननेन किं प्रयोजनम्। तव अन्तकः कुत्रचित् जातः एव। दीनाम् इमां देवकीं मा हिंसीः' इति वदति।कंसः तत् शृणोति। परं विस्मितः भवति। देवकीं वसुदेवम् -'भाव! सोदरि! आकाशवाण्याः वाक्ये प्रत्ययात्, युवयोःसन्ततिं सम्पूर्णतया नाशितवान्। कान् वा लोकान् इह प्रेत्य गमिष्यामि। क्षन्तव्यः अयं मे अपराधः' इति क्षमां याचति। पादयोः निपतति। सान्त्वयति। आश्वासयति। बन्धनात् मोचयति च।

**गोकुले जन्मोत्सवः :-**

व्रजे नन्दः पुत्रस्य जन्मना आनन्दितः भवति। वेदविदः विप्रान् आह्वयति। शिशोः स्वस्त्ययनं जातकर्मादिसंस्कारं च शास्त्रोक्तपद्धत्या कारयति। धेनूनाम् अयुतं विप्रेभ्यः प्रयच्छति। इतरदानानि अपि करोति। कुमारोदयेन नन्दे उत्साहः जायते। तदारभ्य नन्दव्रजम्, हरेः सान्निध्येन, सर्वसमृद्धं जातम्।

## ८.३.२.श्रीकृष्णस्य शैशवम्

**पूतनायाः संहारः :-**

देवक्याः अष्टमः गर्भः श्रीकृष्णः। सः कंसं हनिष्यति इति आकाशवाणी वदति। कृष्णः नन्दगोपस्य गृहे वर्धते।कंसः आत्मनः संहारकः शिशुः कुत्र अस्ति इति न जानाति। शिशुमारणं कर्तव्यम् इति बालघातिनीं पूतनां नियोजयति। एषा काचन राक्षसी, पुर-ग्राम-व्रजादिषु

अनिर्दशान् निर्दशान् च शिशून् हन्ति। कामरूपिणीइयम्। रमणीयं स्त्रीरूपं स्वीकरोति। नन्दव्रजम् आगच्छति। शिशून् विचिनोति। भस्मना आछन्नम् अग्निम् इव स्थितं कृष्णरूपं हरिं पश्यति। चर-अचररूपः श्रीकृष्णः अपि बालघातिनीं जानाति एव। तथापि अज्ञातः इव बालभावेन तिष्ठति। सा तम् अर्भकम् अङ्कम् आरोप्य, सविषं स्तन्यं पाययितुम् आरभते। यशोदा-रोहिण्यौ पूतनां सामान्य -स्त्रियं भावयन्ति। परं तत्प्रभया मोहिते भवतः। बालकृष्णः सरोषः कराभ्यां तस्याः स्तनौ गाढं पीडयति। स्तन्येन समं पूतनायाः प्राणान् अपि पिबति। सा राक्षसी 'मुञ्चतु ! मुञ्चतु !' इति उच्चैः आक्रोशति। पूतनयाः रोदन- ध्वनिना द्यौः मही च चलति। दिशश्च प्रतिनदन्ति। व्रजवासिनः अशनिशङ्कया भूमौ पतन्ति। सा निशाचरी प्राणान् त्यजति। निजं रूपं प्राप्नोति। अधः पतति। तस्याः कलेबरपातेन क्रोशयुगपर्यन्तं स्थिताः वृक्षाः चूर्णिताः भवन्ति। तस्याः मुखे उग्राः दंष्ट्राः वर्तन्ते,तस्याः नासिका गिरेः कन्दरैः समाना अस्ति,तस्याः स्तनमण्डलं गण्डशैलं स्मारयति। शिरसि केशाः रक्ताः, प्रकीर्णाः च विद्यन्ते। तस्याः उदरं तोयेन शून्यं ह्रदः इव अस्ति। व्रजवासिनः गोपाः गोप्यश्च एतत् विकृतं शरीरं पश्यन्ति। भयं यान्ति। बालकः तु पूतनायाः कायस्य उपरि अकुतोभयः सन् क्रीडति। गोप्यः सम्भ्रमेण शिशुं स्वीकुर्वन्ति। मातरौ च समन्तात् गोपुच्छभ्रमणेन, अङ्गेषु गोमूत्रेण स्नानं कारयित्वा केशवादि द्वादशनामभिः रक्षां कुर्वन्ति। तदनन्तरं यशोदा पुत्रं पाययित्वा पर्यङ्के शाययति।

नन्दादयः मधुरातः तदैव समागच्छन्ति। तत् दृष्ट्वा ज्ञानिना वसुदेवेन कथितं सत्यम् एव आसीत् इति चिन्तयति। व्रजनिवासिनः पूतनाकलेबरं परशुभिः खण्डशः कुर्वन्ति, दहन्ति च।शिशोः स्पर्शनेनैव पूतनायाः सर्वाः पापाः निरस्ताः। पापानाम् अपनोदनानन्तरं दह्यमानस्य पूतनायाः देहस्य धूमः कालागरुसौरभं वहति। जिघांसया समागता अपि, आत्मनः स्तन्यस्य दानात्, भगवान् पूतनायाः अपि सद्गतिम् एव अनुगृह्णाति।

**शकटस्य भञ्जनम् :-**

कदाचित् व्रजे बालकृष्णस्य अङ्गपरिवर्तन-जन्मर्क्ष-महोत्सवं प्रचलति। गीत वाद्यादिकं प्रवर्तते। यशोदा व्रजस्त्रियः समाह्वयति। सुतस्य स्वस्ति-अयनादिपूर्वकम् अभिषेचनम् कारयति। सः अभीष्ट-वस्त्र-आभरणादिना, गोदानैश्च ब्राह्मणान् पूजयति। निद्रानिमीलितनेत्रं कृष्णं शकटस्य अधस्तात् शाययति। तन्महोत्सवसंरभव्यापृता यशोदा स्तनार्थिनं रुदन्तं बालकं न पश्यति। बालभावतया उत्क्षिप्तचरणघतेन चक्राक्षकूबरं विपर्यस्तं भवति। तेन च सन्निहितानि भाण्डानि भग्नानि भवन्ति।

तत्-महाध्वनेः रोहिणी-यशोदा-नन्दादयः प्रकम्पिताः भवन्ति। विस्मयेन तत्र आगच्छन्ति। कथम् अयं शकटः कारणं विनैव स्वयं विपर्यस्तः भवति इति चिन्तयन्ति। उत्पातशङ्कया विषादं प्राप्नुवन्ति। गोपबालकाः तु समीपे एव वर्तन्ते। रुदतः, पादौ उत्क्षिपतः,

अस्य पादघातेन अयं विपर्यस्तः इति ते कथयन्ति। भगवतः कृष्णस्य सामर्थ्यं न विजानन्ति। बालभावम् एतत् इति गोपबालकानां वचः न विश्वसन्ति। यशोदा रुदन्तं बालकम् हस्तयोः आददाति। विप्रैः स्वस्ति-अयनं कारयति। स्तन्यं ददाति। शकटं च यथास्थानं स्थापयन्ति। दधि-अक्षत-कुशाभिः शकटं पवित्रं कुर्वन्ति। नन्दः अपि सुतस्य अरिष्टपरिहाराय शान्तिहोमादिकम् कारयति।

**तृणावर्तः :-**

कदाचित् यशोदा बालकृष्णम् अङ्के आरोप्य लालयति। हठात् बालकृष्णः पर्वतशिखरवत् भारभूतः भवति। तं वोढुम् असमर्था भवति। सा शिशुं भूमौ स्थापयति। उत्पातपरिहाराय परमेश्वरं प्रार्थयति। बालकृष्णम् आवहितः सः, कंसेन प्रेषितः राक्षसः। तस्य नाम तृणावर्तः। कंसः तम्, बालकृष्णं हन्तुम् नियच्छति। सः च चक्रवातरूपेण आगच्छति। बालकं हरति। चक्रवातेन दिशः पूरयति। क्षणे एव गोकुलं धूलिमयं करोति। तेन गोष्ठे सर्वत्र अन्धकारम् आवृणोति। पांसुवर्षः उपरतः भवति। तदनन्तरं कृष्णः न दृश्यते। यशोदा बालकस्य अदर्शनाय भृशं दुःखं प्राप्नोति। अन्याः गोप्यः अपि उच्चैः क्रोशन्ति। तत्र बालकृष्णः तु स्व-अपहारिणं तृणावर्तं गले दृढम् गृह्णाति। शरीरं वर्धयति। तृणावर्तः क्रमशः बालकस्य भारं वोढुम् अशक्तः भवति। तस्मात् आत्मानम् मोचयितुम् अक्षमः भवति। गगनात् भूमौ कठिनशिलायां पतति। तेन तृणावर्तस्य सर्वे अवयवाः संचर्णिताः भवन्ति। लोचने निर्गते भवतः। मुखात् वाक् न आयाति। अपगत-असुः च भवति। तस्य उरसि बालकः मृत्युमुखात् विनिर्गत इव आस्ते। बालकं वीक्ष्य यशोदा, नन्दः, गोप्यश्च परमं सन्तोषं प्राप्नुवन्ति। सर्वथा खलः स्वपापेन हिंसितः भवति। साधुस्तु स्वकर्मणैव भयात् विमुक्तः भवति इति एवं बहुधा अपायात् मुक्तं बालकृष्णं प्रशंसन्ति।

**नामकरणम् :-**

गर्गः यदूनां पुरोहितः,सः च महातपाः। वसुदेवः गर्गं नन्दव्रजं गन्तुं चोदयति।एवं वसुदेवेन प्रचोदितः गर्गः कदाचित् नन्दव्रजं गच्छति। गर्गस्य आगमनाय नन्दः सन्तुष्टः भवति। प्रत्युत्थाय कृताञ्जलिः तं। सादरं स्वीकरोति।नन्दः आतिथ्यम् अनुतिष्ठति। सुखम् उपवेशयति।सत्करोति।अनन्तरम् - 'भगवन् त्वं ब्रह्मविदां श्रेष्ठः। नृणां ब्राह्मणः, जन्मना गुरुः। अतः अनयोः कुमारयोः द्विजजातिसंस्कारं कर्तुम् अर्हसि इति' प्रार्थयति।

गर्गः-'अहं यदूनाम् आचार्यः इति प्रसिद्धः। यदि अनयोः संस्कारं कुर्यां तदा तव वसुदेवस्य च मैत्रीं, अशरीरवाचम् अनुसृत्य अष्टमः गर्भः न स्त्री, पुरुषः एव, इति विचिन्त्य कंसः एनं हन्यात् । तदा महान् अनर्थः आपतेत्' इति वदति। नन्दः तु - 'भगवान् मामकैः अपि अलक्षितः अत्र वसामि। अतः गूढं संस्कारं कुरु' इति पुनः प्रार्थयति। गर्गः संस्कारम्

आचरति। गुणैः अभिरामः इति रोहिणीपुत्रस्य 'रामः' इति नाम करोति। अस्य बलाधिक्येन 'बलः' इति नाम्ना, यदूनाम् ऐकमत्यसाधनेन 'संकर्षणः' इति नाम्नापि व्यवहारं सूचयति। यशोदातनयः कृष्णवर्णतया 'श्रीकृष्णः' इति नाम भजते। प्राक्उप्रथमं वसुदेवेन ज्ञातत्वात् 'वासुदेवः' इत्यपि नामान्तरं भवति। 'गुणकर्मानुसारेण बहूनि नामानि सन्ति। तानि सर्वाणि नामानि अन्ये अपि जनाः न जानन्ति। अयं कृष्णः ते व्रजस्य श्रेयः आधास्यति। तव अयं आत्मजः साक्षात् नारायणसमः। अतः एनं संरक्षतु' इति अभिनन्द्य गर्गाचार्यः गच्छति।

**८.३.३.श्रीकृष्णस्य बाल्यक्रीडाः :-**

नन्दव्रजे राम-कृष्णौ मुग्ध-विलोकितौ स्तः। स्मितेन सुन्दरौ भवतः। व्यक्तवचनैः व्रजौकसःविशेषेण आकर्षतः। जानुचङ्क्रमणैः जनन्योः व्रजसुन्दरीणां च सन्तोषं जनयतः च। राम-कृष्णौ इतस्ततः पर्यटन्तीः व्रजस्त्रियः अनुसरन्ति। कतिचित् पदानि गच्छन्ति। भीतौ इव पुनः परावृत्य मात्रोः अन्तिकं गच्छतः। मातरौ आलिङ्ग्य स्तन्यं पिबतः। गोवत्सैः इतस्ततः अनुकृष्यमाणौ तौ अवेक्षमाणाः व्रजस्त्रियः गृहव्यापारान् विस्मरन्ति, प्रहसन्ति, नन्दन्ति च।राम-कृष्णौ जानुचंक्रमणैः पुनः पुनः इतः ततः पर्यटतः। जल-अग्नि-कण्टक-द्रुमेभ्यः तौ निवारयितुम् अनुक्षणं व्यग्रमानसे भवतः। तेन तन्मातरौ गृहकर्माणि यथापूर्वं निवर्तयितुं न शक्नुवतः।

**श्रीकृष्णस्य दौष्ट्यानां निवेदनम् :-**

कदाचित् व्रजस्त्रियः कृष्णम् उद्दिश्य मातुः सकाशे - 'अतिचपलः अयम् अर्भकः। अदोहनकाले गोवत्सान् मोचयति। मधुरं पयश्च रहस्यम् अत्ति। अवशिष्टं मर्कटेभ्यः विभजति। यत्र कुत्रापि गृहे यदि द्रव्यं न प्राप्नोति तत्र प्रसुप्तान् अर्भकान् ताडयति, आक्रोशयति, गच्छति। शिक्यादिनिक्षिप्तानां दधि-पयो-भाण्डानां ग्रहणाय पीठकादीन् उपयुङ्क्ते। तेषाम् अलाभे लोष्ठादिना भाण्डानि सच्छिद्राणि करोति'- इति कथयन्ति। जननी तु प्रेमातिशयेन शृण्वती प्रहसन्ती तूष्णीम् आस्ते।

**व्रजाङ्गनानां व्रीडनम् :-**

कदाचित्, गोप्यः स्वगृहाणि प्रविशन्ति। सरहस्यं नवतीतादि भक्षयन्तं बालकृष्णं पृथक् पृथक् गृह्णन्ति। तस्य दौष्ट्यं निवेदितुं यशोदानिकटम् आयान्ति। तदा बालकृष्णः विनयेन विधेयतया मातुः समीपे उपविशन् अस्ति। व्रजस्त्रियः तत् पश्यन्ति। किमपि वक्तुं न पारयन्ति। लज्जया एव निवर्तन्ते।

**यशोदायाः विस्मयः :-**

कदाचित्, गोपबालकाः यशोदानिकटम् आयान्ति। 'कृष्णः मृदम् भक्षयति' इति कथयन्ति। माता बालकं करे गृह्णाति,निर्भर्त्सयति। 'कुतः त्वं रहः मृदं भक्षयसि। तव भ्राता

‘



अपि तथैव वदति’ इति पृच्छति। कृष्णस्तु –‘अम्ब अहं मृदम् न भक्षयामि। एते सर्वे असत्यं वदन्ति’ इति वदति। ‘तर्हि मुखं व्यादेहि’ इति माता पृच्छति। कृष्णः मुखं व्याददाति। तस्य मुखे यशोदा ‘साब्धिद्वीपां वसुन्धराम्,नभोमण्डलम्,रसातलम् इत्यादि कृत्स्नं भूगोलम्, सव्रजम् आत्मानं च’ पश्यति। किम् अयं स्वप्नः, उत देवमाया, आहोस्वित् मम चित्तमोहः, उत अर्भकस्यैव जन्मसिद्धः आत्मयोगः इति वितर्कयति। जगत्–उत्पत्ति–स्थिति–लय–कारणः अयं साक्षात् परमेश्वरः इति जानाति। नमस्करोति। भगवान् पुनः मायां व्यतनोति। तथा नष्टमतिः यशोदा पुनः पुत्रम् अङ्कम् आरोपयति, मुखं चुम्बति च।

**उलूखले बन्धनम् – विद्याधरयोः मुक्तिः :-**

कदाचित्, यशोदा कृष्णस्य बालक्रीडाः गायन्ती दधि मथ्नाति। स्तन्यकामः कृष्णः मातुः समीपम् एति। मातरं मन्थनात् वारयति। सा तत् विरमति। बालकं स्तन्यं पाययति। अत्रान्तरे अग्नौ अधिश्रितं क्षीरं तप्तं सत् बहिः उद्गच्छति। बालकं अङ्कात् अधः अवरोपयति। क्षीरस्य अवश्रयणाय यशोदा गच्छति। बावकृष्णः कुपितः भवति। पाषाणखण्डेन दधिभाण्डं भिनत्ति। अन्तः गत्वा नवनीतम् अश्नाति।बहिः गच्छति। उलूखले उपविशति। मर्कटेभ्यः हैयङ्गवीनम् ददाति। यशोदा वेत्रं गृहणाति। तम् अनुधावति। पाणिना प्रकर्षन्तं भयविह्वलेक्षणं तं उलूखले बद्धुं प्रयतते। बन्धनाय गृहीतं दाम द्व्यङ्गुलेन ऊनम् भवति। तत्सन्धानाय अन्यस्य आदाने, तदपि द्व्यङ्गुलेन ऊनं भवति। एवं बहुवारं प्रयत्नं करोति। तथापि तदेव भवति। नन्दपत्नी विस्मिता भवति। बन्धनप्रयासे माता परिश्रान्ता भवति। अतः उच्छ्वसति। मातरं वीक्ष्य भक्तवत्सलः कृष्णः स्वच्छन्देन बद्धः भवति। भवः, ब्रह्मा, लक्ष्मीः वा ईदृशम् अनुग्रहं न प्राप्नुवन्ति।

एवं स्वयं उलूखले बद्धः बालकृष्णः उलूखलेन साकं सालवृक्षयोः मध्यदेशं गच्छति। तौ सालवृक्षौ धनद– आत्मजौ नलकूबर–मणिग्रीवौ। श्री–मद–अन्धौ एतौ, वारुणी–मद–मत्तौ स्त्रीजनेन साकं दिगम्बरौ मन्दाकिन्याःजले स्नानं कुरुतः। नारदः यदृच्छया तत्र आगच्छति। स्त्रियः तं पश्यन्ति। ससम्भ्रमं वासांसि धरन्ति। अविधेयतया यक्षकुमारौ एतौ विवस्त्रौ एव आस्ताम्। तदनुग्रहाय नारदः तौ – ‘ युवां लोकपालस्य पुत्रौ भूत्वा अपि, श्री–मद– अन्धौ विगतवस्त्रौ मां न जानीथः, अतः स्थावरौ भवन्तु। मदनुग्रहात् दिव्यवर्षानन्तरं वासुदेवदर्शनं प्राप्य स्वर्ग– लोके भक्तौ भविष्यथः’ इति शपति। अधुना बालकृष्णः वृक्षयोः मध्ये तिर्यक् भूतं उलूखलं यदा तरसा आकर्षति, तदा द्वौ वृक्षौ प्रचण्डशब्देन समूलं भूमौ पततः। तस्मात् दिव्यपुरुषौ उत्तिष्ठतः। तौ बालकृष्णं प्रणमतः। बहुधा स्तुतिं कुरुतः च। अनन्तरम् उत्तरां दिशं गच्छतः च।

वृक्षपतनम् आकर्ण्य नन्दादयः समागच्छन्ति। वृक्षस्य पतनहेतुं न जानन्ति। विस्मयम् एष्यन्ति। तत्रत्याः गोपबालकाः वास्तववृत्तान्तं कथयन्ति। बालकृष्णेन तरोः उन्मूलनं न घटते इति बालकानां वचः नैव विश्वसन्ति। अपरे तु संदिग्धचेतसः भवन्ति। नन्दः उलूखलं समाकर्षन्तं, दाम्ना बद्धं बालकृष्णं बन्धनात् मोचयति।

**८.३.४.ब्रह्मणः गर्वभञ्जनम् :-**

श्रीकृष्णः वने वयस्यैः साकं भोजनं करोति। अत्रान्तरे वत्साः सुदूरं वनान्तरं प्रविशन्ति। तेषां गवेषणाय बालकृष्णः स्वयम् एव गच्छति। ब्रह्मा अघासुरमोक्षणं पश्यति। विस्मितः भवति। भगवतः गोपालकृष्णस्य महिमान्तरं ज्ञातुम् इच्छुः भवति। वत्सान् वत्सपान् च नयति। अन्तर्दधाति। श्रीकृष्णः शैलेषु गुहासु वनेषु सर्वत्र विचिन्वति। कुत्रापि तान् न पश्यति। पुनः सरोवरतीरम् आगच्छति। तत्र वत्सपालान् अपि अदृष्ट्वा सर्वम् इदं ब्रह्मणा अनुष्ठितम् इति अवगच्छति। गोपजननीनाम् अबाधाय, ब्रह्मणश्च प्रमोदाय, मायया नूतनान् गाः गोपालान् च सृजति। वत्सानां वत्सपानां च आकार-वेष-भाषासु वैलक्षण्यं किञ्चित् अपि न भवति।

एवं सर्वस्वरूपः भगवान् दिनान्ते आत्मरूपैः वत्सैः व्रजं प्रविशति। गावः स्वान् स्वान् वत्सान् लिहन्ति। स्नेह-प्रस्नुतं क्षीरम् पाययन्ति।गवां वत्सेषु, गोपीनां वत्सपेषु,मातृता यथापूर्वम् अस्ति। इदीनीं स्नेहाधिक्यं च भासते। एवं भगवान् वत्स-गोपबालक-व्याजेन आत्मानं पालयन् वने गोष्ठे एकं वर्षं बलकृष्णः विधिना क्रीडति।

कदाचित्,वत्सान् चारयन् सरामः कृष्णः वनं प्रविशति। ब्रह्मणा गुप्ताः गावः गोवर्धनपर्वते तृणार्थं चरन्ति। ते गावः व्रजस्य अनतिदूरे चरतः वत्सान् स्नेहपरवशाः प्रस्नुतं पयः पाययन्ति। रामस्तु जातं वृत्तान्तं नजानाति। किम् इयं दैवी आसुरी मानुषी वा माया इति चिन्तयति। अन्ते कृष्णस्यैव माया इति निश्चिनोति। ज्ञानचक्षुषा, सर्वान् वत्सान्, सवयसः सर्वान् अपि, कृष्णमाया इति पश्यति। पुरा 'वत्साः ऋषीणाम् अंशाः, वत्सपालाः देवानाम् अंशाः इति अजानम्। इदानी सर्वं त्वत्-मयम् एव इति अज्ञासिषम्' इति कृष्णं वदति।

ब्रह्मा तृटिमात्रकाले(संवत्सरकाले) आगच्छति। यथापूर्वं क्रीडन्तं श्रीकृष्णं पश्यति।'गोकुले स्थिताः वत्साः गोपाश्च मन्मायामोहिताः अद्यापि न पुनः उत्थिताः। तेभ्यः एते इतरे वर्तन्ते। एते कुत्रत्याः' इति तर्कयति। चिरम् एवं ध्यात्वा 'एते कृष्णमायया सृष्टाः' इति जानाति। ब्रह्मा आश्चर्यचकितः भवति। कृष्णः स्वमायारूपां तिरस्करिणीम् अपसारयति। ब्रह्मा कृष्णस्य साष्टाङ्गपातं नमस्कारम् आचरति। बाष्पगद्गदया गिरा -

**'नौमि ईड्य! ते अभ्रवपुषे तटित्-अम्बराय,गुञ्जावतंस-शिखिपिच्छिल-सत्कचाय। वन्यस्रजे कबल-वेत्र-विषाण-वेणु-लक्ष्मश्रिये मृदुपदे व्रजपाङ्गजाय'**।। इति स्तौति।

'हे भगवन्! मनो-वाक्-कायैः भवन्तं नमस्यन्तः ये जीवन्ति तेषां त्वां दर्शनयोग्यः। हे प्रभो! श्रेयस्साधनं तव भक्तिं विहाय ये ज्ञानाय क्लिश्यन्ते तुषावघातिनाम् इव तेषाम् अपि क्लेशः एव शिष्यते। हे अच्युत! योगेन अपि अनवाप्यं ज्ञानं योगिनः भक्त्या एव प्राप्नुवन्ति। यासां तृप्तये त्वं वत्स-वत्सपालरूपेण अद्यापि असि ताः व्रजवनिताः गावः अतीव धन्याः। अहो! व्रजौकसां भाग्यम्, सनातनं ब्रह्म त्वं मित्रम् असि ' इति अनेकधा स्तुत्वा पितामहः स्वधाम गच्छति।

**८.३.५.बृन्दावने विहरणम् :-**

राम-कृष्णौ षष्ठम् अब्दं पौगण्डनामानं वयः प्रप्नुतः। सखीभिः गाः चारयतः। बृन्दावनं पूततमं कुरुतः। गोपबालकाः वत्सान् पुरतः कुर्वन्ति। वेणुं नादयन्ति। स्वयशः गायन्ति। तादृशैः सहचरैः परिवृतः बालकृष्णः कुसुमाकरं बृन्दावनं प्रविशति। बृन्दावने भ्रमराः मञ्जुघोषं कुर्वन्ति। मृगाश्च निर्भीकं सञ्चरन्ति। आकम्पनेन- पद्मानां गन्धः सर्वत्र व्याप्नोति। सः गन्धः मनांसि भृशं हरति। कृष्णः बलदेवम्- 'अमी तरवः पल्लवैः अरुणश्रियं पुष्णन्ति। फलानां प्रसूनानां च भारेण नमन्ति। त्वत्-पादयुगलं नमस्कुर्वन्ति। एते मधुकराः तव यशः गायन्ति। मुनिगणाः, वने गूढम् अपि चरन्तं आत्मरूपिणं त्वां न त्यजन्ति। शिखिनः मुदा नृत्यन्ति। हरिण्यः अपि गोप्यः इव त्वां मनोहरं पश्यन्ति। कोकिलाः अपि सूक्तैः गृहम् आगताय भवते प्रियं आदधति' इति बृन्दावनं वर्णयति। सविनोदम् सहचरैः आलापतः। सरस्तीरेषु अद्रिकन्दरेषु विहरतः।

कदाचित् क्रीडनेन बलरामः श्रान्तः भवति। गोपानाम् उत्सङ्गे निद्राति। तदा कृष्णः अग्रजं बलरामं पादसंवहनादिना विश्रामयति। नृत्यतः गायतः योयुध्यतः गोपबालकान् हस्ते गृह्णाति, प्रशंसति। क्रीडाभिः परिश्रान्तः सन् गोपालकृष्णः कुत्रचित् वृक्षमूले एव शेते। सहचराः केचन कृष्णस्य पादसंवहनं कुर्वन्ति। अपरे व्यजनैः वीजयन्ति। अन्ये तच्चरितानि गायन्ति। एवं कृष्णरूपी महाविष्णुः स्वमायया ग्राम्यैः साकं ग्राम्यवत् बृन्दावने विहरति।

**८.३.६.कालियमर्दनम् :-**

कदाचित् कृष्णः बलरामेण विना अन्यैः सखिभिः कालिन्दीं गच्छति। गावः गोपाः च पिपासवः भवन्ति। पिपासया आर्ताः विषेण दूषितं कालिन्द्याः जलं पिबन्ति। पीताः ते सर्वे, मूर्च्छाम् आप्नुवन्ति। कृष्णः तान् पश्यति। अमृतवर्षिणा स्वस्य ईक्षणेन तान् जीवयति। गोपबालाः आप्त-जीविताः भवन्ति। ते दुष्टजलपानेन मृताः इति जानन्ति। परं ते गोविन्दस्य (बालकृष्णस्य) अनुग्रहेण प्रत्युज्जीविताः इति चिन्तयन्ति।

कालियः कश्चन विषसर्पः। कालिन्द्यां तस्य आवासः कश्चन ह्रदः अस्ति। कालियस्य आवासेन सरः विषपूर्णं भवति। सरसः विषप्रभावेण उपरि चरन्तः पक्षिणः अपि म्रियन्ते। तीरगाः प्राणिनः द्रुमाश्च विषाग्निना म्रियन्ते। इदानीं तस्य जलं पीत्वा गोपाः गावः च मृतिं

प्राप्नुवन्ति। बालकृष्णः (वासुदेवः) विषेण दूषितं तं ह्रदं पश्यति। ह्रदात् कालियं निष्कासयितुम् इच्छति। तीरस्थं कदम्बवृक्षम् अधिरोहति। तस्मात् सरसः जले अभि– पतति। करिकलभः इव सर्वं सरः अवलोडते। यथेच्छं विहरति च। कालियः अभिपतन–अवलोडन–विहरणानां ध्वनिं शृणोति। बलात् उत्तरति।पीतकौशेयवाससं बालकृष्णं अतिरुषा मर्मसु दशति।सर्वं शरीरं भोगेन वेष्टयति। तत्–दृष्ट्वा गोपबालकाः भृशम् आर्ताः भवन्ति, रुदन्ति, भुवि निपतन्ति।

नन्दादयः गोपवृद्धाः, एकतः गोकुले महतः उत्पातान् पश्यन्ति। तान् दृष्टौ निदधति। अन्यतः अग्रजेन विना गोचारणाय गतं बालकृष्णं स्मरन्ति। शोकेन भयेन च आतुराः भवन्ति। तस्य निधनं शङ्कन्ते। कृष्णं द्रष्टुम् इच्छन्ति। गोकुलात् निर्गच्छन्ति। पदक्षेपान् पश्यन्ति, अनुसरन्ति, कालिय–सरस्समीपम् आगच्छन्ति। अन्तर्जले भुजगः कालियः भोगैः बालकृष्णस्य सकलानि अवयवानि परितः वेष्टयति। तीरे मूढधियः गोपबाल– कान् पशून् च पश्यन्ति। भृशं दुःखिताः भवन्ति। नन्दादयः सरसि प्रवेष्टुम् इच्छन्ति। किन्तु बलभद्रः तान् प्रतिषेधति।

सर्वं गोकुलम् अत्महेतोः क्षुभ्यति इति बालकृष्णः अवगच्छति। शरीरं वर्धयति। उरगस्य वेष्टनात् उत्तिष्ठति। प्रवृद्धेन बालकृष्णस्य कायेन कालियस्य भोगाः भृशं व्यथिताः भवन्ति। कालियः अतिरुषा समुन्नमय्य, येन भोगेन बालकृष्णं (हरिम्) दष्टुम् इच्छति, बालकृष्णः (हरिः) अपि तं भोगम् नमयन् अन्तर्जले क्रीडति। कालियः अपि अवसरं प्रतीक्षते। तदनुसारेण बालकृष्णं वेष्टयति। श्रीकृष्णः फणान् अधिरोहति। कालियम् उग्रं नर्दति। देवाङ्गनाः,गन्धर्वाङ्गनाः च बालकृष्णस्य ताण्डवानुसारं स्तुति–गीतीः गायन्ति। मृदङ्ग–पण–वाद्यानि नादयन्ति। शतैकशीर्षः सः नागः यत् शिरः न नमते, तत् बालकृष्णः तीव्रं मर्दति। एवं तस्य चित्रताण्डवेन कालियस्य शरीरं नुन्नं भवति। मुखैः अक्षिभिः नासारन्ध्रैः च रक्तम् उद्वमति। मनसा आदिपुरुषं नारायणं शरणं गच्छति।

अच्युतस्य चरणघातेन कालियः अवनतशिरस्कः भवति। भार्याः पतिं कालियं क्षीणशक्तिम् अवगच्छन्ति। शोकेन दीनाः भवन्ति। ताण्डवकृष्णं पश्यन्ति। भगवन्तं दण्डवत् प्रणमन्ति। अञ्जलिं कुर्वन्ति। शरणं प्राप्नुवन्ति। 'भगवन्! अस्माकं पतिः भवतः अनन्तशक्तिं न जानाति। मूढः सन्, त्वयि अपराधं करोति। अस्माकं पतिं क्षमस्व। अस्माकम्= नः, पत्युः प्राणदानं विदधातु' इति याचन्ते।

कालियः भग्नशिरस्कः भवति। मूर्च्छति । नागपत्नीभिः सम्प्रार्थितः ताण्डवकृष्णः कालियं विसृजति। सः भगवतः कृपया लब्धप्राणः भवति। कृच्छ्रात् उच्छ्वसति। अञ्जलिं कृत्वा 'भगवन्! भवान् विलासर्थं अखिलं जगत् उत्पादयति। क्रूराम् अतितामसां दीर्घकोणां सर्पजातिम् अपि सृष्टवान् अस्ति। दुष्टजातिस्वभावेन जगत्–कारणं भगवन्तं त्वाम् अपि दष्टुं प्रयतितवान् अस्मि। क्षन्तव्यः अयं मम अपराधः। अनुग्रहं विदधातु' इति शरणं गच्छति।

ताण्डवकृष्णः कालियेन उक्तं वचनं शृणोति। 'भवता अत्र न स्थेयम्। सत्वरम् एव दारा-पुत्रैः समुद्रं यातु। गावः नराश्च इदं सलिलं पिबतु। गरुडभयेन रमणकद्वीपं विहाय अत्र त्वं अवात्सीः। इतः परं मत्-पदलाञ्छितं त्वां सुपर्णः न अद्यात' इति वरं ददाति। 'अस्मिन् ह्रदे यः स्नाति, देवादीन् तर्पयति, उपोष्य, यः भगवन्तम् अर्चयति, सः सर्वपापैः प्रमुच्येत' इति अपि कालिन्दीसरसः अपि गौरवं कल्पितवान्। नागराजः अपि पत्नीभिः सह भगवन्तम् अर्चयति। तेन अनुज्ञातः सपरिवारं समुद्रं गच्छति। ताण्डवकृष्णः ह्रदात् निष्क्रामति। आबालवृद्धं बालकृष्णं समालिङ्गति। गोपाः सन्तोषम् अनुभवन्ति। कृष्णप्रभावज्ञः बलरामः अनुजं परिष्वजति। विजयहासं करोति। नन्दादयः गोपवृद्धाः तं मूर्ध्नि जिघ्रन्ति। आशिषः ददति। यशोदा पुत्रं परिष्वजति। आनन्देन अश्रूणि मुञ्चति। गावः वत्साः वृषाश्च मुदं प्राप्नुवन्ति।

### ८.३.७.कात्यायनीव्रतम् (गोपिकावस्त्रापहरणवृत्तान्तम्) :-

बृन्दावने नन्दनन्दनः गाः चारयति। तदा हेमन्तः प्रविशति। तत्र प्रथमे मासि नन्दव्रजकुमारिकाः भगवते निवेदितं खादन्तः कात्यायनीव्रतं आचरन्ति। प्रतिदिनं उषःकाले समुत्तिष्ठन्ति। अन्योन्यं बाहून् बध्नन्ति। कृष्णचरितम् उच्चैः गायन्ति। कालिन्दीं स्नातुं गच्छन्ति। स्नानादिकं परिसमापयन्ति। सैकतीं कात्यायनीं प्रतिकृतिं कुर्वन्ति। सूर्ये उदयति सति -

**कात्यायनि! महामाये! महाभोगिनि! अधीश्वरि ।**
**नन्दगोपसुतं देवि! पतिं मे कुरु ते नमः।।**

इत्येवं जपन्तः प्रतिदिनं कात्यायिन्याः व्रतं आचरन्ति। एकस्मिन् दिने व्रजवासिनः गोपिकाः वस्त्राणि तीरे निक्षिपन्ति। कृष्णस्य चरितं गायन्ति। स्नानंकुर्वन्ति। भगवान् श्रीकृष्णः एतत् विजानाति। कात्यायनीव्रतस्य फलप्रदानाय अनुचरैः सह कालिन्दीतीरं गच्छति। गोपिकानां वस्त्राणि गृह्णाति। नीपवृक्षम् आरोहति। गोपबालैः सह प्रहसन् 'हे अबलाः! एकैकशः वा, मिलित्वा वा अत्र आगच्छतु स्व-स्व-वस्त्राणि गृह्णन्तु। अयं न परिहासः। यूयं व्रतेन कर्शिताः भवथ। अतः सत्यम् अहं ब्रवीमि' इति वदति। श्रीकृष्णस्य परिहासवचांसि शृण्वन्ति। भगवन्तम् 'हे श्याम सुन्दर! एवं मा कुरु। तव महत्तां वयं जानीमः। वयं ते दास्यः। वयं शीतेन प्रकम्पिताः स्मः। अस्माकं वासांसि ददातु। नो चेत् राज्ञे निवे- दयिष्यामः' इति विज्ञापयन्ति। श्रीकृष्णः 'यदि यूयं मे दास्यः मदुक्तं करिष्यथ। इह आगत्य स्ववस्त्राणि गृह्णन्तु। नो चेत् अहं न दास्यामि। निवेदितः अपि वृद्धः राजा किं करोति' इति गोपिकानां मनस्सु आन्दोलनम् अधिकं करोति।

ततः सर्वाः गोपदारिकाः पाणिभ्यां योनीः आच्छादयन्ति । शीताधिक्येन प्रकम्पन्ते। जलाशयात् तीरम् आगच्छन्ति। श्रीकृष्णः गोपिकाः पश्यति , ताः-'यूयं कात्यायनीव्रतं कुर्वन्ति। तदनादृत्य, अपि वस्त्ररहिताः स्नानं कुर्वन्ति। अतः तत्-पापनिवारणाय कराभ्यां नमस्कुर्वन्तु, वस्त्राणि स्वीकुर्वन्तु'इति विज्ञापयति। गोपिकाः श्रीकृष्णस्य वचः शृण्वन्ति।

नग्नस्नानाचरणम् अपराधम् इव भावयन्ति। श्रीकृष्णस्य वचः धर्मेण युक्तम् इव इति गोपिकानां भासते। भगवतः वाक्यं स्वीकुर्वन्ति। गोपिकाः एकेन हस्तेन गुह्याङ्गम् आच्छादयन्ति। अन्येन हस्तेन भगवन्तं प्रणमन्ति। तेनापि असन्तृप्तः श्रीकृष्णः पुनः गोपिकाः'यः एकेन पाणिना अच्युतं नमेत् तस्य करच्छेदः दण्डः इति धर्मविदः वदन्ति।अतः पापद्वयं सम्भवति। अतः पाणियुगलेन प्रणमन्तु वस्त्राणि स्वीकरोतु' इति बोधयति।

श्रीकृष्णस्य वचांसि शृण्वन्ति। व्रजाङ्गनाः नग्नस्नानाचरणम् अपराध इव भावयन्ति। व्रतस्य सम्पूर्णफलम् आप्तुम् इच्छन्ति। गोपिकाः सर्वपापहरं सर्वकर्मफलप्रदं भगवन्तं यथाविधि श्रीकृष्णं नमस्कुर्वन्ति। ततः वस्त्राणि गृह्णन्ति। वासांसि आच्छादयन्ति। तथापि श्रीकृष्णेण आकृष्टाः ते लज्जया तत्प्रदेशात् न चलन्ति। श्रीकृष्णश्च गोपिकानाम् आशयं विजानाति। भगवान् ' हे साध्व्यः! भवतीनां सङ्कल्पः मया विदितः। यमुद्दिश्य इदं कात्यायनीव्रतम् आरब्धम्, तत्फलं प्राप्स्यथ। मयि आवेशितचेतसां कामः पुनः कामप्ररोहाय न प्रभवति। सिद्ध-व्रतफलाः व्रजं याथ। काश्चित् रात्र्यः मया रंस्यथ' इति व्रतफलं प्रकटयति। एवं भगवता समादिष्टाः लब्धकामाः व्रजकुमारिकाः श्रीकृष्णं ध्यायन्त्यः व्रजं गच्छन्ति।

### ८.३.८.विप्रभार्याणाम् अनुग्रहणम् - विप्राणां गर्वापनोदनम् :-

एकदा सरामः श्रीकृष्णः, गोपालैः सह गाः चारयन्, बृन्दावनात् सुदूरं गच्छति। गाः पाययितुम् इच्छति। श्रीकृष्णः कालिन्दीं गच्छति। तत्र गाः पाययति। स्वयं जलं पिबति। गोपकुमारैः सह विहरन्, गाः चारयति। राम-कृष्णौ यमुनातटे उपविशतः। गोपबालकाः क्षुधार्ताः भवन्ति। खादितुं यत्किमपि आहारं याचन्ति। श्रीकृष्णः 'अत्र समीपे ब्रह्मवादिनः ब्राह्मणाः आङ्गिरसं सत्रं कुर्वन्ति। तत्र भवन्तः गच्छन्तु , मम नाम, बलरामस्य नाम च कथयन्तु, आहारं याचन्तु' इति सूचयति।

गोपबालकाः यागशालां गच्छन्ति। विप्रान् प्रणमन्ति। अञ्जलिं बद्ध्वा 'हे विप्राः! समीपे एव राम-कृष्णौ गाः चारयन्तौ स्तः। तौ बुभुक्षितौ वर्तेते। तयोः वचनात् वयमिह आगताः। तयोः आहारं ददातु' इति याचन्ति। तत्र वृद्धमानिनः ते विप्राः गोपबालकानां याचनां शृण्वन्ति। यज्ञमयं वासुदेवं, मानुषं गोपबालकं मत्वा परस्परं मुखानि अवलोकयन्ति, आम् इति वा, न इति वा, प्रत्युत्तरं न दास्यन्ति। निराशाः गोपाः प्रतिनिवर्तन्ते। ते ब्रह्म- विदां तूष्णीभावं कृष्णाय आवेदयन्ति च। श्रीकृष्णः प्रहस्य पुनः गच्छतु 'आवयोः नाम स्पष्टं श्रावयतु,मुनिपत्नीः आहारं याचध्वम्। ताः पर्याप्तं स्वाद्वन्नं दास्यन्ति' इति गोपान् सान्त्वयति,पुनः प्रेषयति च।

एवं सान्त्विताः गोपाः यागशालां गच्छन्ति। ऋषिपत्नीः नमस्कुर्वन्ति। भगवतः आहाराय, ऋषिपत्निभ्यः निवेदयन्ति। तत् आकर्ण्य ऋषिपत्न्यः चतुर्विधं भोजनं भाजनैः गृह्णन्ति। कृष्णदिदृक्षया पितृ-पति-पुत्रादिभिः प्रतिषिद्ध्यमानाः अपि यमुनाप्रदेशं गच्छन्ति। साग्रजं पीताम्बरं देवकीनन्दम् पश्यन्ति।

विप्रवनिताः, सर्वाः आशाः परित्यजन्ति। आत्म (श्रीकृष्ण) दिदृक्षया समागच्छन्ति। भगवान् ताः पश्यति। स्मितं करोति। ' हे महाभागाः! वः स्वागतम्। इतः उपविशन्तु। मां द्रष्टुं आगताः। विवेकिनः फल-अभिसन्धि- रहितां मयि परां भक्तिं कुर्वते हि। कृतार्थाः भवत्यः। देवयजनं गच्छन्तु। युष्माकं पतयः युष्माभिः आरब्धं सत्रं समापयिष्यन्ति ' इति वदति।

विप्रणां पत्न्यः 'भगवन्! मद्भक्तः नैव नश्यति इति वदसि खलु। आत्मदर्शिनः न पुनः आवर्तन्ते इति वेदवचनं सत्यं करोतु। वयं पितृ-पति-पुत्रादीनां वचांसि समुल्लङ्घिताः, त्वत्-पादमूलम् उपगताः। ते अस्मान् न गृह्णीयुः'इति श्रीकृष्णं विज्ञापयन्ति। 'मया अनुज्ञाताः भवदीयाः पतयः पितृ-भ्रातृ-सुतादयः, लोकाः, वा न अभ्यसूयन्ते। मनः मयि निधाय अचिरात् एव मां प्राप्स्यन्ति' इति भगवान् सान्त्वयति।

एवं भगवता प्रतिबोधिताः विप्रवनिताः पुनः देवयजनं गच्छन्ति। द्विजाः अपि तासु अकुपिताः सत्रं परिसमापयन्ति। तासु एका भर्त्रा निरादृता भवति। मनसा देवकीसुतं ध्यायति। कर्मानुबद्धं देहं विसृजति।, भगवत्-सन्निधिं प्राप्नोति। एवं श्रीकृष्णः, सम्पादितम् अन्नं गोपालान् आशयित्वा, स्वयम् अपि साग्रजः खादति।

विप्राः स्व-अपराधम्, स्त्रीणाम् अलौकिकीं भक्तिं च जानन्ति। नितरां पश्चात्तप्ताः भवन्ति। 'भगवत्-माया योगिनाम् अपि मोहिनी। वयं बहुश्रुताः, नृणां गुरवः, तथापि विमूढाः भवामः। असंस्कृतानां, अनभ्यस्तविद्यानां, आत्ममीमांसारहितानां नारीणाम् अपि जगद्गुरौ कृष्णे दृढा भक्तिः वर्तते। बहुश्रुतानाम् अपि अस्माकं न सञ्जातम्। वयं 'योगीश्वरः भगवान् विष्णुः यदुषु अववतार' इति श्रुणुमः । परं समीपम् आगतं पण्डितम्मन्यमानाः वयं न विद्मः' इति बहुधा अनुतापं प्राप्नुवन्ति। श्रीकृष्णम् स्तुवन्ति -'भगवन्, भवान् अवक्रबुद्धिविक्रमः, सदा वयं भवतः विधेयाः भवामः। बहुप्रतिभासम्पन्नाः अपि कर्मसु भ्रमाम् एव प्राप्नुमः। स्व-माया-मोहित-आत्मनः, अविज्ञात-अनुभावान् अस्मान् क्षन्तुम् अर्हसि' इति स्तुवन्ति। स्व-अपराधस्य क्षमाम् प्रार्थयन्ति।

### ८.३.९.गोवर्धनस्य उद्धरणम् :-

राम-कृष्णौ बृन्दावने गोपबालकैः सह सविनोदं कालं यापयन्तौ स्तः। एवं स्थिते कदाचित् इन्द्रस्य सन्तृप्त्यै , इन्द्रयागस्य अनुष्ठानाय संनाहः प्रचलति। नन्दादयः वृद्धाः समागच्छन्ति। श्रीकृष्णः इन्द्रयागस्य वैशिष्ट्यं जानाति, तथापि, अविदितः इव श्रीकृष्णः, स्वपितरम् ' तात! कोऽयं सम्भ्रमः? कम् उद्दिश्य यागः क्रियते ? कानि साधनानि ? किं तस्य फलम् ? ' इति पृच्छति।

नन्दः अपि बालकृष्णम् 'भगवान् इन्द्रः एव पर्जन्यः। तदात्ममूर्तयः मेघाः। मेघाः सर्वप्राणिभ्यः जलं अभिवर्षन्ति। अतः तत्सिद्धैः एव द्रव्यैः जलदातारम् इन्द्रं नराः पूजयन्ति।

अयं परम्परागतः आचारः। यः परम्परागतम् एनम् अज्ञानात् विसृजेत् सः पापं प्राप्नुयात्। मङ्गलं च न प्राप्नोति' इति कथयति।

तत् आकर्ण्य कृष्णः शतक्रतोः= इन्द्रस्य, कोपम् उत्पाद्य तस्य अहङ्कारं अपहर्तुम् इच्छति। स्वभाववादम् प्रबोधयति। 'सर्वः अपि जन्तुः कर्मणा एव उत्पत्ति-स्थिति-लयान् प्राप्नोति। कर्मणा एव सुख-दुःखे लभ्येते। भय-अभये च लभ्येते। कर्मातिरिक्ततया ईश्वरः नास्ति। यदि अन्यः कर्मफलप्रदः कर्मलिप्ता वा ईश्वरः अस्ति इति अङ्गीक्रियते, सः अपि अन्यं कर्तारम्, सः अपि अन्यं कर्तारम् इति अनवस्था दोषः सम्भवति। यदि जीवराशिः कर्मपरतन्त्रः इति अङ्गीक्रियते, तदा कर्मणा एव फलसिद्धेः, अतिरिक्ततया ईश्वरस्य अङ्गीकारः व्यर्थः एव। कर्म एव दैवतम्। वयं गवां पालकाः,गवां पालनम् अस्माकं वृत्तिः। अस्माकं जनपदाः, ग्रामाः वा न सन्ति। वयं वनशैलवासिनः। अतः गवाम्, ब्राह्मणानाम्, अद्रेश्च यागः अनुष्ठेयः। मृष्टान्नदानेन दक्षिणाभिः ब्राह्मणान् अर्चयामः। तृणदानेन गाः पूजयामः। बलिना अद्रिं पूजयामः। स्वभावतः एव रजोगुण-समुत्पादितः मेघः जलम् अभिवर्षीति' इति विपुलां चर्चां करोति। तत् आकर्ण्य नन्दादयः गोपवृद्धाः तथैव मखं समापयन्ति। गोधनैः साकं गोवर्धनस्य प्रदक्षिणं कुर्वन्ति। इन्द्रः श्रीकृष्णेन चर्चितम् अवगच्छति। आत्मनं न्यूनीकरोति इति चिन्तयति। नितरां क्रुद्धः भवति। संवर्ताख्यं मेघगणम् आह्वयति। ' नन्दादयः व्रजौकसः लक्ष्मी-मद-अन्धाः बालिशं वाचालं पण्डितम्मन्यं श्रीकृष्णम् आश्रयन्ति, मां तिरस्कुर्वन्ति। अतः तेषां श्रीमदं पशुनाशेन हरन्तु। अहम् अपि ऐरावतम् आरुह्य मरुद्गणैः अनुसरामि ' इति वदति। मेघगणाः निरन्तरासारैः गोकुलं पीडयन्ति। गावः निराहाराः, शीत-अनिलेन कम्पमानाः आक्रोशन्ति। वर्ष-पीडिताः गोपाः गोप्यश्च शीतार्ताः गोविन्दस्य पादमूलम् आगच्छन्ति। शरणं प्राप्नुवन्ति।

आर्तत्राणपरायणः श्रीकृष्णः गोपालकुलं परिपालयति। इन्द्रस्य अहङ्कारं परिहर्तुम् इच्छति। एकेन करेण समीपस्थं गोवर्धनं गिरिं शीलीन्ध्रम् इव उत्पाटयति। तस्य छायायां सर्वेषां रक्षणं कल्पयति। सप्तवर्षदेशीयः श्रीकृष्णः एवं सप्त दिनानि यावत् आहारनिद्रादिकं हित्वा गोवर्धनपर्वतं अचलः धरति।।श्रीकृष्णस्य शक्तिं जानाति।मघवा दर्पं विजहाति। मेघान् वारयति। वर्षाभावात् दिशः प्रसीदन्ति। सर्यश्च उदेति। गोपाः गोप्यश्च कृष्णस्य आदेशात् भयं त्यजन्ति, सपरिकरं स्व-स्व-गृहाणि गच्छन्ति।देवेन्द्रः ससुरभिः यदुनन्दनं द्रष्टुम् आगाच्छति। शिरसा तं प्रणमति। कृताञ्जलिः -

**नमः तुभ्यं भगवते पुरुषाय महात्मने। वासुदेवाय कृष्णाय सात्वतां पतये नमः।**
**स्वच्छन्दोपात्तदेहाय विशुद्धज्ञानमूर्तये। सर्वस्मै सर्वबीजाय सर्वभूतात्मने नमः।।**

'हे जगदीश!त्वं पुरुषोत्तमः असि। जगतां पालकः । स्वेच्छातनुभिः मानिनां मानं पालयचि। जगतः हितम् आचरसि।' इत्येवं स्तौति। इन्द्रः स्व-अविवेककार्यंभगवते निव्दयति। क्षमां पृच्छति।

भगवान् अपि प्रहसन् 'मघवन्! लोकेशमानिनं श्री-मद-अन्धं त्वाम् अनुग्रहीतुं मया एव यागः विहितः। यः श्री-मद-अन्धः मां न पश्यति तस्य अनुग्रहाय तस्य सम्पदं हरामि। तव भद्रम् अस्तु।मत् अनुशासनं पालयन् स्व-अधिकारे तिष्ठ' इति इन्द्रं वदति, विसृजति च। एवं श्रीकृशणः इन्द्रस्य गर्वं परिहरति।

### ८.३.१०.श्रीकृष्णस्य रासलीलाः :-

गोपस्त्रियः मधुरभक्त्या श्रीकृष्णम् आराधयन्ति। श्रीकृष्णः मोक्षं दातुम् इच्छति। शरत्-कालरात्रिषु यमुनातीरम् आसीदति। कलमधुरं वेणुगीतानि गायति। मधुरं तत् वेणुरवं च आकर्ण्य व्रजाङ्गनाः स्व-स्व-कार्याणि विहाय पतिभिः भ्रातृभिः पुनः वार्यमाणाः अपि कृष्ण-दर्शन-लालसाः तं देशं पलायनं चक्रुः।

गृहान्तर्-निरुद्धाः काश्चन व्रजसुन्दर्यः गन्तुम् अशक्ताः तम् एव ध्यायन्त्यःनिर्धूत-अशेष-पापाःपरब्रह्मरूपिणं भगवन्तं देवकीसुतं जारबुध्या सङ्गताः अपि गुणमयं देहं परित्यज्य मुक्तिं प्रापुः। श्रीकृष्णसन्निधिं प्राप्ताः गोपिकाः भगवता बहुधा प्रतिबोधिता अपि,गृहगमने न आसक्ताः अभवन्।भगवान् स्वात्मानं बहुधा परिकल्प्य मण्डलीकृतासु गोपाङ्गनासु द्वयोःद्वयोःमध्ये तिष्ठन् परस्परं समाश्लिष्यन् वेणुना मधुरं गायन् नर्तकःनर्तयिता च स्वयम् आसीत्। एवं काश्चित् रात्र्यः ताभिः सह रासक्रीडाः वनक्रीडाः जलक्रीडाश्च कृत्वा तासं मनोरथान् अपूरयत्।अनन्तरं अन्त -र्हितः अभवत्।गोविन्दे अन्तर्हिते सति तदाक्षिप्त-हृदयाःतद्भाव-भाविताः सर्वथा नन्दनन्दनं अनुकुर्वन्त्यः आसन्। परस्परमहमेव कृष्ण इति वदन्त्यः उन्मत्ता उव क्रीजनं अकार्षुः तं मार्गमाणाः वनात् वनान्तरं अगच्छन्। तत्रापि कृष्णं अपश्यन्त्यः प्लक्षन्यग्रोधादीन् वनस्पतीन् मृगवराहारीश्च सम्बोध्य कृष्णगतिं पप्रच्छुः। एकस्मिन् वने कृष्ण- चरण-अरविन्दे भूमौ दृष्ट्वा अन्यस्याः अपि पदानि दृष्ट्वा, भगवान् तया आराधितः इति निश्चयं कृतवत्यः। एवं आत्मारामः अपि भगवान् कामिनां दैन्यं, स्त्रीणां दुरात्मतां च दर्शयितुं अन्याः हित्वा एकया व्रजसुन्दर्या रेमे सा अपि सर्वासु अहम् एव गरिष्ठा इति आत्मानं मेने। सैन्दर्यदर्पेण मूर्च्छितां पदात् परं गन्तुम् अशक्तां तां भगवान् स्कन्धम् आरोप्य अन्तर्दधे।

तदनु सा अपि कृष्ण-अदर्शनेन परितापं प्राप्तवती। तम् एव विचिन्वती इतराभिः सह मिलिता स्ववृत्तान्तम् अकथयत्। तत् आकर्ण्य तस्याः माधवात् बहुमानप्राप्तिम्, तस्याः दौरात्म्यात् गोविन्देन कृतं अवमानं च दृष्ट्वा गोपिकाः विस्मयं प्रापुः । श्रीकृष्णः न केवलं गोपिकानन्दनः, किन्तु अखिलदेहिनां आत्मसाक्षी इति ते अजानन्।एवं गोप्यः गुरु-पति-पुत्रान् विहाय कृष्णाय विलपन्त्यः, स्तुवन्त्यः, गायन्त्यः, च तत्रैव आसन्। ताः अनुजिघृक्षया तत् -मध्ये कृष्णःस्वात्मानं प्रत्यक्षीचकार। ताभिःसाकं मधुरालापान् अकरोत्। कृष्णदर्शनेन गोप्यःप्रत्यागतप्राणाः आसन्। ताः परितः परिवेष्ट्य काश्चित् दक्षिणकरं,काश्चित् वामशयं, काश्चित् कण्ठदेशं, काश्चित्

स्कन्धदेशं च गृहीत्वा बहुविधान् आलापान् अकुर्वन्।एवं श्रीकृष्णः कतिचन शरत्-निशाः जलक्रीडाभिः रासक्रीडाभिः कुञ्ज विहारैः पुलिन विहारैः च यापयित्वा प्राक् दत्तवराः ताः गोपिकाः अनुजग्राह। अन्ते च तासां विदेहकैवल्यं प्रादात्।

### ८.३.११.सुदर्शनचरितम् (विद्याधरवृत्तान्तम्) :-

एकस्मिन् दिने नन्दादयः गोपाः देवयात्रां कर्तुं शकटान् आरुहन्ति। सरस्वतीनदीतीरे वर्तमानं अम्बिकावनं गच्छन्ति। सरस्वत्यां स्नान्ति। पार्वती-परमेश्वरौ यथाविधि पूजयन्ति। गो-भू-हिरण्यादि-विप्रेभ्यः ददति। सरस्वत्यां जलं पिबन्ति। तत्र समाविष्टाः भवन्ति। नन्दः अलसितः भवति। निद्रां गच्छति।एकः सर्पः तस्य पादाग्रं दशन् अस्ति।निद्रातः उत्थितः नन्दः आत्मरक्षणाय 'कृष्ण! कृष्ण पाहि' इति उच्चैः आक्रन्दति। सर्वे अपि गोपाः महान्तं कोलाहलं कुर्वन्ति। तथापि उरगः भक्षणात् न निवृत्तः,किन्तु दशन् एव अस्ति। कृष्णः समागच्छति। पादेन उरगं दृढं मर्दयति। उरगः स्वीयं रूपं विजहाति। मनोहरं शरीरं प्राप्नोति। विद्याधररूपेण साक्षात्कृतः भवति। सः दिव्यमालाम् -अम्बरं च धरति । तं विलोक्य विस्मयं प्राप्नुवन्ति। वासुदेवः विद्याधरस्य वृत्तान्तं पृच्छति।

विद्याधरः स्वीयं वृत्तान्तम् 'भगवन्! अहं रूपेण-यौवनेन च सम्पन्नःगर्विष्ठः अस्मि। विमाने लोकान् सञ्चरन् कदाचित् कुरूपिणः आङ्गिरसान् दृष्ट्वान् अस्मि। परिहासं च कृतवान् अस्मि। तेन ते आङ्गिरसाः क्रुद्धाः भवन्ति। 'यतः त्वं अस्मान् वीक्ष्य परिहासं करोषि,अतः उरगः भव' इति शपन्ति।अनन्तरं बहुधा प्रार्थिताः ते, 'यादवकुले श्रीकृष्णः अवतीर्णः तव समीपम् आगमिष्यति।तस्य पादघातेन उरगरूपं विहाय पूर्वं विद्याधरं रूपं प्राप्यसि' इति एवं शापस्य अवसानम् अपि ददति।

तस्य नाम सुदर्शनः। विद्याधरः निजरूपं लब्ध्वा श्रीकृष्णं प्रणमति 'भवत् - चिन्तेनेन भवत् -नामस्मरणेन च अशेषाः किल्बिषाः नश्यन्ति। किमुत तव पादस्पर्शेन' इति स्तौति। स्वधाम गच्छति।।गोपाः अपि अद्भुतं तत्-वृत्तान्तं जानन्ति।विस्मयं प्रप्नुवन्ति। बृन्दावनस्य प्रयाणं कुर्वन्ति।

### ८.३.१२.कंसस्य वधः :- अक्रूरस्य आगमनम्

'अहं श्रीकृष्णं धनुर्यागव्याजेन मधुरां आनयामि । यथाकथञ्चित् तं घातयिष्यामि'इति कंसः चिन्तयति। श्वफल्कस्य तनयम् अक्रूरं गोकुलं प्रेषयति। अक्रूरः मधुरां गच्छति। गमनसमये एवं चिन्तयति च - 'अहो! मया पूर्वस्मिन् जन्मनि किं सुकृतं आचरितवान् अस्मि। किं वा तपः तप्तवान् अस्मि। किं वा दानं कृतवान् अस्मि। योगिनाम् अपि श्रीकृष्णस्य दर्शनं दुर्लभं भवति खलु।तथा सति कंसः मम अत्यन्तम् उपकरोति । अहं श्रीकृष्णस्य पदारविन्दं आद्य पश्यामि' इति आत्मनः भाग्यं बहुधा स्तौति। कंसेन प्रेषितं मां श्रीकृष्णः अतिदुष्टं चिन्तयति? उत

सर्वभूतान्तरात्मा माम् आत्मबन्धुं भक्ताग्रेसरं वा चिन्तयति? विश्वदृक् कंसप्रे,षितम् अपि मां नैव शत्रुं मन्येत? इति अध्वनि बहु व्याकुलः भवति।। अक्रूरः सायंकालसमये गोकुलस्य समीपं गच्छति। मार्गे अब्ज-यव-अङ्कुशादिरेखाभिः लक्षितानि पादचिह्नानि पश्यति।,तानि श्रीकृष्णस्य पादचिह्नानि इति चिन्तयति। गोदोहनाय प्राप्तौ राम-कृष्णौ पश्यति। तयोः प्रणिपातम् आचरति।।अक्रूरः भगवतः दर्शनेनपुलकितः भवति। श्रीकृष्णः तं बाहुभ्यां गृह्णाति। दृढम् आलिङ्गति। सङ्कर्षणः पाणिं गृहीत्वा गृहं नयति। अर्घ्यपाद्यादिना मधुपर्केण च अक्रूरं सत्करोति। भोजनान्ते श्रीकृष्णः अक्रूरं योगक्षेमं पृच्छति।

**अक्रूरस्य भाषणम् :-**

अक्रूरः सायंतनभोजनं समापययति। पर्यङ्के सुखम् उपविशति। श्रीकृष्णः तम् उपसरति। बन्धूनां विषये मित्राणां विषये च कंसस्य प्रवर्तनं पृच्छति। पित्रोः कारागारबन्धनम्,आत्मजानां मरणेन तेषां प्राप्तं दुःखं च स्मरति। अक्रूरं आगमनस्य कारणं च पृच्छति। 'कंसः नारदमुखात् तव वृत्तान्तं जानाति। यदुषु कोपं वर्धयति। वसुदेवं च हन्तुम् इच्छति। धनुर्-यागव्याजेन साग्रजं त्वां मधुरापुरीम् आनाय्य,कथञ्चित् हन्तुम् इच्छति' इति अक्रूरः श्रीकृष्णं वदति। तत् श्रुत्वा नन्दसूनुः विहसति। स्वपितरं प्रभाते मधुरापुरीयात्रायै चोदयति। नन्दः अपि दधि-क्षीर-हैयङ्गवीनादि- उपायनानि स्वीकुर्वन्तु,शकटैः सन्नद्धाः भवन्तु' इति गोकुले घोषणां कारयति।

**श्रीकृष्णस्य मधुरापुर-गमनम् :-**

गोपाङ्गनाः श्रीकृष्णस्य मधुरापुरगमनं शृण्वन्ति। तत्-विरहम् असहमानाः अक्रूरं बहुधा निन्दन्ति।भगवान् ताः सूनृतया वाचा समाश्वासयति। अक्रूरेण साकं मधुरापूरीं प्रतिष्ठते। नन्दादयः अपि उपायनैः शकटानि आरोहन्ति। प्रयाणाय सिद्धाः भवन्ति। मध्ये मार्गं बलराम-कृष्णौ कालिन्दीजलं पिबतः। अक्रूरः अपि तौ बलराम- कृष्णौ रथे अवस्थाप्य कालिन्द्यां स्नातुं याति। जले निमग्नस्य तस्य बलराम-कृष्णौ साक्षात् भवतः। जलान्तर्गतौ तौ दृष्ट्वा, स्नानं परिसमाप्य,सविस्मयं रथदेशं समागत्य रथस्थौ तौ पश्यति। तेन अक्रूरस्य मनसि संशयः भवति। जले तयोः दर्शनं मृषा इति चिन्तयति।पुनः नद्यां निमज्जति। तत्र श्रीकृष्णः आदिशेषस्य उपरिष्टात् शयानःअस्ति। शङ्ख-चक्र-गदाः धरति। कण्ठे वनमालां विभूषयति। चतुरान् भुजान् वहति। कौस्तुभं धरति। देवर्षिभिः प्रहलादादि भक्तैः च वन्द्यमानः विद्यते। जले तादृशं नारायणं पश्यति। बाष्पलोचनः सगद्गदया गिरा श्रीकृष्णं बहुधा स्तौति। जलात् तूर्णम् उन्मज्जति।प्रातः कालिकं कार्यं निर्वर्तयति।रथम् उपसरति।तं दृष्ट्वा श्रीकृष्णः 'तात! जले,भूमौ, आकाशे,वा किम् अपि अद्भुतं दृष्टवान् असि वा'? इति पृच्छति। अक्रूरः अपि 'जले, भुवि, अन्तरिक्षे च सर्वत्र त्वाम् एव अहम् पश्यामि' इति वदति।स्यन्दनं चोदयति।मध्ये मार्गं आगताः ग्रामीणाः जगत्-मोहनं श्रीकृष्णं पश्यन्ति। बलराम-कृष्णौ दिवस-अवसाने 'श्वः प्रभाते पुरी प्रवेक्ष्यावः।

अस्यां रात्रौ सहचरैः सहात्र वसामः' इति अक्रूरं वदतः। अक्रूरः बलराम–कृष्णौ स्वगृहं नेतुम् इच्छति।परं तौ 'यदुकुलविद्वेषिणं मदोद्धतं कंसं हत्वा, भवद्गृ हम् आगमिष्यामि' इति समाधाय अक्रूरं प्रेषयतः। श्रीकृष्णः अनुचरैः नन्दादिभिः सह तत्–वने सुखं स्वपिति। प्रातः कालिकं कृत्यं निर्वर्त्य, अपराह्णे बलभद्रेन साकं रम्य–प्राकार–सहितां धनुर्यागव्याजेन समन्तात् समलङ्कृतां मधुरापुरीं प्रविशति।पुरस्थाः रमण्यः स्वकर्माणि विहाय जगत्–मोहन –आकारौ बलराम–कृष्णौ पश्यन्ति।

**रजकस्य वधः :-**

राजमार्गेण गच्छतोः बलराम–कृष्णयोः राज–वस्त्र–निर्णेक्ता रजकः तटस्थः भवति।।रजकं दृष्ट्वा ,बवराम– कृष्णौ 'आवां भवतः प्रभोः कंसस्य भागिनेयौ। तस्य दर्शनाय गच्छावः। आवां गोकुल–वासिनौ। अतः राजदर्शन– उचितानि वस्त्राणि आवयोः सकाशे न सन्ति। अतः धर्तुम् कानिचित् राजवस्त्राणि आवयोः प्रदेहि' इति वदतः। तत् आकर्ण्य क्रुद्धः रजकः'अहो! युवां उन्मत्तौ इव दृश्येते। राजाधिराजाः अपि कंसस्य नामग्रहणे भीताः भवेयुः। गाः चारयतोः युवयोः राजवस्त्र–धारणे योग्यता नास्ति' इति वदति। तेन क्रुद्धः देवकीसुतः रजकं मुष्टिघातेन मारयति। तत् दृष्ट्वा अन्ये अपि रजकाः वस्त्राणि तत्रैव विसृज्य पलायनं कुर्वन्ति। श्रीकृष्णः गोपेभ्यः अभीष्टानि वस्त्राणि ददाति। स्व– अभीष्टानि वस्त्राणि स्वीकरोति। मार्गमध्ये एकः तन्तुवायः समागच्छति। ताभ्यां हिरण्मयानि वस्त्राणि ददाति। प्रसन्नः भगवान् तस्मै स्स्य निजरूपम् अनुगृह्णाति।सुदाम्नः मालाकारस्य गृहं प्रविश्य बलराम–कृष्णौ तस्य पूजां स्वीकुरुतः। श्रीकृष्णः तस्मै स्व–पादकमल– सेवा–अनुरूपं फलम् अनुगृह्णाति। बल– आयुष्– कीर्ति–कान्ति–सम्पत्–प्रदानेन अपि तं श्रीकृष्णः अनुगृह्णाति।

**कुब्जायाः अनुग्रहणम् :-**

बलराम–कृष्णौ अमूल्यवस्त्र–आभरणानि धरतः। राजमार्गे गच्छतः। तदा तौ त्रिवक्रनाम्नीम् एकां कुब्जा पश्यतः। तस्याः सकाशे अमूल्यानि अनुलेपनानि सन्ति।तानि गृहीत्वा गच्छति। सा तयोः मनोहर–आकारं रूपं पश्यति।बलराम–कृष्णयोः बहुविधानि अनुलेपनानि ददाति। तेन बलराम–कृष्णौ प्रीतौ भवतः। श्रीकृष्णः तां कुब्जां अनुग्रहीतुम् अपि इच्छति। तस्याः पादयोः पादौ निक्षिप्य, द्वयङ्गुलोत्तानपाणिना तस्याः चुबुकं गृहीत्वा ऊर्ध्वं करोति। सा कुरूपं जहाति। रमणीयं रूपं प्राप्नोति।सा श्रीकृष्णे अनुरक्ता भवति।तेन सह रन्तुकामा च अस्ति। अतः गृह–आगमनाय श्रीकृष्णं प्रार्थयति।श्रीकृष्णः अग्रजं दृष्ट्वा किञ्चित् विहसन्'मदीयं कार्यं समाप्य तव गृहम् आगमिष्यामि' इति वदति। वणिक्–पथेन गच्छति। धनुश्शालां प्राप्नोति। धनुषः भञ्जनम् श्रीकृष्णः धनुश्शालायां बहुभिः पुरुषैः रक्षितं शरासनं पश्यति। तत् च ऐन्द्रं धनुः इव महाद्भुतं वर्तते। धनुषः रक्षकाः श्रीकृष्णं वारयन्ति। तथापि श्रीकृष्णः तत् धनुः

वामकरेण आददाति। मण्डलीकृत-कोदण्डः शरं सन्धाय यावता मोक्तुम् आकर्षति तावता मध्ये एव धनुः भग्नं भवति । तत्-ध्वनिना दशदिशः प्रतिनदन्ति। तत् श्रुत्वा कंसः अपि भीतः भवति।चापरक्षिणः'बालकः धनुः बभञ्ज' इति तं ताडयितुं यतन्ते। तेषां व्यवसायं ज्ञात्वा बलराम-कृष्णौ तत्रत्यान् सर्वान् अपि कार्मुकस्य खण्डैःमारयन्ति। सायंकाले बलराम-कृष्णौ स्ववासं प्राप्नुतः। तत्- विदित्वा वित्रस्तः कंसः चिन्तया निद्रां लभते। जाग्रत्-अवस्थायाम्,स्वप्ने अपि प्रेतपरिष्वङ्गः,खरयानं तैल- अभ्य ञ्जनम् इति एतानि बहूनि दुर्-निमित्तानि पश्यति। प्रभाते कंसः मल्लक्रीडां द्रष्टुकामः मल्लरङ्गस्थलं प्रविशति।तत्र ब्रह्म-क्षत्रादिषु उपविष्टेषु, कंसः अपि स्वस्य आसनं अलङ्करोति। नन्दादयः अपि स्वैः आनीतानि उपायनानि कंसाय समर्पयन्ति। यथार्हेषु आसनेषु उपविशन्ति।चाणूर-मुष्टिक- प्रभृतयः अपि मल्लाः मल्लरङ्गं प्रविशन्ति।

**कुवलयापीडहननम् :-**

बलरामेण सह श्रीकृष्णः अमूल्यवस्त्राणि आभरणानि च धरति।मल्लानां दुन्दुभेः घोषां शृणोति। नितरां प्रोत्साहितः रङ्गद्वारं प्रवेष्टुम् गच्छति। मार्गे अम्बष्ठेन प्रेरितः कुवलयापीडः नाम गजः आगच्छति। तदा कृष्णः अम्बष्ठम् 'भोः! हस्तिपक! आवयोः मार्गं देहि। मार्गत् कुञ्जरं अपसारय। आवयो तं प्रेरयितुं नार्हसि। यदि भूयः अपि प्रेरयसि सकुञ्जरं त्वां मारयिष्यामि'इति वदति।

एवं भगवता निर्भर्त्सितः अपि सः क्रूरः तयोः हननाय कुञ्जरं प्रोत्साहयत्येव। गजः श्रीकृष्णं करेण प्रहरति। कथञ्चित् तेन विसृष्टः श्रीकृष्णः,हस्तेन कुञ्जरं ताडयति।तस्य अङ्घ्रिषु लीयते।कुवलयापीडः तु अग्रतः बालकम् न पश्यति। घ्राणदृष्ट्या स्वपादेषु निलीनं श्रीकृष्णं करेण गृह्णाति।श्रीकृष्णः तस्मात् आत्मानं मोचयति।गजं पुच्छे गृह्णाति।पञ्चविंशति-धनुः परिमितं दूरं पातयति। अनन्तरं कुञ्जरस्य अभिमुखम् एत्य करतलेन वारणं निहन्ति। अत्यन्तम् अमर्षितः सः कुञ्जरः महामात्रैः हस्तिपकैः श्रीकृष्णहननाय प्रचोदितः भवति। भगवन्तम् अभिद्रवति। आपतन्तं तं वीक्ष्य श्रीकृष्णः करं हस्तेन गृहीत्वा पुनः पुनः भूमौ पातयित्वा प्रहरति। गजं च मारयति। अनन्तरं हस्तिपकान् च हन्ति।

**चाणूर-मुष्टिकयोः वधः :-**

श्रीकृष्णः कुवलयापीडं हन्ति। बलरामेण सह देवकीनन्दनः रक्त-मद-बिन्दुभिः अञ्चितं मल्लरङ्गं प्रविशति। सः मल्लानां अशनिः इव,नराणां मित्रम् इव,स्त्रीणां स्मरः इव,दुष्टानां राज्ञां शासकः इव, कंसस्य मृत्यः इव, योगिनां परतत्त्वम्,इव,वृष्णीनां परदेवता इव च अवभासते।कंसः कुवलयापीडं मृतं ज्ञात्वा मनसि उद्वेगं प्राप्नोति। सभ्याः जानपदास्तु श्रीकृष्णस्य वीरचरितानि आलपन्तः सन्ति।चाणूरः बलरामेण सह कृष्णम् आनयति।

'हे नन्दसूनो ! हे राम !युवयोः मल्लविद्या कौशलं कंसः जानाति। तत् द्रष्टुम् इच्छति। अतः एन भ्रातरौ युवाम् इह आनयति। तस्मात् भवद्भ्याम् अस्माभिश्च राज्ञः प्रियं कर्तव्यम् अस्ति' इति वदति।

तत् निशम्य श्रीकृष्णः 'अवश्यम् अस्माभिः राज्ञः प्रियं प्रियं कर्तव्यम् एव। यूयं तु युवानः बलशालिनः च। वयं सवयोभिः बालैः युद्धं करवाम' इति विज्ञापयति। चाणूरः 'हे कृष्ण ! वयसा बालकेन अपि त्वाया सहस्रद्विप–सत्वभृत् कुवलयापीडः हतः। अतः त्वं बली एव। अवयोः त्वया सह मल्लयुद्धः न अधर्मः' इति श्रीकृष्णं चोदयति।बलराम–कृष्णौ बद्धपरिकरौ भुज–आस्फालनम् कुरुतः। तयोः मल्लयुद्धः प्रेक्षवतां सिंहक्रीडा इव अस्ति। श्रीकृष्णः चाणूरं आसीदति। बलरामः मुष्टिकं च उप सरति। उभयोः पक्षयोः मध्ये हस्ताहस्ति युद्धं अभूत्। पद्भ्यां पादयोः,जानुभ्यां जान्वोश्च अन्योन्यं दृढं बद्ध्वा तौ विचकर्षतुः। परिभ्रामण–विक्षेप–परिरम्भ–अवपातनैः,उत्सर्पण –अपसर्पणैश्च अन्योन्यं निजपराक्रमं प्रकटयतः। तत्र बलाबलसूचकं युद्धं पश्यन्त्यः पौराङ्गनाः 'अयं महान् अधर्मः।एतौ मल्लौ वज्रसारसर्वाङ्गौ मल्लयुद्धविशारदौ।

शैलेन्द्रसन्निभौ। राम–कृष्णौ तु बालकौ। अनवाप्त–यौवनौ। अतः एतयोः मल्लयुद्धं न अनुमन्तुं शक्यत' इति अन्तः वदन्ति स्म। अत्रान्तरे एव भगवान् चाणूरं हन्तुम् इच्छति। वज्रघातसमैः श्रीकृष्णस्य आघातैः चाणूरः हीनबलः नितरां ग्लानिम् आप्नोति। सः चाणूरः श्येनः इव भगवन्तं उपद्रवति। उभौ अपि करौ मुष्टीकृत्य कृष्णं उरसि ताडयति। मालाहतः द्विपः इव श्रीकृष्णः तेन प्रहारेण ईषत् चलति। तथापि श्रीकृष्णः अनुपदम् एव बलं सन्तनोति।चाणूरं बाह्वोः निगृह्णाति। बहुशः भ्रामयति। क्षीणजीवितं करोति।भूपृष्ठे पातयति।सः चाणूरः मृतः भवति। बलभद्रः अपि मुष्टिना तलेन मुष्टिकं प्रहरति। तं त्यक्तजीवितं करोति।सः च रन्ध्राभ्यां रुधिरम् उद्वमति।प्राणान् त्यजति। यमसदनं प्राप्नोति। अनन्तरं युद्धाय आगतं कूटनामानं मल्लं रामः वाममुष्टिना प्रहृत्य मारयति।। युद्धाय आगतौ शलतोलकौ कृष्णः भुवि पातयित्वा मुष्टिभिः ताडयति। अन्ये मल्लाः प्राणपरित्राणाय पलायन्ते ।

जनकोलाहलं करतालध्वनिं च कंसः शृणोति। 'बलराम–कृष्णौ दुर्वृत्तौ, पुरात् निष्कासयत। गोपानां च धनम् अपहरत। दुर्मतिं नन्दं बध्नीत। वसुदेवं उग्रसेनम् अपि घ्नन्तु' इति आत्मीयान् प्रेरयति।

**कंसस्य वधः :-**

श्रीकृष्णः कंसस्य आत्मश्लाघनं शृणोति। सिंहकिशोरः अद्रेः शिखरम् इव, सोपानस्य मार्गेण कंसेन अधिष्ठितं मञ्चम् आरोहति। समीपम् आपतन्तं श्रीकृष्णं योद्धुं,कंसः चर्म असिश्च धरति। आसनात् उत्तिष्ठति। यदुकुलपांसनं तं कंसम्, उरगं गरूत्मान् इव, केशग्राहं समार्षीति।

भूमौ पातयति। तस्य उपरि पतति।मुष्टिभिः प्रहरति। अपगतासुं च करोति । सोदरं निहतं दृष्ट्वा कंसानुजाः कङ्कन्यग्रोधकादयः अष्टौ भगवन्तं अभिधावन्ति। तान् रौहिणेयः रामः परिघम् उद्यम्य मारयति। भगवान् मातुलान्यः आश्वास्य हतानां और्ध्वदैहिकं कारयति।

रामकृष्णौ पितरौ उग्रसेनं च बन्धनात् मोचयतः।पितरौनमस्कुरुतः।'राम-कृष्णौ जगदीश्वरौ' इति विज्ञाय पितरौ न परिष्वजतः। भगवान् जनमोहिनीं मायां तयोः वितनोति। बलराम- श्रीकृष्णौ पितरौ उपसरतः 'हे तात! बाल्य- पौगण्ड- किशोराद्यवस्थासु यादृशं सुखं अन्यैः लब्धम् तादृशं सुखं युवाभ्यां न लब्धम्। समर्थः अपिः यः मातरं पितरं वृद्धं भार्यां साध्वीं सुतं प्रपञ्चं च न भरन्ति ,सः जनः श्वसन् अपि मृत एव' इति धर्मविदः वदन्ति। एतावत् पर्यन्तं पितरौ युवाम् न शुश्रूषितवन्तौ स्तः। अपराधः अयं क्षम्यताम्' इति वदतः। मायामोहितौ पितरौ श्रीकृष्णम् अङ्कम् आरोपयतः।, मूर्धानम् उपजिघ्रतः।,परिष्वजतः।,नितराम् आनन्दं प्राप्नुतः। मातामहं उग्रसेनं यदूनां नृपम् करोति। कंसभयात् देशान्तरगतान् यदु-वृष्णि - अन्धक - दाशार्हान् समाश्वास्य तान् स्वेषु गृहेषु वासयति च।

राम-कृष्णौ नन्दं समासीदतः। आलिङ्गनं च कुरुतः । अनन्तरं च 'हे तात! . युवभ्याम् आवां भृशं पोषितौ, लालितौ च। अनौरसम् अपि औरसपुत्रम् इव आवां पोषयतः। अतः आवां न कदापि भवन्तौ विस्मरावः। कञ्चित् कालं मित्राणां प्रियं कृत्वा, ज्ञातीन् द्रष्टुं व्रजम् एष्यावः' इति विज्ञापयतः। ततः अमूल्यवस्त्र- आभरणादि-दानेन सव्रजं नन्दं तोषयतः। नन्दादीन् व्रजं विसृजतः च।

## ८.४.उपसंहारः

एवम् अत्र पाठ्यांशे १).श्रीकृष्णस्य अवतारः , २).श्रीकृष्णस्य शैशवम् , ३).श्रीकृष्णस्य बाल्यक्रीडाः, ४).ब्रह्मणः गर्वभञ्जनम्, ५).कालियमर्दनम् , ६).कात्यायनीव्रतम् (गोपिकावस्त्रापहरणवृत्तान्तम्), ७).विप्रभार्याणाम् अनुग्रहणम्-विप्राणां गर्वापनोदनम्, ८).गोवर्धनस्य उद्धरणम्, ९).श्रीकृष्णस्य रासलीलाः, १०).सुदर्शनस्य चरितम् (विद्याधरवृत्तान्तम्) ११).कंसस्य वधः, इति एकाशानाम् अंशानां व्यासात्मकतया समाधानानि दत्तानि ।इतः अपि अन्ये केचन अंशाः टिप्पण्यात्मकप्रश्नेषु उपलभ्यन्ते। एतान् सर्वान् पठित्वा,कथागत- अंशानां व्यासात्मकतया समाधानं लिखितुम् अभ्यसः सम्पादनीयः भवति।

## ८.५.अभ्यासः

१.श्रीकृष्णजननवृत्तान्तं यथाग्रन्थं वर्णयत ?

२.नागपत्न्यः भगवन्तं यशोदानन्दनं किमर्थं प्रार्थयामासुः ? किमिति प्रार्थयामासुः ? सविवरणं लिखत ?

३.गोपाः सर्वे किमर्थं बृन्दावनं गतवन्तः ? यथाग्रन्थं वर्णयत ?

४.पूतनासंहारम् अधिकृत्य लिखत ?

# UNIT; IX
# टिप्पण्यात्मकाः प्रश्नाः

## संरचना


९.१.परिचयः

९.२.लक्ष्याणि

९.३.टिप्पण्यात्मकाः प्रश्नाः

- ९.३.१.नन्दगोपस्य पूर्ववृत्तान्तम्
- ९.३.२.बृन्दावनगमनम्
- ९.३.३.वत्सस्य वधः
- ९.३.४.बकस्य वधः
- ९.३.५.अजगरस्य हननम्
- ९.३.६.धेनुकासुरस्य वधः
- ९.३.७.प्रलम्बस्य वधः
- ९.३.८.नन्दस्य रक्षणम्
- ९.३.९.वृषभासुरस्य हननम्
- ९.३.१०.केशिवधः
- ९.३.११.व्योमासुरस्य वधः
- ९.३.१२.गुरुदक्षिणा

९.४.उपसंहारः

९.५.अभ्यासः


## ९.१.परिचयः

Diploma in Sanskrit Examination मध्ये ,आहत्य पञ्च पत्राणि सन्ति।तत्र इदं प्रथमं प्रश्नपत्रम्।अस्य च शतं (१००) अङ्काः सन्ति।अत्र च विषयद्वयं भवति।'कृष्णचरितम्' इत्ययम् अन्यतरः। अयं च आधुनिक गद्यं परिचयं करोति। अपि च गद्यस्य माध्यमेन पौराणिक-कथाकथन-प्रक्रियां प्रति अवगाहनां ददाति।परीक्षापत्रे अयं प्रथमभागत्वेन निर्णीतः अस्ति।एतस्य कृते चत्वारिंशत् ४० अङ्काः भवन्ति। अत्र आहत्य त्रयः प्रश्नाः समाधेयाः वर्तन्ते। तेषु कथावर्णनपरौ द्वौ प्रश्नौ व्यासात्मकतया लेखनीयौ विद्येते।एकैकस्य च दश अङ्काः विद्यन्ते। एवम् आहत्य व्यासात्मकप्रश्नानां समाधानलेखनाय विंशति-अङ्काः सन्ति।अवशिष्टाः विंशति-

अङ्काः तृतीयप्रश्नस्य उद्दिष्टाः। तृतीयप्रश्नश्च टिप्पण्यात्मकः। टिप्पणम् नाम विवरणम्।कथाकथनकाले समुपागतानां पात्राणां परिचयः, तस्य पात्रस्य कथया सम्बन्धः,तत्-केन्द्रकः सन्निवेशश्च Para graph मध्ये वर्ण्यते। चतस्रः टिप्पण्यः लेखनीयाः विद्यन्ते। 4□ 5 = 20 इति एवम् एकैकस्य कृते पञ्च अङ्काः निर्दिष्टाः। तदर्थं विद्यार्थिनां कृते अत्र पाठ्यांशे अभ्याससम्पादनं भवति।

## ९.२.लक्ष्याणि

अस्य पाठ्यांशस्य (UNIT) प्रधानम् उद्देश्यं परीक्षादृष्ट्या पाठ्यभागस्य अध्ययनाय विद्यार्थिनाम् अभ्यासदानं भवति।सामान्यतः पाठ्यभागस्य अध्ययने कोणद्वयं भवति।अधीतं जीवनोपयोगि कथं इति एकः कोणः।सः वैयक्तिक -जीवन-लक्ष्यं साधयितुं समर्थं भवति।द्वितीयः कोणः परीक्षादृक्पथम् (Examination Point Of View)। इदं विद्यार्थिनां परीक्षायाम् उत्तीर्णतायै आवश्यकं भवति।प्रस्तुतम् अयं पाठ्यांशः परीक्षादृष्ट्या विद्यार्थिनां कृते सज्जीकृतः अस्ति। प्रथमे प्रश्नपत्रे,प्रथमभागे तृतीयः टिप्पणीलेखनात्मकः। तस्य समाधानाय आवश्यकः सन्नाहः अत्र सम्पाद्यते।एतत् पाठ्यांशस्य अध्ययनेन -

- संस्कृतगद्यगतानां चतुर्णां श्रवण-पठन-लेखन-भाषणात्मकानां कौशलानां वर्धनं सम्पादितं भवति।
- संस्कृतगद्यरचनायाः शैलीं, श्रेष्ठतां च अवगन्तुं समर्थः भवति ।
- संस्कृतभाषायाम् आधुनिकगद्यमाध्यमेन भावव्यक्तीकरणकौशलं सम्पादितं भवति।
- आधुनिकगद्यमाध्यमेन पौराणिककथापात्राणां स्वरूपम् स्वभावं च आविष्कर्तुं प्रभवति।
- संस्कृतभाषायां वाक्यरचनाविधानम् अवगच्छति।
- संस्कृतभाषायाम् चिन्तितुं अवकाशं कल्पितं भवति।
- परीक्षालक्ष्यं सूचितं भवति, सम्पादितं च भवति।

## ९.३.टिप्पण्यात्मकाः प्रश्नाः

### ९.३.१.नन्दगोपस्य पूर्ववृत्तान्तम् :-

नन्दगोपः पूर्वजन्मनि द्रोणः इति कश्चन वसुप्रवरः। भार्यया धरया साकं ब्रह्मणः आदेशान् कुर्वन् 'परमपुरुषे हरौ परा भक्तिः अस्त' इति ब्रह्माणं ययाचे। पितामहः 'तथा अस्तु' इति वरं दत्तवान्। सः एव द्रोणः नन्दः अजनि। सैव धरा यशोदारूपेण आविर्भूता। श्रीहरिः अपि ब्रह्मणः वरं सत्यं कर्तुं कृष्णरूपेण आविर्भूय तयोः परां प्रीतिं चक्रे।

**९.३.२.बृन्दावनगमनम् :-**

गोकुले सम्भूतानि महोत्पातानि दृष्ट्वा नन्दादयः कर्तव्यं अमन्त्रयन्। तत्र ज्ञान-वयो-वृद्धः देश-काल-वित् उपनन्दनामा गोपवृद्धः राम-कृष्णयोः प्रियकृत् - 'अस्मिन् बृहद्वेन प्रजानाशहेतवः उत्पाताः बहवः समायान्ति। बालहन्त्र्या पूतनया बालकः कथंचित् मुक्तः। हरेः अनुग्रहात् शकटम् अपि बालकस्य उपरि न अपतत्। चक्रासुरेण गगने नीतः अपि शिलायां पतितः देवैः संरक्षितः। पततोः सालवृक्षयोः मध्ये गतः अपि भगवता रक्षितः। अतः अत्र चिरकालं अस्माभिः न अवस्थातव्यम्।यावता अन्यः अपायः संभवति ततः पूर्वमेव बालकौ गृहीत्वा वासार्हं बृन्दावनं वनं यास्यामः। शकटानि सज्जीकुरुत' इति आह। तत् श्रुत्वा गोपाः सर्वे शकटानि संयोज्य वृद्धान् बालान् स्त्रियः गृहोपकरणानि तेषु आरोप्य गोधनानि पुरो हितं च पुरस्कृत्य धनुष्-पाणयः शृङ्गाणि आपूरयन्तः बृन्दावनं जग्मुः। बृन्दानवं गोवर्धनं यमुनापुलिनानि दृष्ट्वा राम-कृष्णौ परां प्रीतिं आपतुः। व्रजौकसां प्रीतिं जनयन्तौ गोपालकौ अभूताम्। गौपबालकैः क्रीडन्तौ, वेणुं वादयन्तौ वत्सान् अचारयताम्।

**९.३.३.वत्सस्य वधः :-**

कदाचित् राम-कृष्णौ वयस्यैः सां वत्सान् चारयतः। तयोः जिघांसया कश्चन दैत्यः वत्सरूपेण आगत्य यूथं प्रविवेश। भगवान् (श्रीकृष्णः) तद्विज्ञाय भ्रात्रे तं दर्शयित्वा, पश्चात् तं उपसाद्य लाङ्गूलेन साकं परपादयोः तं जीवग्राहं गृहीत्वा भ्रामयित्वा अवधीत्। तं कपित्थवृक्षाग्रे अपातयत्। सः फलैः साकं भूमौ निपत्य ममार। संतुष्टाः देवाः पुष्पाणि अवाकिरन्।

**९.३.४.बकस्य वधः :-**

एकदा राम-कृष्णौ प्रातराशं स्वीकृत्य, वयस्यैः सह वत्सान् चारयामासतुः। गोपबालकाः जलाशयं प्रविश्य वत्सान् पाययित्वा स्वयं जलम् अपिबन्। तस्य समीपे स्थितं बकासुरं प्रेक्ष्य संत्रस्ताः उच्चैः आक्रन्दनं अकुर्वन्। बकः कृष्णं तुण्डेन अग्रसत्। तालुमूलं प्रविष्टः कृष्णः अग्निवत् दाहम् अकरोत्। ग्रसितुम् अशक्नुवन् बहिः उद्गीर्य तुण्डेन हन्तुं प्रयत्नम् अकरोत्। श्रीकृष्णः आपतन्तं तं दोर्भ्यां तुण्डयोः गृहीत्वा विददार। तत् अद्भुतं कृष्णकर्म दृष्ट्वा गोपबालकाः आनन्दं प्रापुः। तद्वृत्तान्तं बालकाः गृहे अब्रुवन्।'नारायणसमो गुणैः' इति गर्गोक्तं सत्यम् एव अभवत् ,इति नन्दादयः सन्तोषम् आपुः।

**९.३.५.अजगरस्य हननम् :-**

पूतनाबकानुजः कंसानुशिष्टः बकः नाम राक्षसः।सः राम-कृष्णौ गोपबालकान् च हन्तुम् उद्युक्तः बृन्दावनम् आजगाम।सर्वान् ग्रसितुं योजनायतं महाद्रिपीवरं अजगरं रूपमास्थाय मार्गे अतिष्ठत्।तस्य मुखं गुहाप्रायमासीत्। गोपबालकाः अद्रिकन्दरम् इति भ्रान्त्या तत्र प्रविष्टुम् ऐच्छन्। श्रीकृष्णः तान् वारयितुं यावता प्रयत्नम् अकरोत् तावतैव सर्वे तस्य मुखे प्राविशन्।

आत्मीयानां रक्षणं कथं कार्यम् इति विचिन्त्य श्रीकृष्णः अपि तस्मिन् प्राविशत्। तत् दृष्ट्वा देवाः 'हा हा'इति चुक्रुशुः।दैत्याश्च आनन्दं प्राप्नुवन्। सः खलः सर्वान् चूर्णीकर्तुं प्रयत्नम् अकरोत्। सद्यः श्रीकृष्णः तस्य गले ववृधे। प्रमाणाधिकशरीरेण निरुद्धश्वासः क्षणं इतस्ततः भ्रमन् मरणं प्राप्तवान्। श्रीकृष्णः मित्रैः साकं बहिः आजगाम। गोपबालकस्य तत् अद्भुतं कर्म दृष्ट्वा सुराः पुष्पवृष्टिम् अकुर्वन्। नर्तकाः नृत्यं अकुर्वन्। गायकाः गीतानि अगायन्। शुष्कं आजगरं चर्म वृन्दावने व्रजवासिनां बहुकालं क्रीडागह्वरं आसीत्।

**९.३.६.धेनुकासुरस्य वधः :-**

राम-कृष्णयोः मित्रं श्रीदामः अन्ये च गोपालाः एकं तालवनंप्रविशन्ति।तद्वनंधेनुकासुरः बन्धुभिः परि पालयति। राम-कृष्णौ अपि मित्राणां प्रियचिकीर्षया तद्वनं प्रविशतः। बलरामः दोर्भ्यां मत्तगजः इव तालवृक्षान् प्रकम्पति। फलानि पातयति। धेनुकः तत् ध्वनिं शृणोति।प्रकुपितः धेनुकः सरभसम् उपसरति। पश्चिमाभ्यां पद्भ्यां बलरामम् उरसि निहन्तुं कीशब्दं कुर्वन् उपसीदति।बलरामं निहन्तुं चरणौ उत्क्षिपति। बलभद्रः एकेन करेण धेनुकस्य चरणौ गृह्णाति। भ्रामयति। हत्वा तालवृक्षस्य अग्रे क्षिपति। तेन अन्यः वृक्षः, तेन च अन्यः वृक्षः, इत्येवं रूपेण क्रमेण वनं सर्वं भग्नं भवति। अनन्तरं सर्वान् ज्ञातीन् अपि हन्ति। राक्षसपीडानन्तरं अनुचराश्च यथेष्टं तालफलानि स्वीकुर्वन्ति। पशवश्च तृणं खादन्ति।

**९.३.७.प्रलम्बस्य वधः :-**

राम-कृष्णौ गोपबालकैः सह क्रीडन्तौ कालिन्दीतरे गाः चारयन्तौ आस्ताम्।रामकृष्णौ हन्तुकामः प्रलम्बनामा असुरः गोरूपम् आस्थाय गोसङ्घे प्राविशति।सर्वज्ञः कृष्णः तत् जानन् अपि तं हन्तुं तत्सख्यम् अनुमोदते। क्रीडनाय सर्वे गोपालाः द्विधा विभक्ताःभवन्ति। एकस्य सङ्घस्य बलरामः नायकः भवति। अन्यस्य सङ्घस्य श्रीकृष्णः नायकः भवति। उभौ अपि पक्षौ वाह्य-वाहकलक्षणाः नानाविधाः क्रीडाः खेलन्ति। जेतारं पराजितः वहति। विजेता तम् आरोहति। पराजितः श्रीकृष्णः श्रीदामानं वहति। गोरूपधरः प्रलम्बः बलरामं वहति। सुदुरं गत्वा सः भारातिरेकेण अतिकरालं निजं रूपं प्राप्नोति। अतिभीषणं तस्य शरीराकृतिं दृष्ट्वा हलधरः आदौ किञ्चित् भीतः भवति। आत्मानं हरन्तं तम् असुरं मुष्टिना शिरसि प्रहरति। अशनितुल्येन तेन घातेन विदीर्णमस्तकः सन् प्रलम्बः रक्तं उद्वमति। असून् त्यजति। अधः पतति।

**९.३.८ वने दवाग्नेः पानम् :-**

गोपालाः क्रीडायां निमग्नाः। पशुसमूहः तृणलोभेन वनात् वनम् अटन् क्रमेण मुञ्जाटवीं प्राविशत्। राम-कृ -ष्णादयः गोपाः पशून् अपश्यन्तः भीताः खुर-क्षुण्ण-मार्गेण मुञ्जवनं गतवन्तः। ततः मार्गम् अपश्यन्तः गोधनम् अप्राप्य निर्विण्णाः बभूवुः। श्रीकृष्णः उन्नतं वृक्षम् आरुह्य स्वस्वनामभिः गाः समाह्वयत्। स्वस्वनाम शब्दम् आकर्ण्य पशवः आनन्देन प्रतिनेदुः। अनन्तरं

वायुसमीरितः दवाग्निः समन्तात् वनं लेलिहानः गोपान् गोधनं च पर्यवेष्टयत्। गोपबालकाः श्रीकृष्णं शरणं गताः।श्रीकृष्णः तेषाम् अभयं प्रदाय 'चक्षूंषि निमीलय' इति गोपान् अशासत्। गोपाः नेत्राणि न्यमीलयन्। भगवान् श्रीकृष्णः मुखेन दावानलं निरवशेषं पीत्वा ततः बन्धून् अमोचयत्।

**९.३.९.नन्दस्य रक्षणम् :-**

कदाचित् एकादश्यां नन्दः उपोष्य, जनार्दनम् अर्चयित्वा, द्वादश्यां कालिन्दीं स्नातुम् अगात्। नन्दः अज्ञानात् आसुरवेलायां स्नातुं, जले अवततार। तं वरुणदूतः अपाहरत्। स्नानार्थं गत्वा अनिवृत्तं नन्दं विज्ञाय गोप्यः चुक्रुशुः। श्रीकृष्णः तत् विज्ञाय तम् आनेतुं वरुणलोकम् अगात्। आदिपुरुषं दृष्ट्वा वरुणः बहुधा स्तुत्वा, अपराधस्य क्षमां याचित्वा, नन्दं प्रादात्। पुत्रेण साकं वरुणलोकात् प्रत्यागतः नन्दः तत्-लोक-सौभाग्यं वरुणकृतं भगवत् - अर्चनं च न्यवेदयत्। व्रजौकसः श्रीकृष्णं साक्षात् नारायणं विदित्वा, तदेकदिदृक्षवः आसन्। श्रीकृष्णः तेषां संकल्पं विदित्वा कालिन्दीजले तान् निमज्य, ब्रह्मलोकम् अदर्शयत्।

**९.३.१०.वृषभासुरस्य हननम् :-**

अरिष्टनामा कश्चन वृषभासुरः अस्ति।सः अचलसन्निभः विद्यते। एकदा,सः गोष्ठं प्रविशति। खुरैः भुवम् आलिखति। शृङ्गेण उत्खनति। गवाम्,गोपानां च महान्तं भयं जनयति।। गोपाः स्वरक्षणाय श्रीकृष्णम् आह्वयन्ति।श्रीकृष्णः तस्य अग्रतः तिष्ठति, करं सख्युः अंसे निक्षिप्य,वृषभासुरं प्रतियोद्धुं सिद्धः भवति।वृषभःअपि श्रीकृष्णं मर्दयितुम् उपसर्पति।श्रीकृष्णः तस्य शृङ्गद्वयं गृह्णाति। अष्टादशपदानि पृष्ठतः पश्चात् प्रापयति।। क्रुद्धः वृषभः किञ्चित्-किञ्चित् -शकृत् -मूत्रं च विसृजति। खुराग्रैः भुवं विमर्दयति। कोपेन श्रीकृष्णं प्रति समापतति।। आपतन्तं तं शृङ्गयोः गृहीत्वा भूतले निष्पीडयति।तेन वृषभः मुखेन, नासाभ्यां च रक्तं वमति।, शकृत् मूत्रं च विसृजति।, प्राणान् मुञ्चति। व्रजवासिनः सुराश्च तेन संतुष्टाः भवन्ति।।

**९.३.११.केशिवधः :-**

केशिनामकः कश्चन राक्षसः।सः श्रीकृष्णं हन्तुं कंसेन प्रेषितः। हयरूपम् आस्थाय खुरैः धरित्रीं खनति। हेषाध्वनिना व्रजवासिनां भयम् उत्पादयति। गोकुलं तर्जयति। श्रीकृष्णं युद्धाय आह्वयति।श्रीकृष्णः राक्षसं योद्धुम् इच्छति।तार्क्ष्यः उरगं पद्भ्यां गृहीत्वा भूमौ याथा विसृजति एवं श्रीकृष्णः अपि हयस्य पादौ गृहीत्वा दूरे पातयति। लब्धसंज्ञः सः हयः क्रोधाविष्टः हरेः हननाय समापतति। तस्य मुखे हरिः स्वकरं निक्षिपति। करं वर्धयति। तेन भग्नदन्तः भवति। स राक्षसः निरूद्धवायुः भूमौ पतति। गतासुः भवति।

### ९.३.१२.व्योमासुरस्य वधः :-

एकदा गोपालाः अद्रिसानुषु गाः चारयन्तः निलायनक्रीडां खेलन्ति। केचन गोपाः मेषाः इव आचरन्ति। पुनश्च केचन चोराः इव प्रवर्तन्ते। एवं स्थिते व्योमनामा कश्चन राक्षसः अस्ति। सः कंसेन प्रेरितः भवति। सः मयस्य पुत्रः। राक्षसेषु चोरस्थाने भवति।,मेषपक्षस्थान् गोपान् बहून् अद्रिगुहायां निक्षिपति। अवशिष्टान् त्रिचतुरान् अपि गुहायां बद्ध्नाति। तत् द्वारं बृहत्-पाषणेन पिदधाति।सर्वज्ञः श्रीकृष्णः तत् विजानाति।सिंहः वृकम् इव तं हस्तेन गृह्णाति।सः स्वशरीरं पर्वतसन्निभं करोति। स्वं मोचयितुं यतते।देवकीनन्दनः व्योमासुरं दोर्भ्यां निगृह्णाति।,भूमौ पातयति। पशुवत् मारयति। गुहस्य द्वारे पिहितं पाषाणं निष्कासयति। गोपान् रक्षति।

### ९.३.१३.गुरुदक्षिणा :-

वसुदेवःराम-कृष्णयोः स्वगुरुणा विधिवत् द्विजजातिसंस्कारम् अकारयत्। ब्राह्मणेभ्यश्च गो-हिरण्यादि-रूपाः दक्षिणाः प्रादात्।सर्वज्ञौ अपि बालकौ लोकप्रबोधाय गुरूपसदनाय सन्दीपनेः गुरोः सकाशं वाराणसीं वसुदेवः प्रेष यामास।तत्र चतुष्-षष्ठि-दिनेषु तौ वेद-वेदाङ्गानि चतुष्-षष्ठिकलाश्च उपदेशमात्रेण अग्रहीष्टाम्।राम-कृष्णौ गुरु -दक्षिणास्वीकरणाय सान्दीपनिं अयाचताम्।'स्वपात्न्याः कांक्षितं कुरुतम्'इति गुरुः उक्तवान्।सा अपि प्रभास-क्षेत्रे समुद्रे मृतं बालकम् अयाचत्।राम-कृष्णौ यमपुरंगत्वा तत्र यमेन पूजितौ,गुरुपुत्रम् आदाय गुरुपत्न्यै समर्पितवन्तौ। स्वपुत्रलाभेन नितरां सन्तृप्तः सदारः गुरुः।गुरुणा गुरुपत्न्या च अनुज्ञातौ रथेन मधुरापुरीम् आजग्मतुः।

### ९.४.उपसंहारः

एवम् अत्र पाठ्यांशे १).नन्दगोपस्य पूर्ववृत्तान्तम्, २).बृन्दावनगमनम्, ३).वत्सस्य वधः, ४).बकस्य वधः, ५).अजगरस्य हननम्, ६).धेनुकासुरस्य वधः,७).प्रलम्बस्य वधः, ८).नन्दस्य रक्षणम् ,९).वृषभासुरस्य हननम्, १०).केशिवधः,११).व्योमासुरस्य वधः,१२).गुरुदक्षिणा इति द्वादशानाम् अंशानां टिप्पणीः दत्ताः। कतिचन अंशानां टिप्पणीः व्यासात्मकप्रश्नेषु उपलभ्यन्ते। एतान् सर्वान् पठित्वा,कथागत- अंशानां टिप्पणीं लेखितुम् अभ्यसम् अधिगच्छेत्।

### ९.५.अभ्यासः

अ) अधोनिर्दिष्टानां टिप्पणीः लिखत ?

१).बालकृष्णस्य उलूखलबन्धनम्　२).देवकी　३).कालियः
४).शकटभञ्जनम्　५).तृणावर्तः　६).नन्दः
७).सदर्शनो नाम विद्याधरः　८).उग्रसेनः　९).कंसः
१०).कात्यायनीव्रतम्